श्रीमद्भागवतमहापुराणतत्त्वविमर्शः

Śrīmadbhāgavata-mahā-purāṇa-tattva-vimarśḥ

सम्पादक

प्रो. गङ्गाधर पण्डा

प्रो. बृजेशकुमार शुक्ल

माँ आनन्दमयी पौराणिक तथा वैदिक अध्ययन एवं अनुसन्धान संस्थान, नैमिषारण्य, सीतापुर, (उ.प्र.)

श्रीमद्भागवतमहापुराणतत्त्वविमर्शः

Śrīmadbhāgavata-mahā-purāṇa-tattva-vimarśḥ

सम्पादक

प्रो. गङ्गाधर पण्डा

प्रो. बृजेशकुमार शुक्ल

Sree Ma Anandmayee Institute for Pauranic and Vaidic Studies and Research, Naimisaranya

प्रकाशक

माँ आनन्दमयी पौराणिक तथा वैदिक अध्ययन एवं

अनुसन्धान, संस्थान, नैमिषारण्य

सीतापुर, (उ. प्र.) ।

प्रबन्ध-समिति

माँ आनन्दमयी पौराणिक तथा वैदिक अध्ययन एवं

अनुसन्धान, संस्थान, नैमिषारण्य

प्रथम संस्करण : २०११

प्रतियाँ—१०००

मूल्य-रू. २५०.००

अक्षर-संयोजन

रमा कम्प्यूटर

जगतगंज, वाराणसी

मुद्रक

रेनबो प्रिण्टर्स

सिद्धिगिरिबाग, वाराणसी

प्रेरणास्त्रोत माँ आनन्दमयी जी

Shree Ma Anandmayee Institute for Puranic and Vedic Studies and Research

Members of the Managing Comittee

Shri S.N. Shukla, IAS (Retd.)
President
"Anand Niwas"
B/7, Nirala Nagar
Lucknow-226020

Shir Panu Brahmachari
Vice President
Shree Shree Anandamayee Ashram
Bhadanini
Varanasi-221001

Prof. S.N. Bhattacharya (Retd.)
Secretary
C-218, Sector-C
Mahanagar
Lucknow-22006

Shri Rakesh Gupta
C/oDr. Gaurhari Singhania
"Kamla Tower"
Kanpur-208001

Mr. M. Shashidhar Raddy
Vice President
C1-21, Humayun Road
New Delhi-110003

Ms. Madhavi P. Badiani
Member
Sadhana Rayon House
6th Floor, D.N. Road
Mambai

Deputy Commissioner (Ex-Officio)
D.M. Residence
Sitapur

Shir S.C. Banerjee
Addl.Gen.Secy-I (Sp1. Invitee)
Shree Anandamayee Ashram
P.O.Kankhal, Haridwari-249408
Uttaranchal

Prof. A.K. Kalia
Former Vice Chacellor
Sampuranand Sanskrit University
Varanasi-221002

Smt. Rani Lila Ram Kumar Bhargava
(Spl. Invitee)
Naval Kishor Estate
75, Hazratganj
Lucknow-22006

Dr. D.P. Mukherjee
(Addl.Gen.Secy-II (Spl. Invitee)
C-1/1438
Vasant Kunj, New Delhi-11070

Prof. Brijesh Kumar Shukla
(Spl. Invitee)
Prof. & Head, Sanskrit
Lucknow University
78, Badhshah Bagh
University Campus
Lucknow-226020

Prof. Gangadhar Panda
Member
Professor of Puranetihasa
Dean, Facalty of Sahitya Samskriti
Sampurnanand Sanskrit University
Varanasi-221002

●

पुरोवाक्

नैमिषेऽनिमिषक्षेत्रे ऋषयः शौनकादयः ।
सत्रं स्वर्गाय लोकाय सहस्रसममासत ।।

सहस्राधिकवर्षाऽवधिः वेदमन्त्रघोषपूरिते पवित्रतमे नैमिषीये क्षेत्रे पर्यन्तं रोमहर्षणप्रभृतिमुनिभिः पुराणानि निर्मथितानि । तत्र पवित्रतमे रमणीये च स्थाने पुराणमन्दिरं पौराणिकवैदिकाध्ययनानुसन्धानसंस्थानं च संस्थाप्य आनन्दमय्या आनन्दमयीदेव्या पूर्वसूरिभ्यः सम्मानः प्रदर्शितः । पुराणवाङ्मयस्य समस्तप्रभागेषु गहनानुसन्धानपूर्वकं शोधकार्यं सम्पादनमेवास्य संस्थानस्य परमं लक्ष्यम् ।

स्वलक्ष्यं साधयता नैमिषारण्यस्थेन मां-आनन्दमयी-पौराणिकवैदिका-ध्ययनानुसन्धानसंस्थानेन नवदेहलीस्थराष्ट्रियसंस्कृतसंस्थानद्वारा प्रदत्तवित्तीयानुदानेन २००९ ख्रीष्टाब्दे-दिसम्बरमासस्य ११,१२,१३ तारिकासु नैमिषारण्य एव श्रीमद्‌भागवतपुराणमधिकृत्य एका अखिलभारतीया विद्वत्सङ्गोष्ठी समायोजिता श्रीमद्भागवततत्त्वविमर्शात्मिका ।

जानन्त्येव विद्वांसः श्रीव्यासस्य समाधिभाषारूपत्वेन प्रसिद्धस्य श्रीमद्भागवतस्य रहस्यं दुर्बोधम् । **'विद्यावतां भागवते परीक्षा'** एषा भणितिरपि तस्यैव सार्थक्यं प्रतिपादयति । श्रीमद्‌भागवतं ब्रह्मसूत्राणां भाष्यभूतं दार्शनिकतत्त्वामृतस्याजस्रप्रवाहरूपं विराजते । अथ च निगमकल्पवृक्षस्य मधुरतमं सुपक्वं गलितं फलमस्ति । इदं भगवतः साक्षाच्छब्दात्मको विग्रहोऽपि वर्तते । अनेन व्यस्तमशान्तं मनः सुस्थिरं भूत्वा धर्मार्थकाममोक्षपुरुषार्थचतुष्टयस्य प्राप्त्यै अग्रेसरति । रासपञ्चाध्यायी-सदृशग्रन्थिग्रन्थयः सम्प्रत्यपि वैज्ञानिकमस्तिष्कं साश्चर्यं चमत्करोति । **'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्'** इत्याभाणकं निश्चप्रचमेव श्रीमद्‌भागवते नितरां सार्थकत्वं भजते ।

समायोजितायामस्यां सङ्गोष्ठ्यां विद्वांसः परस्परं स्वज्ञानस्य वितरणं विधाय श्रीमद्भागवतस्य तत्त्वविमर्शं कृतवन्तः । सङ्गोष्ठ्यामस्यां श्रीमद्‌भागवत-विषयाणामुपरि प्रायः शोधपत्राणि विपश्चिदपश्चिमाः प्रपठितवन्तः । तलस्पर्शिभिः विद्वद्वरेण्यैः स्वगवेषणबुद्ध्या भागवतस्य विविधपक्षान् लक्ष्यीकृत्य दार्शनिकसाहित्यिक-

सैद्धान्तिकचिन्तनस्यावधारणा: प्रकाशिता इति शोधपत्राणामवलोकनेन ज्ञायते । एतदर्थं सर्वे प्रतिभागिनो विद्वांस: साधुवादभाजनार्हा: सन्ति । तान् प्रति कार्तज्ञ्यं विज्ञाप्य सन्तोषमनुभवामि । एते मनीषिण: शोधपत्रनिबन्धनपूर्वकं स्वागमनेन संस्थानस्य गौरवं वर्द्धितवन्त इति कश्चनापूर्वानन्दस्य विषय: ।

इदानीं सङ्गोष्ठ्यां पठितानां श्रीमद्भागवततत्त्वविमर्शात्मकानां शोधपत्राणां ग्रन्थरूपेण प्रकाशनेन संस्थानमिदं महत्कार्यं सम्पादयतीति मे परमो हर्षप्रकर्ष: । एतदर्थं सङ्गोष्ठ्या: सञ्चालनाय च वित्तीयसाहाय्येनानुगृहीतवन्त:, एतदर्थं राष्ट्रियसंस्कृतसंस्थानस्य कुलपतिवर्य्यान् **प्रो. राधावल्लभत्रिपाठि**महाशयान् साभारमभिनन्दामि । विविधसहयोगार्थं सङ्गोष्ठ्यां समुपस्थितान् विदुष: दानमानाभ्यां सभाजयत: संस्थानस्य लक्ष्यं साधयत: **श्री एस. एन. शुक्ल**महोदयानामाध्यक्ष्ये प्रबन्धसमिते: सदस्यान् साधुवादै: सभाजयामि पौनपुन्येन कृतज्ञतामावहामि । सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य साहित्यसंस्कृतिसङ्कायाध्यक्ष: **प्रो. गङ्गाधरपण्डा**, लखनऊविश्वविद्यालयस्य संस्कृतविभागाध्यक्ष: **प्रो. बृजेशकुमारशुक्लश्च** सम्मानभाजनार्हौ, यतो हि एतौ तन्मयतापूर्वकं सङ्गोष्ठीसमायोजनपुरस्सरं समागतशोधपत्राणां ग्रन्थस्वरूपं दत्तवन्तौ । ताभ्यां महोदयाभ्यां मन: सङ्कल्पिताशीर्वचोभि: वर्द्धयामि, धन्यवचांसि वितरामि ।

अस्तु, विविधनिबन्धपुष्पपूरितं ग्रन्थकुसुमाञ्जलिमिमं सललिताय पुराणपुरुषाय सश्रद्धं समर्प्य कामये यदयं ग्रन्थ: भागवतानुरागिणां विदुषां छात्राणामनुसन्धित्सूणाञ्चोपकाराय स्यादिति ।

लखनऊ
माघी पूर्णिमा
२०६७ विक्रमाब्द:
१८ फरवरी, २०११ खिष्टाब्द:

(प्रो. अशोककुमारकालिया)
पूर्वकुलपति:
सम्पूर्णानन्दसंस्कृतविश्वविद्यालयस्य
वाराणसी
मानदनिदेशक:
माँ-आनन्दमयी-पौराणिकवैदिकाध्ययनानुसन्धानसंस्थानस्य,
नैमिषारण्यम्, सीतापुरम्, (उ. प्र.)

प्राक्कथन

सदा सेव्या सदा सेव्या श्रीमद्भागवती कथा ।
यस्याः श्रवणमात्रेण हरिश्चित्तं समाश्रयेत् ।।

श्रीमद्भागवत भारतीय वाङ्मय का अङ्गुलीगणनीय उज्ज्वलतम रत्नों में अन्यतम है । इसे भक्ति, ज्ञान और वैराग्य का उत्स कहा जाय, तो अत्युक्ति न होगी । यह वेदरूपी कल्पवृक्ष का एक मधुर परिपक्व फल है; क्योंकि भगवान् की मधुरतम लीलाकथाओं से ओत-प्रोत है । इसीलिए ज्ञानी भक्त, मुमुक्षु तथा संसारी सभी को यह परम प्रिय है । इसके श्रवण और पारायण से पापताप से व्याकुल चित्त को शान्ति मिलने के कारण ही भागवत-सप्ताह श्रवण, परायण आदि का जनता में जितना प्रचार है, उतना अन्य किसी पुराण का नहीं । इस पर शैव, वैष्णव, शाक्त आदि सभी सम्प्रदायों की समान आस्था है । **''विद्यावतां भागवते परीक्षा''** कहकर इसकी दुरूहता की कहावत चिरकाल से चली आ रही है ।

सुचारुरूप से भागवत प्रतिपाद्य विषयों के रहस्य को उद्घाटित करने के लिए अखिल भारतीय विद्वद्गोष्ठी का आयोजन माँ आनन्दमयी पौराणिक तथा वैदिक अध्ययन तथा अनुसन्धान, संस्थान के द्वारा दिनाङ्क ११, १२, तथा १३ दिसम्बर, २००९ को नैमिषारण्य सदृश पावन तपोभूमि पर सम्पन्न हुआ, यह हमारे लिए अत्यन्त हर्ष और गौरव का विषय है कि नैमिषारण्य में शौनकादि ऋषियों के समान अखिल भारतीय विद्वत्समुदाय न केवल उत्तर प्रदेश से अपितु मध्यप्रदेश, ओडिशा एवं हरियाणा राज्यों से उपस्थित होकर अपने शोधपत्रों का उपस्थापन कर विचार-विमर्श किया । सर्वसाधारण को सुलभ कराने के लिए उत्कृष्ट प्रपानकरसतुल्य शोधपत्रों का उपस्थापन भी अभीप्सित हुआ ।

तलस्पर्शी विद्वत्समवाय ने अपनी गवेषणा बुद्धि के द्वारा भागवत के विविध पक्षों के रहस्य को उद्घाटित करते हुए इसके दार्शनिक, साहित्यिक, सैद्धान्तिक, पौराणिक आदि विविध चिन्तन की अवधारणाओं को प्रकाश में लाया है । सुचारु रूप से भागवत-प्रतिपाद्य विषयों का निरूपण करते हुए रासलीला सदृश अनसुलझे विषयों पर भी प्रचुर प्रकाश डाला गया है । एतदर्थ सभी सहभागी विद्वान् बधाई के पात्र हैं । सभी प्रतिभागी विद्वत्समवाय को साधुवाद प्रदान कर सन्तोष का अनुभव करता हूँ ।

यद्यपि यह अखिल भारतीय विद्वत्संगोष्ठी माँ आनन्दमयी पौराणिक तथा वैदिक अध्ययन एवं अनुसन्धान संस्थान, नैमिषारण्य के उद्यम से आयोजित हुई, तथापि **राष्ट्रिय संस्कृत संस्थान, नई दिल्ली** के द्वारा वित्तीय सहायता प्रदान कर संगोष्ठी को सफल बनाने में अहंभूमिका का निर्वाह किया गया, इसलिए इसके कुलपति **प्रो. राधावल्लभ त्रिपाठी** जी का साभार अभिनन्दन करता हूँ ।

गवेषित तथ्य के व्यापक प्रचार के लिए शोध-पत्रों की भाषा संस्कृत, हिन्दी तथा अंग्रेजी को माध्यम बनाया गया है । जिससे सभी वर्ग के विद्वत्समाज, अनुसन्धित्सु विद्यार्थी तथा सर्वसाधारण जनसमुदाय भी लाभान्वित हो सकें । इससे सभी लाभ उठाकर अपने लक्ष्य की पूर्ति में सफल हो सकेंगे, ऐसी मेरी कामना है ।

गवेषित रहस्यामृत को सुरक्षित रखने के लिए ग्रन्थ का आकार देने वाले सम्पादकद्वय सम्पूर्णानन्द संस्कृत विश्वविद्यालय के साहित्यसंस्कृति संकायाध्यक्ष **प्रो० गङ्गाधर पण्डा** एवं लखनऊ विश्वविद्यालय के संस्कृत प्राकृत भाषा विभाग के आचार्य तथा अध्यक्ष **प्रो. बृजेशकुमार शुक्ल** को इस महत्त्वपूर्ण एवं गरिमामण्डित कार्य हेतु साधुवाद प्रदान करते हुए वर्द्धापन करता हूँ । अन्त में इस ग्रन्थरत्न को पुराणपुरुष के करकमलों में पुष्पाञ्जलि रूप में समर्पित करता हूँ ।

(एस. एन. शुक्ल)
(आई. ए. एस. सेवानिवृत्त)
अध्यक्ष, प्रबन्ध समिति
माँ आनन्दमयी पौराणिक वैदिक एवं
अनुसन्धान संस्थान, नैमिषारण्य
सीतापुर ।

लखनऊ
माघी पूर्णिमा,
२०६७ विक्रमाब्द
१८ फरवरी, २०११ ख्रिष्टाब्द ।

सम्पादकीय

कृष्णाय वासुदेवाय हरये परमात्मने ।
प्रणतक्लेशनाशाय गोविन्दाय नमो नमः ।। भाग.१०.७३.१६

परमकारुणिक भगवान् बादरायण व्यास के मन में ब्रह्मसूत्र, महाभारत एवं अनेक पुराणों की रचना करने के पश्चात् भी शान्ति नहीं मिली, तब उन्होंने अन्तर्मन से सोचा, तो स्वतः ही उनको उत्तर मिल गया है कि मैंने भक्तिशास्त्र की रचना नही की है ।

भारतव्यपदेशेन ह्याम्नायार्थश्च दर्शितः ।
दृश्यते यत्र धर्मादि स्त्रीशूद्रादिभिरप्युत ।।
तथापि बत मे दैह्यो ह्यात्मा चैवात्मना विभुः ।
असम्पन्न इवाभाति ब्रह्मवर्चस्यसत्तम ।।
किं वा भागवता धर्मा न प्रायेण निरूपिताः ।
प्रियाः परमहंसानां त एव ह्यच्युतप्रियाः ।।१/४/२९-३१

व्यास जी की दोलायमानचित्तवृत्ति को शान्त करने के लिए नारद जी कहते हैं कि आपने पूर्वोक्त ग्रन्थों में अधिकतर तत्त्वजिज्ञासा की है, परन्तु भगवान् के निर्मल यश का गान जिस तरह करना चाहिए, उस प्रकार नहीं किया है । जब तक भगवान् सन्तुष्ट नहीं होते हैं, तब तक शास्त्रज्ञान अधूरा होता है। आपने महाभारतादि में पुरुषार्थ का जैसा निरूपण किया है, उस प्रकार श्री कृष्ण की महिमा का निरूपण नहीं किया है । जिस स्थान पर भगवान् के यश का कभी गान नहीं होता, वह तो कौओं के लिए उच्छिष्ट फेंकने के स्थान के समान अपवित्र हो जाता है । जो भगवान् कृष्ण के चरणारविन्द का सेवक है, वह भजन न करने वाले कर्मी मनुष्यों के समान दैवात् कभी बुरा भाव हो जाने पर भी जन्म-मृत्युयुक्त संसार में पुनः नहीं आता है । वह भगवान् के चरणकमलों के आलिंगन का स्मरण करके उसे त्यागना नहीं चाहता है; क्योंकि उसमें रसग्राहकता बन जाती है।

न वै जनो जातु कथञ्चनाव्रजे-
न्मुकुन्दसेव्यन्यवदङ्ग संसृतिम् ।
स्मरन्मुकुन्दाङ्घ्र्युपगूहनं पुन-
र्विहातुमिच्छन्न रसग्रहो यतः ।। १/५/१९

तब व्यासजी ने वेद के समान भगवान् के पूर्ण चरित्र से युक्त भक्ति रस से प्लावित श्लाघनीय एवं कल्याणकारी भागवतमहापुराण की रचना की ।

इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् ।
उत्तमश्लोकचरितं चकार भगवानृषिः ।। १/३/४०

धर्म के साथ यदि मनुष्य के हृदय में भगवल्लीलारूपी भक्ति का संचार नहीं हुआ है, तो वह केवल निरर्थक श्रम है । धर्म का फल तो मोक्ष है । मोक्ष की सार्थकता अर्थप्राप्ति में नहीं है । अर्थ केवल धर्म को प्राप्त करने का साधन है । भारतीय परम्परा में भोग-विलास का कभी अर्थ को साधन नहीं माना गया है । यह ही भागवत का तात्पर्य है—

धर्मस्य ह्यापवर्ग्यस्य नार्थोऽर्थायोपकल्पते ।
नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः ।।१/२/९

वर्णाश्रम परम्परा में अपना कर्त्तव्य करते हुए मनुष्य जो धर्म का अनुष्ठान करता है, उसका एकमात्र उद्देश्य है भगवान् की प्रसन्नता । इसीलिए भागवत का उद्‌गार है कि—**तस्मात् केनाप्युपायेन मनः कृष्णे निवेशयेत्** ७/१/३१ । मन को कृष्ण में लगाने के लिए नवधा भक्ति की व्यवस्था की गयी है, जिसमें कृष्ण ही श्रोतव्य, मन्तव्य निदिध्यासितव्य हैं—

तस्मादेकेन मनसा भगवान् सात्वतां पतिः ।
श्रोतव्यः कीर्तितव्यश्च ध्येयः पूज्यश्च नित्यदा ।।१/२/१४

भगवान् को तो किसी न किसी भाव से पाना है, इसका उपाय जो भी हो । देखा जाय जय एवं विजय वैकुण्ठ में भगवान् के पार्षद थे । सनत्कुमारों के शाप से तीन जन्म तक उन्हें राक्षस योनि में जाना पड़ा । सत्ययुग में हिरण्यकशिपु एवं हिरण्याक्ष, त्रेता में रावण एवं कुम्भकर्ण तथा द्वापर में शिशुपाल एवं दन्तवक्त्र के रूप में द्वेष करके भगवान् के द्वारा मुक्त हुए । इसी प्रकार कंस भय से, यदुवंशी पारिवारिक सम्बन्धों से, गोपियाँ स्नेह से एवं मुनि-ऋषिगण भक्ति से भगवान् को प्राप्त करते हैं । इसीलिए नारद जी कहते हैं—

कामाद् द्वेषाद् भयात्स्नेहाद् यथा भक्त्येश्वरे मनः ।
आवेश्य तदघं हित्वा बहवस्तद्‌गतिं गताः ।।
गोप्यः कामाद् भयात्कंसो द्वेषाच्चैद्यादयो नृपाः ।
सम्बन्धाद् वृष्णयः स्नेहाद् यूयं भक्त्या वयं विभो ।।

भाग. ७/१/२९-३०

श्रीमद्भागवत के सम्बन्ध में एक प्रसिद्धि है कि यह सभी ग्रन्थों का सिरमौर है एवं समस्त शास्त्र किसी न किसी प्रकार से इसमें वर्णित हैं—

धनञ्जये हाटकसम्परीक्षा
रणाजिरे शस्त्रभृतां परीक्षा ।
विपत्तिकाले गृहिणीपरीक्षा
विद्यावतां भागवते परीक्षा ।।

यह युक्ति इसीलिए चरितार्थ है कि चार वेदों के बाद पञ्चम वेद के रूप में अनेक शास्त्रों की मान्यता है । महाभारत की महिमा के अनुसार उसे पञ्चम वेद के रूप में स्वीकार करते हैं । नाट्यपरम्परा के मनीषी 'नाट्यशास्त्र' को, अलङ्कारशास्त्र की परम्परा के अनुसार साहित्य को पञ्चमवेद रूप में मानते हैं । परन्तु **'इतिहासपुराणाभ्यां वेदं समुपबृंयेत्'** को दृष्टि में रखते हुए, पुराणवाङ्मय की विशालता को ध्यान में रखकर उसे विश्वकोश के रूप में स्वीकारना ही पड़ेगा । अत: भागवतकार उसे पञ्चम वेद के रूप में महनीय स्थान देते हैं । अन्य पुराण भी उसे स्वीकार करते हैं ।

ऋग्यजुःसामाथर्वाख्या वेदाश्चत्वार उद्धृताः ।
इतिहासपुराणं च पञ्चमो वेद उच्यते ।। १/४/२०

वल्लभाचार्य भागवत की भाषा को समाधिभाषा मानते हैं; क्योंकि यह भाषा ब्रह्मानन्दमयी है । इससे अतिरिक्त श्रीमद्भागवत में समस्त भारतीय वेदान्त वर्णित हैं । शङ्कर के अद्वैतवेदान्त के अनुसार श्रीधरस्वामी ने अद्वैतपरक व्याख्या, पदरत्नावली में विजयध्वज ने द्वैतपरकव्याख्या, क्रमसन्दर्भ में जीवगोस्वामी ने अचिन्त्यभेदाभेद सम्प्रदाय की व्याख्या, शुकदेव ने सिद्धान्तप्रदीप में निम्बार्कपरम्परा की द्वैताद्वैत व्याख्या एवं वल्लभाचार्य ने शुद्धाद्वैत सम्प्रदाय को दृष्टि में रखकर श्रीमद्भागवत की व्याख्या की है । इसी प्रकार विभिन्न परम्पराओं के अनुसार अनेक टीका एवं ग्रन्थ भागवत पर होने से इसकी शास्त्रीय प्रौढ़ी एवं लोकप्रियता स्वयंसिद्ध है ।

इसी प्रकार ज्ञान-वैराग्य सहित भक्ति के कण को वितरित करके श्रीमद् भागवतमहापुराण जगत् का महान् उपकार किया है । इसको दृष्टि में रखते हुए श्री माँ आनन्दमयी संघ द्वारा परिचालित माँ आनन्दमयी पौराणिक तथा वैदिक अध्ययन एवं अनुसन्धान संस्थान, नैमिषारण्य, सीतापुर, उ. प्र. द्वारा एक त्रिदिवसीय अखिल भारतीय संगोष्ठी का आयोजन करने हेतु निर्णय लिया गया, जिसे सफलता प्रदान करने हेतु राष्ट्रिय संस्कृत संस्थान, नई दिल्ली द्वारा

आर्थिक सहायता प्रदान अत्यन्त सराहनीय है । संगोष्ठी की फलश्रुति के रूप में विवेचित निबन्धों को ग्रन्थ रूप में प्रकाशित करने का निर्णय लिया गया । उक्त ग्रन्थ में प्रबन्ध समिति के अध्यक्ष **श्रीसत्यनारायण शुक्ल** सेवानिवृत्त आइ. ए. एस. ने प्राक्कथन एवं उक्त संस्थान के मानदनिदेशक एवं सम्पूर्णानन्द संस्कृत विश्वविद्यालय, वाराणसी के पूर्व कुलपति **प्रो. अशोक कुमार कालिया** ने पुरोवाक् लिखकर इसे महिमामण्डित किया है । हम उन दोनों महानुभावों को विशेष रूप से आभार व्यक्त करते हैं । देश के विभिन्न प्रान्तों से जो विद्वद्गण नैमिषारण्य जैसे ग्रामीण परिवेश में पधार कर असहनीय शीत के प्रकोप को सहकर अपने शोधपत्रों का वाचन किये, उनको हम हार्दिक धन्यवाद देते हैं । संघ के उपाध्यक्ष पूजनीय **पानू ब्रह्मचारी** ने हमें उत्साह दिया है एवं संस्थान के सचिव **प्रो. एस. एन. भट्टाचार्य** ने हमें पूर्ण सहयोग प्रदान किया । ग्रन्थ सम्पादन में सम्पूर्णानन्द संस्कृत विश्वविद्यालय के प्रकाशन संस्थान में पूर्व सहायक सम्पादक **डॉ. ददन उपाध्याय** ने हमारी सहायता की है । रमा-कम्प्यूटर के संचालक श्री **प्रवीण चन्द्र उपाध्याय** ने संगणक द्वारा शुद्धतापूर्वक शीघ्र अक्षरसंयोजन कर ग्रन्थ का स्वरूप प्रदान किया है एवं रेनबो प्रिण्टर्स के संचालक **श्री रविशंकर पण्ड्या** ने सुन्दर स्वच्छ मुद्रण कार्य किया है। उन सबको हम कृतज्ञता ज्ञापित करते हुए साधुवाद देते हैं ।

वसन्त पञ्चमी
वि. सं. २०६७
८ फरवरी, २०११ ।

प्रो. गङ्गाधर पण्डा
प्रो. बृजेशकुमार शुक्ल
सम्पादक

विषयसूची

क्रम.	विषयः/लेखकश्च	पृ.सं.
	संस्कृतम्	
१.	**निगमकल्पतरोर्गलितं फलम्** प्रो. बिन्दाप्रसादमिश्रः	१
२.	**पिबत भागवतं रसमालयम्** प्रो. रहसविहारीद्विवेदी	६
३.	**टीकासु श्रीधरीटीका विष्णुवैष्णवसम्मता** डॉ. श्यामवापटः	१०
४.	**श्रीमद्भागवतेऽद्वैतपरिशीलनम्** डॉ. हरिप्रसाद-अधिकारी	१९
५.	**श्रीमद्भागवते षोडशकलाविशिष्टः श्रीकृष्णः** डॉ. भगवतशरणशुक्लः	२४
६.	**श्रीमद्भागवतबौद्धधर्मयोः कर्मवादविमर्शः** डॉ. धर्मदत्तचतुर्वेदी	३५
७.	**माघकाव्योपरि श्रीमद्भागवतस्य प्रभावः** डॉ. सूर्यमणिरथः	४५
८.	**श्रीमद्भागवते दार्शनिकचिन्तनस्यावधारणा** डॉ. रामसुमेरयादवः	५२
९.	**भागवते भक्तिस्वरूपम्** डॉ. महेशझाः	५७
१०.	**श्रीमद्भागवतमहापुराणस्योत्कलीयं स्वरूपम्** डॉ. प्रमोदिनी पण्डा	६६
११.	**श्रीमद्भागवते पर्यावरणम्** डॉ.मखलेशकुमारः	७१
१२.	**श्रीमद्भागवते साधारणधर्मः** डॉ. विश्वनाथस्वाइँ	७८
१३.	**श्रीमद्भागवते शिवतत्त्वम्** डॉ. ददन उपाध्यायः	८३
१४.	**श्रीमद्भागवते क्रीडाप्रसङ्गाः** श्री अशोककुमारपाण्डेयः	९४
१५.	**श्रीमद्भागवतमहापुराणतत्त्वविमर्शः** ब्रह्मचारिणी गीता बनर्जी	९८

हिन्दी

१६. कल्पवृक्ष से टपका हुआ मधुर फल — १०५
प्रो. ओमप्रकाश पाण्डेय
१७. रासपञ्चाध्यायी में शृङ्गाराद्वैतविमर्श — १११
प्रो. बृजेश कुमार शुक्ल
१८. वर्णाश्रम धर्म की रूपरेखा भागवत में — १४१
डॉ. (श्रीमती) सुधा गुप्ता
१९. भक्ति का स्वरूप : भागवत परिप्रेक्ष्य — १५३
डॉ. प्रतिभा शुक्ला
२०. श्रीमद्भागवत पुराण में माया की अवधारणा — १५९
डॉ. मंजूलता शर्मा
२१. श्रीमद्भागवत पुराण में दार्शनिक सिद्धान्त — १६७
श्रीमती सुरचना त्रिवेदी
२२. श्रीमद्भागवतपुराणान्तर्गत सांख्ययोग की अवधारणा — १७२
डॉ. गीता शुक्ला
२३. श्रीमद्भागवत पुराण में सृष्टितत्त्व — १८१
डॉ. रीना अस्थाना
२४. भागवत में कालगणना — १८६
डॉ. सोमप्रकाश पाण्डेय
२५. भागवत में कालगणना — १९१
श्री मृत्युञ्जय त्रिपाठी
२६. श्रीमद्भागवत पुराण के गीतों का वैशिष्ट्य — १९९
प्रो. प्रयागनारायण मिश्र
२७. श्रीभागवत महापुराण में लोककल्याण की अवधारणा — २१३
डॉ. महेन्द्र वर्मा
२८. श्रीमद्भागवतमहापुराण में वर्णाश्रमधर्म निरूपण — २१७
डॉ. सरोज कुमार शुक्ल
२९. श्रीमद्भागवत पुराणोक्त मन्वन्तरकाल की ज्योतिषीय विवेचना — २२२
श्री अनिल कुमार पोरवाल

English

30. Śrīmadbhāgavata : A linguistic Study — 230
Prof. K. C. Dubey
31. Śrīmadbhgāvatapurāṇa-- An Exposition of the Brahmasūtra — 236
Sanghamitra Basu
32. Śrīmadbhāgvata : Some observation — 244
Prof. Prabhat Kumar Pandey

निबन्धास्तत्प्रस्तोतारश्च — २४९

निगमकल्पतरोर्गलितं फलम्

प्रो. बिन्दाप्रसादमिश्रः

❁❁❁

निगमश्चासौ कल्पतरुरिति निगमकल्पतरुः, तस्येति निगमकल्पतरोः। निगमो नाम वेदः। वेदस्तु ब्रह्ममुखनिर्गतधर्मज्ञापकशास्त्रम्[१]। अपौरुषेयं वाक्यं वेदः। स च विधिमन्त्रनामधेयनिषेधार्थवादभेदात् पञ्चविधः[२]। 'तत्राज्ञातार्थज्ञापको वेदभागो विधिः। प्रयोगसमवेतार्थस्मारका मन्त्राः। नामधेयानां च विधेयार्थपरिच्छेदकतयार्थवत्त्वम्। पुरुषस्य निवर्तकं वाक्यं निषेधः। प्राशस्त्यनिन्दान्यतरपरं वाक्यमर्थवादः[३]। सायणाचार्यस्यापि वेदेऽभिमतं निरीक्ष्यतां तावत्—'इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः'। अपि च 'प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते। एनं विदन्ति वेदेन तस्माद् वेदस्य वेदता[४]॥ इत्थं वेदस्य धर्मे तात्पर्यं ज्ञायत एव। तथा हि—'वेदस्य सर्वस्य धर्मतात्पर्यवत्त्वेन धर्मप्रतिपादकत्वात्'[५]। तर्हि को धर्मः ? किं तस्य लक्षणमिति चेत्, तदुच्यते—'यागादिरेव धर्मः। तल्लक्षणं वेदप्रतिपाद्यः प्रयोजनवदर्थो धर्म इति[६]। अनेन प्रकारेण निगमो नाम यागादिप्रयोजनवदर्थप्रतिपादको वेदोऽखिलो धर्ममूलमस्तीति प्रकटितम्।

कल्पतरुरिति कल्पप्रधानः तरुः कल्पतरुः, अथवा कल्पस्य तरुः कल्पतरुः। कल्पशब्दः कोशेषु बह्वर्थवाचको निर्दिष्टो वर्तते। यथा—कल्पो विधिः, कल्पः कल्पना, कल्पः संरचना, कल्पः प्रलयः, कल्पः समर्थः, कल्पः तुल्यश्चेति। प्रसङ्गतः तेषु त्रयाणामत्र ग्रहणं क्रियते। तस्माद् विधितरुः, कल्पनातरुः, समर्थतरुश्चेति प्रमुखप्रासङ्गिकार्था ग्राह्याः कल्पतरुशब्दादिति। इत्थं निगमो नाम यो वेदः स यज्ञभूतधर्मविधिविधायको विविधशाखादिमान् विधितरुः, स वै 'स्वर्गकामो यजेत'

---

१. हलायुधकोशः—'वेदः' इति निर्वचने।
२. लौगाक्षिभास्करः—अर्थसंग्रहः—विभागः-१२।
३. तदेव-विभागः-१३,६१,६७,७५,८६।
४. ऐतरेयब्राह्मणः—सायणभाष्यम्—प्रथमपृष्ठे।
५. लौगाक्षिभास्करः—अर्थसंग्रहः—विभागः-५।
६. तत्रैव, तदेव-विभागः-४।

इत्यादिना स्वर्गादिककल्पनावत्त्वात् कल्पनातरुः, स च लोकव्यवहारप्रवर्तनाय शक्तिमत्त्वात् समर्थतरुरिति कल्पतरुपदेन विधीयते। अत्र भगवता व्यासेन निगमस्य निजाभिमतं लक्षणमपि विहितमिति मन्ये। तत्तु 'निगमकल्पतरुः' इत्यस्य योगविभागेन ज्ञायते। निगमः कल्पतरुरिति। अर्थाद् वेदः कल्पतरुरस्ति। इदं वेदस्य लक्षणं सूत्रवद् वर्तते। अतिसङ्क्षिप्ते चास्मिन् लक्षणेऽर्थगाम्भीर्यं परिलक्ष्यते।

अत्र तरुशब्देन कल्पस्य विशालता, कठिनता दुरूहता, रुक्षता च प्रकाश्यते। कल्पतरुभूतस्य वेदस्य विशालता कठिनतादि तस्य नितान्तनिष्ठुरनानाशाखात्वात् सिध्यति। वेदस्य विविधाः शाखाः सन्ति। यथा हि महर्षिपतञ्जलिना वेदस्य विशालतां प्रतिपादयतोक्तम्—'चत्वारो वेदाः साङ्गाः सरहस्या बहुधा भिन्नाः—एकशतमध्वर्युशाखाः, सहस्रवर्त्मा सामवेदः, एकविंशतिधा बाह्वृच्यं, नवधाऽऽथर्वणो वेदः' इति[१]। एतस्माद् अनेकशाखाभेदाद् वेदभूतस्य कल्पस्य विशालतरुता गोचरीभवति। कल्पतरोर्महनीयता च 'सङ्कल्पस्य दाता वृक्षः' इति कृत्वाऽपि प्रसिद्धास्ति। अतः स कल्पवृक्षो देवतरुरित्युच्यते। यतो हि दानाद् देव इति। सर्वं चिन्तितं भोग्यं तस्मात् कल्पवृक्षात् प्राप्यते। तथा हि चोक्तम्—

नमस्ते कल्पवृक्षाय चिन्तितान्नप्रदाय च।
विश्वं भराय देवाय नमस्ते विश्वमूर्तये[२]॥

अत्र चिन्तितान्नेन योम्ये तात्पर्यं वर्तते। ऐह्यलौकिकपारलौकिकभोग्योपब्धि-कारकत्वात् तस्य वेदस्य कल्पतरुत्वं यागादिभिः स्वतः प्रमाणितं भवति। एष अभिप्रायः श्रीधराचार्यस्य निर्वचनेऽपि निगूढः। तथा हि—'निगमो वेदः स एव कल्पतरुः सर्वपुरुषार्थोपायत्वादिति[३]। निगम इति। नितरां गच्छन्त्यत्र[४]। किन्तु नियमेन विधिना गच्छतीति निगमः, विधिप्रधानो वेद इत्यस्मिन् प्रसङ्गेऽभिसन्धानम्।

वेदस्तु विदन्ति अनेन धर्मं यागादिकमिति व्याख्याबलेन वेदो निगमार्थः, आगमार्थश्चेति प्रसिद्धम्। किन्तु व्यवहारे प्रायः निगमशास्त्रमन्यद् भवति तथा च आगमशास्त्रमन्यदिति मान्यता प्रथितास्ति। तत्त्वतः निगमागमयोरभेदो वर्तते श्रुतित्वात्। श्रुतिश्च वेदः एव[५]। अतः निगमागमात्मकं लोके यज्ज्ञानं प्रसूतं वर्तते तत् सर्वं निगमागमवेदश्रुतिशब्दवाच्यं भवितुं शक्नोति। 'आगमोऽपि वेदः, निगमोऽपि वेदः'[६] इति तथा 'इदानीं श्रोतृप्रवर्तनाय श्रीभागवतस्य काण्डत्रयविषयेभ्यः सर्वशास्त्रेभ्यः

---

१. महाभाष्यम् (१.१ पस्पशाह्निकम्)।
२. हलायुधकोशे 'कल्पवृक्षः' इति चिन्तनप्रसङ्गे दानसागरे-१३५।
३. श्रीमद्भागवतम् (१.१.२) श्रीधरी टीका।
४. हलायुधकोशे—निगमशब्दस्याख्याने।
५. हलायुधकोशः—वेदः श्रुतिश्चेति निर्वचने।
६. तदेव—आगमनिगमनिर्वचने।

श्रैष्ठ्यं दर्शयति'[१] चेति श्रीधरस्वामिना प्रतिपादितत्वाद् वेदः 'सर्वशास्त्रः' इति मन्ये ।

इत्थंभूतस्य निगमकल्पतरोर्गलितं परिपक्वं फलं यत् किञ्चिदस्ति तत्तु भागवतं नामेति । तथा हि प्रोक्तं भगवता व्यासेन—

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः[२] ।।

यद्यपि निगमकल्पतरोर्वेदस्य फलं त्वग्निहोत्रादिकं भवति । तथा हि—

अग्निहोत्रफला वेदा दत्तभुक्तफलं धनम् ।
रतिपुत्रफला दाराः शीलवृत्तिफलं श्रुतम्[३] ।।

परन्तु भगवता व्यासेन वेदस्य परिपक्वं फलं यदि भवितुं शक्नोति, तदन्यत्तु नहि किमप्यस्ति, अपि तु भागवतं नाम तदिति समुद्घोषितम् । तत्फलं तु गलितात् सरससरसं मधुरमधुरं काठिन्यदोषविधुरं केवलं रसमिति चास्ति । तस्मिन् फले किमपि कठिनीभूतहेयतत्त्वं त्वगष्ठ्यादिकं न वर्तते । तत्तु किमप्यमृतद्रवसम्पन्नं निखिलं रसभूतं विलक्षणं फलं भुवि सर्वजनहिताय शुकमुखात् सप्रयोजनं निर्गलितमिति भागवतस्वरूपमिति । अत्र रस इति परमतत्त्वरूपेणाङ्गीकृतः । 'रसो वै सः' । 'रसं ह्येवायं लब्ध्वानन्दी भवति'[४] इति श्रुतेः रसः परमतत्त्वमिति । परमतत्त्वं तु नहि केनचिज्जातिधर्मेणावृतम् । तत्तु सर्वसुलभं भगवत्तत्त्वमिति । तदेव भागवते साकाररूपेण विराजते । तस्य नाम 'कृष्णः' इति । 'कृष्णस्तु भगवान् स्वयम्'[५] इति भागवतकारेणोद्घोषितम् । अपि च तेन भागवतं ब्रह्मवदिति निर्दिष्टम्—'इदं भागवतं नाम पुराणं ब्रह्मसम्मितम् ।'[६] अत एव भागवते यन्निहितं तद् हि भागवतभूतः प्रोज्झितो निर्मलः परमधर्म एवास्ति । स धर्मः सर्वथा कैतवविधुरोऽस्ति । तथा हि प्रोक्तं भगवता व्यासेन—

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।
श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्[७] ।।

श्रीमद्भागवतेऽत्र परमो धर्मः प्रतिपादितो वर्तते । परमश्चासौ धर्मः परमधर्मः । परमेति । चरमः, श्रेष्ठः । परो मीयतेऽनेनेति स परमो धर्म इति । अपि च अत्रपाः विगतव्रीडाः शुकसनकादयः तान् रमयति यो धर्मः सोऽप्यत्र परम इति ज्ञेयम् ।

---

१. श्रीमद्भागवतम् (१.१.२) श्रीधरीटीका ।
२. तदेव (१.१.३) ।
३. हलायुधकोशः—'फलम्' इत्यत्र वह्निपुराणवचनम् ।
४. तैत्तरीयोपनिषद्—ब्रह्मानन्दवल्ली—सप्तमोऽनुवाकः ।
५. श्रीमद्भागवतम्—(१.३.२८) ।
६. तदेव (१.३.४०) ।
७. तदेव (१.१.२) ।

अर्थादलं विस्तरेण भगवतः श्रीकृष्णस्य आराधनभूतो भक्तिधर्मः, परमधर्मत्वेनात्र स्वीक्रियते। आराधना श्रेष्ठस्य विधीयते। श्रीकृष्णस्तु परं ब्रह्मेति। अतः श्रीकृष्णात् परं श्रेष्ठतत्त्वमन्यन्नास्ति। तदेव विज्ञाय मधुसूदनसरस्वतीपरिव्राजकेनापि बलादुद्घोषितम्—

वंशीविभूषितकरान्नवनीरदाभात्
पीताम्बरादरुणबिम्बफलाधरोष्ठात्।
पूर्णेन्दुसुन्दरमुखादरविन्दनेत्रात्
कृष्णात् परं किमपि तत्त्वमहं न जाने[१] ॥

श्रीकृष्णस्तु भगवद्भूतो परं ब्रह्मेति ब्रह्मवैवर्तपुराणवचनम्—

परमात्मा परं ब्रह्म निर्गुणः प्रकृतेः परः।
कारणं कारणानां च श्रीकृष्णो भगवान् स्वयम्[२] ॥

अतः भगवत्कृष्णसम्बन्धिशुश्रूषाभूतधर्मो भागवतधर्मः परमधर्मत्वेन वर्तते। यस्मिन् प्रकर्षेणोज्झितं त्यक्तं निरस्तं परिमार्जितं वा कैतवं वेदविहितस्वर्गादिफलानुभूतिलक्षणं कपटं छलं छद्मं वेति स तथाभूतो ज्ञानलक्षणो धर्मो भागवतधर्म इति। स धर्मः सर्वथा निर्मत्सराणां कपटद्वेषादिविधुराणां सत्पुरुषाणां परमात्मभावात्मकभक्तिप्रधानो वर्तते। स एव केवलं भगवत्कृष्णाराधनलक्षणो धर्मः श्रीमद्भागवते परमप्रतिष्ठितोऽस्ति। स एव भागवतरसः। स रसः पुराणेऽस्मिन् श्रीकृष्णकथानकात्मको वर्तते। स तु कृष्णप्रियो भक्तिविलासकारीति। अतः मुक्त्येकहेतुः स इति। तस्मात् क्लेशकरीं तीर्थपरिशीलनसेवामपि विहाय लोके सर्वप्रकारेण चात्मोद्धाराय कृष्णकथानकात्मक-भक्तिरसमादरेण पानीयमिति। यथा—

कृष्णप्रियं सकलकल्मषनाशनं च
मुक्त्येकहेतुमिह भक्तिविलासकारि।
सन्तः कथानकमिदं पिबतादरेण
लोके हि तीर्थपरिशीलनसेवया किम्[३] ॥

श्रीमद्भागवते दैहिकदैविकभौतिकतापत्रयनाशकं सर्वदा सर्वथा च शिवदं कल्याणप्रदं वास्तवं वस्तु च वेद्यं भवति। वस्तु हि परमतत्त्वम्। वस्तुनः परमतत्त्वस्यांशो जीवः, वस्तुनः शक्तिर्माया, वस्तुनः कार्यमिदं जगद् वै। तत् सर्वं वस्तुनः इदं वास्तवमिति कृत्वा 'तस्येदम्'[४] इत्यनेन कल्प्यते। वास्तवश्च वास्तवी च वास्तवं चैतेषामेकवद्भावाद् 'वास्तवमिति' 'नपुंसकमनपुंसकेनैकवदन्यतरस्याम्'[५] इति। भगवता व्यासेन समुद्घोषितम्—भागवतधर्मसेवनाद् ईश्वरः सद्य एव हृदयेऽवरुध्यते। परैः शास्त्रैः कैतवपूर्णैर्निगमादिभिः किं प्रयोजनमिति। तैस्तु धर्मकामार्थमोक्षाणां प्राप्तिः

१. श्रीमद्भगवद्गीता- (१८.७८) गूढार्थदीपिका-मङ्गलाचरणम्-१।
२. हलायुधकोशे 'परमात्मा' इति निर्वचने।
३. श्रीपद्मपुराणे—उत्तरखण्डे—श्रीमद्भागवतमाहात्म्ये (६.९८)।
४. अष्टाध्यायी (४.३.१२०)।
५. तदेव (१.२.६९)।

काठिन्येन जायते। भागवतेन तु तेषां प्राप्तिः श्रवणादिना सुकरतया भवति। अपि च तेन परं तत्त्वं रसो वै स वैकुण्ठस्थः श्रीकृष्णो गोपीवल्लभोऽपि लभ्यते। यथा हि—

फलदं स्यात् पुराणं तु श्रीमद्भागवतं शुभम्।
धर्मकामार्थमोक्षाणां साधनं स्यान्न संशयः॥
श्रीमद्भागवतेनैव भुक्तिमुक्तिकरे स्थिते।
श्रवणं सर्वधर्मेभ्यो वरं मन्ये तपोधनाः।
वैकुण्ठस्थो यतः कृष्णः श्रवणादस्य लभ्यते[१]॥

इत्थं यतो हि निगमकल्पतरोः परिपक्वं रसं फलं भागवतमिति प्रोज्झितकैतवधर्मवत्त्वात्। अतो नूनमेव भागवतं कठिनत्रिकाण्डात्मकधर्मप्रतिपादकवेदात् स्वरूपतो निजमधुररसितधर्मेण भिद्यते। भागवते मधुररसितधर्म एव भक्तिः। भक्तिरेव भागवतधर्मः। भक्तिसङ्कल्पकभगवद्धर्मे किमपि काठिन्यं न वर्तते। वेदप्रतिपाद्यो यागादिधर्मः क्लेशेन संसाध्यते। तत्र वेदे बहुकठिनो गहनश्च कर्मकाण्डप्रकारः। स च नैव सर्वजनीनो नैव च सर्वसुकरः। किन्तु वेदस्य कठिनकल्पतरोः फलभूता या भागवती सेवाकथा भक्तिः सा कलौ सर्वसुकरा सर्वजनीना जातिधर्मविगलिता कालक्रमसाधनभेदरहिता चास्ति। तया भक्त्यैव ऐह्यलौकिकं पारलौकिकं च सर्वं सुखं कलिजनैः सुखेन प्राप्यते। अतो लोके भागवती भक्तिः सर्वभवव्याधिविनाशिनी वर्तते। तस्माच्च हिंसाप्रधानयागादिकुपथधर्मसेवनेन किमधिकं भवेदिति। सर्वं च तत् तद् गर्हितं धर्मं त्यक्त्वा क्षेमाय भागवतं भावेन भजेत। तथा हि—

असारे संसारे विषयविषसङ्गाकुलधियः
क्षणार्धं क्षेमार्थं पिबत शुकगाथातुलसुधाम्।
किमर्थं व्यर्थं भो व्रजत कुपथे कुत्सितकथे
परीक्षित्साक्षी यच्छ्रवणगतमुक्त्युक्तिकथने[२]॥

अपि च भागवतधर्मेण भक्त्या हरिः श्रीकृष्णः साध्यते—

न तपोभिर्न वेदैश्च न ज्ञानेनापि कर्मणा।
हरिर्हि साध्यते भक्त्या प्रमाणं तत्र गोपिका[३]॥

यदि भक्त्या परमतत्त्वं हरिं प्राप्तुं शक्यते तदा संसारेऽस्मिन् सेवाधर्मेण किं किं सिद्धं न भवेदिति भक्तिप्रधानभागवतस्य सन्देशो वर्तते।

●

---

१. श्रीपद्मपुराणे—उत्तरखण्डे—श्रीमद्भागवतमाहात्म्ये (६.६८,६९,७६)।
२. तदेव (६.१००); ३. तदेव (२.२०)।

पिबत भागवतं रसमालयम्

प्रो. रहसविहारीद्विवेदी

❁❁❁

किं पिबत ? भागवतं रसम्। किं नाम भागवतम् ?

श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां धनं
यस्मिन् पारमहंस्यमेकममलं ज्ञानं परं गीयते ।
तत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं
तच्छृण्वन् विपठन् विचारणपरो भक्त्या विमुच्येन्नरः ।।
(श्रीमद्भा.१२.१३.१८)

किं नामा भागवतो रसः ? शुकमुखादमृतद्रवसंयुतं निगमकल्पतरोर्गलितं फलम् (तत्रैव १.१.३) । तं हि रसम्, आजीवनं (लयपर्यन्तं) पिबत । भागवतरसो (भक्तिरसो वा) कथमनुभूयते ? अस्योत्तरं ददता मया स्वकीयया प्रकाश्यमानायां नव्यकाव्यतत्त्वमीमांसायामेवं प्रत्यपादि—

देवेऽनन्या रतिः स्थायी विभावश्चेष्टभावना ।
उद्दीपनं प्रभोर्मूर्त्तिर्भक्तश्चालम्बनं मतः ।।
अनुभावश्च भक्तस्य प्रणतीत्यादिकाः क्रियाः ।
रोमाञ्चादिश्च सञ्चारी हेतुर्देवे समर्पणम् ।।
गोस्वाम्यादिमते चैवं देवभक्तिरसोऽश्नुते ।
मम्मटादिमते भक्तिर्भाव इत्यभिधीयते ।।
श्रीमद्भागवते किन्तु भक्तेः प्रामुख्यदर्शनात् ।
नूनं भक्तिरसो मान्यः स्यादिति युक्तिसङ्गतम् ।।
इयं भगवती भक्तिस्त्रिधा प्रायो विलोक्यते ।।
विशुद्धा कर्ममिश्रा च ज्ञानमिश्रेति भेदतः ।।
परमानन्दरूपो हि प्रतिबिम्बत्वमागतः ।

भगवानेकभावेन रसतामेति हृद्गतः ।।
भावात्मा भगवान् नूनं भावेनैवोपलभ्यते ।
लीला भगवतः सेयं तद्रूपैवानुभूयते ।।
रसो रसवतां भाति हृदि नित्यं प्रतिष्ठितः ।
रसः सत्तात्मकः स्थायी भावक एव राजते ।।
कृष् शब्दार्थः सदानन्दो णकारार्थो रसात्मकः ।
तेन कृष्णः सदानन्दो मान्यो नात्र संशयः ।।
त्रिकालबाधिता सत्ता ह्यानन्दो निरुपाधिकः ।
स्थायिरसरूपोऽयं कृष्णोऽन्तर्भवतीति सः ।।
भगवान् स्वामिनीयुक्त एव पूर्णरसात्मकः ।।
आलम्बनविभावो वै द्वयोः संयोगसाधितः ।।
सच्चिदानन्दरूपश्रीकृष्णो ब्रह्मपरात्परः ।
गूढस्त्रीभावभावात्मा स्वामिनीहृदयस्थितः ।।
स्थायिभावात्मकः सोऽयं लीलारूपफलात्मकः ।
एवं भक्तिरसः साध्यः देवभक्तिसमन्वितः ।।

मम्मटादयो भक्तिं भावं मन्वते । श्रीमद्भागवते रामचरितमानसे च भक्तिरसस्य परिपाको निभाल्यते । अतोऽयं रसः स्वीकरणीय एव । वेदोऽखिलो धर्ममूलमिति कृत्वा निगमकल्पतरुत्वं तु सर्वत्रानुभूयते । सेयं प्रेमाम्बुधारामयी भक्तिः, कर्ममिश्रा, ज्ञानमिश्रा विशुद्धा चेति नानाप्रवाहान् तन्वाना चरमपरमपञ्चमपुरुषार्थरूपेति भावुकशिरोमणयः, तत्त्वसाक्षात्काररूपेति श्रीमद्भगवच्छ्रीशङ्कराचार्यपादाः, **रसो वै सः, रसं ह्येवायं लब्ध्वा आनन्दी भवतीति** श्रुतिः । अखिलमेव जगदिदं वर्तमानमतीतं भविष्यद्वा ब्रह्मैव । द्व एव ब्रह्मणो रूपे मूर्तममूर्तं च । तच्च ब्रह्म सत्-चिद्-आनन्दमयञ्च । श्रीमद्भागवतमाहात्म्ये पद्मपुराणं (१.१) वक्ति—

सच्चिदानन्दरूपाय विश्वोत्पत्त्यादिहेतवे ।
तापत्रयविनाशाय श्रीकृष्णाय वयं नुमः ।।

जाते जगति वाल्मीकौ कविरित्यभिधाऽभवत् । कवीति ततो व्यासे......।' इत्यभ्युक्त्या व्यासोऽपि कविः । श्री [illegible]गवतं पुराणं सदपि काव्यम् । काव्यलक्ष्मदिशा तत्पद्यानि प्रमाणमत्र । स्वामिना करपात्रेण सरस्वतीहरहरिहरानन्देन 'भक्तिरसार्णव' इति ग्रन्थो व्यलेखि ।

तस्मिन् तेन भक्तिरसस्य सप्रमाणं स्थापना कृता— 'रसस्वरूपविमर्शो भक्तिरसश्चेत्यध्याये । मनीषिणः प्रार्थ्यन्ते यद्भक्तिरसविषयकं मतं स्फुटीकर्तुं तं

ग्रन्थमवश्यं पठन्तु। अस्य ग्रन्थरत्नस्य जमनिकायां काशीसुमेरुपीठाधीश्वरजगद्गुरु-शङ्कराचार्यपादाः श्रीमहेश्वरानन्दसरस्वतीमहाशयाः (पूर्वाश्रमे काशीहिन्दूविश्वविद्यालयस्य साहित्यविभागाचार्याध्यक्षाः पण्डितप्रवरमहादेवशास्त्रीतिनामानः) वदन्ति—'शब्दार्थोभयलङ्कारालङ्कृतदोषकदम्बकपङ्कातङ्कचुम्बितविभावानुभावसञ्चारिनिकरवृत्ति व्यञ्जनाभिव्यज्यमाननिरावरणचैतन्यानन्दतुन्दिलविभावानुभावसञ्चारिसंवलितरत्यादिगुण-प्रगुणितस्थायिभावरसरूपेति सहृदयश्लाघ्याः पण्डितराजप्रभृतयः साहित्यसौहित्याः, महान्तो मधुसूदनसरस्वतीप्रमुखा दार्शनिकाश्च।' पुनश्च तेषामत्र पद्यात्मकं कथनमेवं वरीवर्ति—

तदेतत्सौन्दर्यं मधुरमधुरं दोषविधुरं
समग्राङ्गोपाङ्गं कविकुलमलक्षालनपरम्।
सहस्रैर्भूतानामपि जननजातैरसुलभं
कृपासिन्धोरेकप्रबलकरुणाप्राप्यममलम्॥

एवमष्टपद्यैः काव्यरसादिविषयकं स्वमतं प्रकटीकृत्य चान्ततस्ते करपात्रस्वामिनो ग्रन्थविषये प्रणिगदन्ति—

अवेद्ये प्राकाश्य व्यवहृतिसमर्हत्वसुभगे
परब्रह्मानन्देस्वथ च सगुणे सुन्दरहरे।
परे कारुण्याब्धौ निभृतमतयो भक्तिसरसाः
कृतार्था भूयासुस्तदिह यतिवर्या व्यवसिताः॥

एवं साहित्यशास्त्रविदांवराणां पण्डितमहादेवशास्त्रिणामभ्युक्तिः करपात्रस्वामिनो भक्तिरसप्रतिष्ठापकं ग्रन्थं प्रति विद्यते।

श्रीमद्भागवते समग्रवस्तुविन्यासदिशा विमर्शे कृते भक्तिरेव ज्यायसीति प्रतिभाति। ब्रह्मज्ञानिन उद्धवस्य श्रीकृष्णभक्ता गोपीः प्रति कथनमत्र प्रमाणम्—

अहो यूयं स्म पूर्णार्था भवत्यो लोकपूजिताः।
वासुदेवे भगवति यासामित्यर्पितं मनः।
भगवत्युत्तमश्लोके भवतीभिरनुत्तमा।
भक्तिः प्रवर्तिता दिष्ट्या मुनीनामपि दुर्लभा॥

(श्रीमद्भा.१०.४७.२३,२५)

ज्ञानी उद्धवः स्वयमपि गोपीनां भक्तो भवति, स वक्ति—

आसामहो चरणरेणुजुषामहं स्यां
वृन्दावने किमपि गुल्मलतौषधीनाम्।

या दुस्त्यजं स्वजनमार्यपथं च हित्वा
भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम् ।।
वन्दे नन्दव्रजस्त्रीणां पादरेणुमभीक्ष्णशः ।
यासां हरिकथोद्गीतं पुनाति भुवनत्रयम् ।।

(श्रीमद्भा.-१०.४८.६१,६३)

भगवता व्यासेन कृते श्रीमद्भागवतस्य वस्तुविन्यासे परमो ज्ञानी उद्धवो भक्तो भवति। एतेन प्रमाणितं भवति, यच्छ्रीमद्भागवते भक्तेरेव प्रामुख्यं चकास्ति।

भक्तिरसविषये करपात्रस्वामिनोऽवधारणैवं विद्यते—'भगवद्गुणश्रवणजनितद्रुतिरूपायां मनोवृत्तौ सर्वसाधनफलभूतायां गृहीतभगवदाकारायां विभावानुभावसात्त्विकभावसञ्चारिसहयोगेन रसरूपतयाऽभिव्यक्तो भगवदाकारता रूपो रत्याख्यः स्थायी भावः परमानन्दसाक्षात्कारात्मकः प्रादुर्भवति। स एव भक्तिरसो भक्तियोगो वा—

द्रुतस्य भगवद्धर्माद्धारावाहिकतां गता ।
सर्वेशे मनसो वृत्तिर्भक्तिरित्यभिधीयते ।।

अत्र रतिर्नाम भक्तिस्थायिभावो द्रुतचित्तप्रविष्टभगवदाकरतारूपः संस्कारविशेषः। सात्त्विकी सुखमप्येव द्रुतिः रतिशब्दव्यपदेश्या—

रजस्तमो विहीना या भगवद्विषया मतिः ।
सुखाभिव्यञ्जकत्वेन रतिरित्यभिधीयते ।।
ईर्ष्याजभयजद्वेषौ भगवद्विषयावपि ।
न भक्तिरसतां यातः साक्षाद्रतिविरोधतः ।
आत्मोचितैर्विभावाद्यैः प्रीतिरास्वादनीयताम् ।
नीता चेतसि भक्तानां प्रीतिर्भक्तिरसो यतः ।।
अविरुद्धान् विरुद्धाँश्च भावान् यो वशतां नयन् ।
सुराजेव विराजेत स स्थायी भाव उच्यते ।।

(स्थायीभावोऽत्र सम्प्रोक्तः श्रीकृष्णविषया मतिः) तेन भगवन्निष्ठेष्टसाधनाविषयकत्वमेव भक्तेः प्राणाः, तस्यैव भगवद्गुणाश्रयणनिबन्धनसम्भवात्'। अत एव भगवदालम्बमानस्य रोमाञ्चाश्रुपातादिभिरनुभावितस्य हर्षादिभिः परिपोषितस्य श्रीमद्भागवतादिश्रवणसमये भक्तैरनुभूयमानस्य भक्तिरसस्य न रसान्तरेऽन्तर्भावः सम्भवति। भगवदनुरागरूपा भक्तिश्चात्र स्थायी भावः।

●

टीकासु श्रीधरटीका विष्णुवैष्णवसम्मता

डॉ. श्यामबापटः

ब्रह्मतत्त्वप्रकाशकं शुकसनकादिपरमहंससेवितं, सर्वशास्त्रसारभूतं, अज्ञानतिमिर-निवर्तकमध्यात्मदीपं, उदरीकृतं भक्तिज्ञानवैराग्यनैष्कर्म्यं, अद्वितीयमनुपमं च मुक्तिसाधनं, वासुदेवतेजस्समुपबृंहितं, भगवतो वाङ्मयावतारभूतं, वैष्णवानां परमं धनं, भगवत्सकाशादेव परम्परया प्राप्तं, भुक्ति-मुक्तिप्रदायकं, महापुराणमूर्धन्यतमं श्रीमद्भागवतं राराजते।

श्रीमद्भागवतं पौराणिकसंस्कृतवाङ्मयस्य सर्वोत्कृष्टं फलं विद्यते। तस्य लक्ष्यं साधनञ्च विलक्षणं तथा तस्य स्वरूपमत्यन्तं गभीरं मधुरं प्रसादपूर्णं च। अस्याध्यात्मं, काव्यत्वं, समाजसङ्घटनप्रणाली च विलक्षणा। अशेषविश्वस्य कृते गौरवास्पदमिदं वर्तते। जीवानां परमकल्याणार्थमेवास्य ग्रन्थस्याविर्भावो जातः। **'विद्यावतां भागवते परीक्षा'** इति प्रसिद्धैवास्य विषयगाम्भीर्यमनुमीयते। नानाभाषासु निबद्धा बहुविधा व्याख्याऽस्योपर्युपलभ्यन्ते। देवभाषायामपि भागवतोपरि अनेकाचार्यैः विद्वद्भिश्च स्वस्वसम्प्रदायानुसारं गभीरार्थमुदरीकृता भागवतरहस्योद्घाटनसमर्था बहुशष्टीकाष्टीकिताः सन्ति। अनया रीत्या टीकासम्पत्तिः दृष्ट्याऽपि भागवतं पुराणसाहित्ये अग्रगण्यं विद्यते।

सारगर्भिते भागवते प्रमेयबहुलत्वाद् व्याख्यानप्रसादेनैव तस्य गभीरार्थे कोऽपि जिज्ञासु प्रवेष्टुमर्हति। सकलश्रुतिसारभूतस्य ब्रह्मात्मैकत्वप्रतिपादकस्य भागवतस्य कैवल्यमुक्तिरेव परमं प्रयोजनम्। अस्य गभीरार्थं सुकरं कारयितुमेवातिप्राचीनकाला-देवास्योपरि टीकाग्रन्थानां प्रणयने प्रयतमानाः सन्ति पण्डितपुङ्गवाः परिव्राजका आचार्याश्च। **'सत्यं परं धीमहि'** इत्यनेन भागवतस्यारम्भो विरामश्च भवति, येन तस्य सम्प्रदायनिरपेक्षत्वं सुसिद्धम्। अतः द्वैताद्वैतवादिनः सर्वे समानरूपेणाकृष्टा भूत्वा सन्तः विशेषेण वैष्णवसम्प्रदायाचार्यैः स्वस्वमतानुकूलाः प्रामाणिकाः टीकाश्च लिखित्वा स्वकीयं मतं भागवतमूलकं प्रदर्शितम्।

शुद्धाद्वैतसम्प्रदायस्याचार्यचरणैर्वल्लभाचार्यवर्यैस्तु प्रस्थानत्रय्यां भागवतस्य समावेशं कृत्वा प्रस्थानचतुष्टयं स्वीकृतम्।

तैः वेदगीता-ब्रह्मसूत्रैः सह व्यासस्य समाधिभाषा भागवतमपि चतुर्थप्रमाणरूपेण स्वीकृतम्।

भागवतोपरि या महत्त्वपूर्णाः टीकाः लिखिताः, तासु विभागद्वयं कर्तुं शक्यते— १. साम्प्रतमनुपलब्धाः, २. उपलब्धाश्च

१. चित्सुखाचार्यविरचिता—भागवतव्याख्या।

२. श्रीमध्वाचार्यकृतः—भागवततात्पर्यनिर्णयः।

३. श्रीमद्विजयतीर्थकृतोऽपि कश्चिद् ग्रन्थः टीका वा आसीद् यस्योल्लेखः विजयध्वजाचार्यैः स्वपदरत्नावल्यां कृतो वर्तते। उपलब्धाः टीकाः—

अद्वैतमवलम्ब्य–

१. भावार्थदीपिका—श्रीधरस्वामिपादैः विरचिता 'श्रीधरी'।

२. भावार्थदीपिकाप्रकाशः—श्रीवंशीधरमहाभागैः कृता 'वंशीधरी'।

३. भावार्थदीपिका (श्रीधरी' व्याख्या—श्रीराधारमणदासगोस्वामिकृता)।

विशिष्टाद्वैतमवलम्ब्य–

१. शुकपक्षीया—आचार्यसुदर्शनसूरिकृता परिमाणे स्वल्पाऽपि भावप्रकाशने गम्भीरा वर्तते।

२. भागवतचन्द्रचन्द्रिका—वीरराघवचार्यचरणैः विरचिता। रामानुजमतमनुसृत्य भागवतरहस्योद्घाटनक्षमा विस्तृताऽनुपमा च।

द्वैतमतमवलम्ब्य

१. पदरत्नावली—विजयध्वजतीर्थाचार्यवर्यैः लिखिता। "आनन्दतीर्थ-विजयतीर्थौ प्रणम्य मस्करिवरवन्द्यौ। तयोः कृतिं स्फुटमुपजीव्यं प्रवच्मि भागवतं पुराणम्" टीकारम्भे। इयं प्रामाणिकी सुबोधा द्वैतानुकूला व्याख्या।

शुद्धाद्वैतमतमवलम्ब्य

१. सुबोधिनी–श्रीमद्वल्लभाचार्यचरणैर्विरचिता। प्रथमद्वितीयतृतीयदशम-स्कन्धोपरि भगवतो विष्णोराज्ञया लिखिता भागवतस्याध्यात्मिकज्ञानार्थं विशिष्टा टीका।

२. बालप्रबोधिनी–गोस्वामी गिरिधरलालकृता, अत्र न केवलं स्कन्धानां विषयाणामपि त्वध्यायसम्बन्धिविषयाणामपि सूक्ष्मविभाजनं प्रस्तुतम्।

निम्बार्कमतटीका–

१. सिद्धान्तप्रदीपः–आचार्यशुकदेवाचार्यकृतः। द्वैताद्वैतमनुसृत्य लिखिता विशिष्टा टीका।

चैतन्यसम्प्रदायसम्बद्धटीकाग्रन्थाः–

१. बृहद्वैष्णवतोषिणी–सनातनगोस्वामिकृता। केवलं दशमस्कन्धस्योपरि वर्तते प्राचीनतराऽधिकप्रामाणिकी।

२. क्रमसन्दर्भः–जीवगोस्वामिकृता चैतन्यसम्प्रदायानुसारं भागवतस्य प्रामाणिकी तलस्पर्शिनी व्याख्या। गूढार्थस्य प्रकाशनार्थं षट्सन्दर्भाः पृथग् रचिताः। सप्तमोऽयं क्रमसन्दर्भः, अपरनाम रूपसनातनानुशासनभारतीगर्भः।

३. सारार्थदर्शिनी–आचार्यवर्येण विश्वनाथचक्रवर्तिना विरचिता श्लोकस्य मर्मज्ञानार्थं नितान्तकृतकार्या वर्तते। अत्र श्रीचैतन्यमहाप्रभोः, श्रीधरस्वामिपादानां तथा स्वगुरोर्व्याख्यानां स्तरः समाविष्टः, अतः सारार्थदर्शिनी नाम्ना विख्याता।

१. हरिभक्तिरसायनम्–कविभक्तेन श्रीहरिसूरिणा रचिता ४९ अध्यायेषु निबद्धा पद्यात्मिका दशमस्कन्धस्य पूर्वार्धमधिकृत्य भागवतोपरि लिखिता टीका ललितविन्यासेन संवलिता।

एतदतिरिक्तं बहव्यः अन्याऽज्ञातज्ञातटीकाः सन्ति यत्र हनुमद्भाष्यम्, वासनाभाष्यम्, सम्बन्धोक्तिः, विद्वत्कामधेनुः तत्त्वदीपिका, परमहंसप्रिया, शुकहृदयश्चानेके व्याख्याग्रन्था सन्ति। एवं हि वल्लभ-निम्बार्कसम्प्रदाय-सम्बद्धानामनेकेषामाचार्याणां टीका व्याख्या ग्रन्था टिप्पण्यः निबन्धाश्चोपलभ्यन्ते। एतदतिरिच्य श्रीगङ्गासहाय-विद्यावाचस्पतिविरचिता 'अन्वितार्थप्रकाशिका' चूर्णिका प्रभृतिप्रसिद्धाः भागवतस्य ज्ञानाय परमोपयोगिन्यः टीकाश्च तथा साम्प्रतमपि नूतना टीकाः विद्वद्भिः लिखिता सन्ति।

अत्र स्वकीये शोधपत्रे श्रीधरप्रणीतां भावार्थदीपिकामधिकृत्य किञ्चिच्चर्च्यते। श्रीधरस्वामिपादानामियं टीका सर्वश्रेष्ठा सर्वप्राचीना च प्रतीयते। यथा प्रागेवोक्तं यत् श्रीमद्भागवतपुराणे बहुभिर्विद्वद्भिः स्वसम्प्रदायानुरोधेन टीका न्यबध्यन्त। प्रत्येकं व्याख्याकारः स्वविचारपोषणाय भागवतं व्याख्याति। एषु व्याख्याकारेषु भावार्थदीपिकाकारः श्रीधरस्वामी बहुमानं भजते।

यथा सुविदितमेव यद् ऋषयो देवाः पितरश्च क्रमेणाध्यात्ममधिदैवाधिभूत-राज्यस्य व्यवस्थापकाः। यथा समये समये देवानामाविर्भावो भवति तथैव ऋषिणामपि। भगवद्विभूतिस्वरूपा एते यथासमयं भगवत्तत्त्वप्रकाशनार्थमवतरन्ति। यतो हि भागवतं तु भगवतो विग्रहवदेव, (प्रत्यक्षः कृष्ण एव हि) अतः तस्य सम्यक् प्रकाशनं तस्य सहाय्येन तत्कृपापात्राणां च सहाय्येनैव भवितुमर्हति।

श्रीमद्भागवतानुसारं वर्णाश्रमानुसारेण कर्म कुर्वन् जीवः हरिं भक्त्याऽऽराध्य तस्य प्रसन्नतां प्राप्तुं शक्नोति। अतः जीवन उपासनाया अतीव महत्त्वं, तदभावे किमपि कर्तुं न पार्यते। श्रीधरीटीकाया अनुशीलनेन ज्ञायते यदेते नृसिंहोपासकाः। टीकायाः प्रथम-द्वितीय-षष्ठ-सप्तम-स्कन्धस्य मङ्गलाचरणेनैतत्परिपुष्यति।

वागीशा यस्य वदने लक्ष्मीर्यस्य च वक्षसि।
यस्यास्ते हृदये संवित्तं नृसिंहमहं भजे ।। प्र. स्क.

यन्नामकीर्तनं दानतपोयोगादिसत्फलम् ।
तं नित्यं परमानन्दं हरिं नर नम स्मर ।। द्वि. स्क.
पुण्यारण्ये नृसिंहैकनाम सिंहो विराजते ।
यन्नादतः पलायन्ते महाकल्मषकुञ्जराः ।। ष. स्क
स्वभक्तपक्षपातेन तद्विपक्षविदारणम् ।
नृसिंहमद्भुतं वन्दे परमानन्दविग्रहम् ।। स. स्क.

नृसिंहप्रसादादेव भागवतस्य गम्भीरार्थान् तस्य गम्भीरं भागवतं मर्म मद्-भक्तः श्रीधरो जानातीति स्वयमेव भगवता बिन्दुमाधवेन इत्थं प्रमाणितम् ।

व्यासो वेत्ति शुको वेत्ति राजा वेत्ति न वेत्ति वा ।
श्रीधरः सकलं वेत्ति श्रीनृसिंहप्रसादतः ।।

परवर्तिना हिन्दीभाषाकविना भक्तनाभादासेनोल्लेखि भक्तमालग्रन्थे—

तीन काण्ड एकत्व सानि कोऽ अज्ञ बखानत ।
कर्मठ ज्ञानी ऐंचि अर्थ को अवरथ वानत ।।
'परमहंससंहिता' विदित टीका विसतारयौ ।
षट् शास्त्रनि अविरुद्ध वेद सम्मतहिं विचार्‌यौ ।।
परमानन्द प्रसाद ते माद्यौं सुन्दर सुधार दियौ ।
श्रीधर श्रीभागौत मैं धरम निरनै कियौ ।। (छप्पय ४४०)

पूर्वोक्तश्लोकानुसारं श्रीमद्भागवतकारो व्यासः, परीक्षितं राजानं प्रति तदर्थप्रकाशकः, शुकश्च, द्वावेतौ भागवतार्थं सम्यक् जानीतः । राजा तु जानाति न वेति संशयस्थानम् । श्रीधरस्तु सर्वमेव जानाति, नास्त्यत्र संशयलेशोऽपि ।

यद्यपि श्रीधरस्वामिनः भगवत्पादशङ्कराचार्यचरणानां अद्वैतमतस्यानुयायिनः किन्तु मतवैभिन्यादपि चैतन्यसम्प्रदाये तेषां टीकायाः समादरः, अस्या महत्त्वं प्रामाण्यं च द्योतयति । चैतन्यसम्प्रदायस्याचार्याः चैतन्यमहाप्रभुपादाः स्वमतस्य कृतेऽपि 'श्रीधरीटीका' प्रमाणभूता इति मन्यन्ते स्म । अतस्तैः स्वकीया काऽपि नूतना टीका न निरमायि । चैतन्यमहाप्रभुपादानां कीदृशी आस्था अस्यां टीकायां तत्तस्यैव वचने द्रष्टुं शक्यते । ते कथयन्ति स्म—यथा स्वामिनः (स्वभर्तुः) प्रतिकूला भार्या पतिव्रता भवितुं नार्हति, तथैव स्वामिचरणानां प्रतिकूले जने भागवतस्य मर्म ज्ञातुं कदापि न पारयति ।

आचार्यचरणानां गुरोर्नाम 'परमानन्द' आसीदित्यपि अस्याः टीकाया अनुशीलनेन ज्ञायते—'तं नित्यं परमानन्दं हरिं नर नम स्मर' । 'तमहं शरणं यामि परमानन्दमाधवम्' । 'नृसिंहमद्भुतं वन्दे परमानन्दमद्भुतम्' । तेषामाज्ञया एव काश्यां निवसताऽनेन भागवतोपरि टीका विरचिता । बाह्याभ्यन्तरप्रमाणैराचार्यचरणानां समयः चतुर्दशशताब्दमध्ये प्रतीयते ।

श्रीधरीटीकायां प्रसिद्धाचार्याणां चित्सुखाचार्याणां निर्देशः तथा प्रसिद्धविदुषां वोपदेवानां सङ्केतः कृतः तथा भक्तिरत्नावल्याः प्रणेतृभिः विष्णुपुरीमहाभागैः 'स्वकान्तिमाला' इति व्याख्यायां आचार्याणां भागवततात्पर्यं पूर्णतः स्वीकृतम्—

अत्र श्रीधरसत्तमोक्तिलिखने न्यूनाधिकं यत्त्वभूत् ।
तत् क्षन्तुं सुधियोऽर्हत स्वरचनालुब्धस्य मे चापलम् ।।

(भ. र. १३/१४)

एवं हि चैतन्यसम्प्रदायस्य आचार्यैः विश्वनाथचक्रवर्तिमहाशयैः स्वकीयायां सारार्थदर्शिन्यां टीकायां स्वगुरोः, चैतन्यमहाप्रभुपादानां तथा श्रीधरस्वामिमहाभागानां च व्याख्यानानां यत् सारः दर्शित इति लिखितम् । यथा पुष्पिकायाम्—

श्रीधरस्वामिनां श्रीमत्प्रभूणां श्रीमुखाद्गुरोः ।
व्याख्यासु सारसङ्ग्रहादियं सारार्थदर्शिनी ।।

इदानीं टीकाया अन्तरङ्गमवलम्ब्य किञ्चिदुच्यते श्रीमद्भिः श्रीधरस्वामिपादैः कृता या टीका तत्रादौ प्रत्येकस्कन्धस्य तथा प्रत्येकाध्यायस्यादौ ये श्लोकाः लिखिताः तेऽतीव महत्त्वपूर्णाः । तैरेव न केवलं तेषां गुरुपरम्परा, गुरुनिष्ठा, उपास्यदेवताविषये ज्ञानं भवति, अपि तु प्रत्येकस्कन्धस्य वैशिष्ट्यमपि ज्ञायते । 'यथा देहे तथा देवे यथा देवे तथा गुरौ' इति वचनानुसारं प्रायः प्रत्येकस्कन्धस्यादौ ये श्लोकाः सन्ति, तेषु समानरूपेण यथा गुरोस्तथैव प्रभोरपि महिमा वर्णितः ।

यथा सर्वे जानन्त्येव यद् भागवते पुराणानां दशलक्षणानि स्वीकृतानि । प्रायः सर्वैराचार्यैः तृतीयस्कन्धादारभ्य द्वादशस्कन्धपर्यन्तं दशलक्षणानि वर्णितानीति स्वीकृतम् । अत्र तृतीयस्कन्धे स्वामिपादैः द्वेधा श्रीमद्भागवतसम्प्रदायप्रवृत्तिः दर्शिता, एकतः सङ्क्षेपतः श्रीनारायणब्रह्मनारदादिद्वारेण, अन्यतस्तु विस्तरतः शेषसनत्कुमार-सांख्यायनादिद्वारेण । एवं हि चतुर्थे ईश्वराधीनैर्ब्रह्ममन्वादिभिः कृतोऽयं विसर्गः । वल्लभाचार्यमहाभागैरपि ब्रह्मकृद् जगज्जीवकृतः संसार इति प्रपञ्चस्य द्वैविध्यं स्वीकृतम् । तत्र प्रथमा सामान्या द्वितीया विशेषेत्यभिधीयते । ब्रह्मसृष्टिस्तु सर्गः, पौरुषसृष्टिः विसर्गश्च । भावार्थदीपिकायां स्थानलक्षणात्मकस्य पञ्चमस्कन्धस्य वर्णने कथितमस्ति यत् षड्विंशत्याध्यायेषु प्रियव्रतपुरस्सरैः भुवि द्वीपादिमर्यादा पालिता तथा त्रिभिः ज्योतिश्चक्रादिकीर्तनं त्रिभिश्च अतलादिषु दैत्यानां पालनं एवं षष्ठे ऊतिः सप्तमे पोषणं, अष्टमे मन्वन्तराणि, नवमे ईशानुकथा वर्णिता । अस्यां टीकायामतिलङ्घितमर्याद-भक्तरक्षणं पोषणं तत्कर्मानुसारिणी वासना ऊतिः महतां कोपादनुग्रहाच्चाशुभाशुभा इति द्विधा स्वीकृता यतो हि स्वायम्भुवाद्या मनवः प्रवर्तयन्ति सद्धर्मान् पालयन्त्याचरन्ति च, अतो मन्वन्तरस्योक्तं सद्धर्म इति । सद्धर्मास्तु सत्त्वशोधकाः । सद्धर्मशुद्धसत्त्वाना-मन्तरङ्गेशसत्कथा सूर्यसोमान्वयाख्यानैः सङ्गतोच्यते ।

उपर्युक्तक्रमेण दशमस्कन्धे निरोधलक्षणं भवितुमर्हति शुद्धाद्वैताचार्यैर्वल्लभचरणैरेतत् स्वीकृतमपि किन्तु स्वामिपादा अत्र आश्रयतत्त्वं स्वीकुर्वन्ति—

दशमे दशमं लक्ष्यमाश्रिताश्रयविग्रहम् ।
क्रीडद्यदुकुलाम्भोदौ परानन्दमुदीर्यते ।।

अत्र दशमस्कन्धे भगवान् भक्तानुरूपं स्वानन्दमयीं लीलां प्रकाश्य जीवानां मनांसि आकर्षयति नास्त्यत्र विसंवादः । स्वात्मानं प्रति आसक्त्योत्पादनमेव तस्य लक्ष्यम् । अत्रापि सः कुत्रचिद् ध्यानाश्रयः कुत्रचित् प्रलयाश्रयश्च । अत एव केचन आचार्याः मन्यन्ते यद् सर्गविसर्गादिवर्णने स्कन्धक्रमविवक्षतो नास्ति । स्वसौन्दर्यमाधुर्ययोः प्रकाशेन भक्तमानसं बलादाकृष्य स्वात्मनि तस्य सर्वार्थावरोधनमेवं भगवत्क्रीडा वर्तते । केनाऽपि नाम्नाऽस्य सम्बोधनं स्यात्, सा तु जीवानां परमाश्रयस्वरूप एव, स एव भगवान् ध्यानाश्रयः प्रलयाश्रयश्च ।

श्रीवल्लभाचार्यचरणैः 'तत्त्वार्थदीपनिबन्धे' लिखितं यत् श्रुतिगीता 'वेदस्तुतिः' भगवद्यशो गायति । किन्तु भावार्थदीपिकायां वेदान्तदर्शनरीत्या वेदस्तुतेर्व्याख्या कृता । तत्र सर्वत्र सिद्धान्ततः औपनिषदद्वैतमेव स्वीकृतम् । प्रत्येकश्रुत्युपरि श्लोकोऽपि लिखितः स्वामिपादैः । सिद्धान्तेऽद्वैतं साधने भक्तिरिति भागवतस्य स्वकीयं वैशिष्ट्यम् । भक्तौ श्रवण-मनन-निदिध्यासनानां स्वतः समावेशो भवति, यतः सा भगवद्वासनातिरिक्तं अन्यद् सर्वं निवर्तयति । भजनीयस्वरूपमपि स्पष्टीकरोति । एवं श्रीधरस्वामिमहाभागैः सर्वत्र भागवते ज्ञानमाहात्म्यं सर्वथा स्वीकृतम् । उत जीवगोस्वामिभिः भागवतस्य रचना ब्रह्मसूत्राणां स्फोटस्य कृते तथा श्रीवीरराघवाचार्यैः वेदान्तार्थोपबृंहणाय स्वीकृता । मध्वसम्प्रदायाचार्या विजयध्वजतीर्थाः वेदान्तविस्तारं स्वीकुर्वन्तः एतदपि व्यलिखन् यद् ब्रह्मसूत्राणामध्ययनस्याधिकारः सर्वजनसुलभो नासीदत श्रीमद्भागवतं व्यरचि । शुद्धाद्वैत-गौडीयसम्प्रदायाचार्यैः वल्लभाधीशचरणैस्तथा आचार्यविश्वनाथचक्रवर्तिप्रभृतिभिः भक्तेः श्रेष्ठताज्ञापनाय ग्रन्थस्य रचना जाता इति स्वीकुर्वन्ति ।

श्रीधरस्वामिपादैः भागवतारम्भे स्वकीये मङ्गलाचरणे श्लोकद्वयमुपाप्तम् ।

माधवोमाधवीशौ सर्वसिद्धिविधायिनौ ।
वन्दे परस्परात्मानौ परस्परनुतिप्रियौ ।।
सम्प्रदायानुरोधेन पौर्वापर्यानुसारतः ।
श्रीभागवतभावार्थदीपिकेयं प्रतन्यते ।। –देवपञ्चके ।

पुराणेषु प्रायः विशिष्टदेवं प्रतिपाद्य विशेषेण हरिहरयोर्मध्ये भेदो न कर्तव्य इति पौनःपुन्येन निरूपितम् । इयमेव सरणी स्वसम्प्रदायमवलम्ब्य स्वकीयायां भावार्थदीपिकाटीकायां स्वामिपादैः प्रदर्शिता । किन्तु अन्यटीकासु कुत्रचित्

स्वसम्प्रदायानन्यताभिप्रायादुल्लङ्घनमपि दृश्यते। यथा निश्चयेनाचार्याणां विजयध्वजतीर्थानां व्याख्या वैदुष्यपूर्णा लोकोत्तरा अपूर्वा च नास्त्यत्र सन्देहलेशः, किन्तु सम्प्रदायाकृष्टचेतसा रागद्वेषाक्रान्ततया तैः कुत्रचित् स्थलेषु प्रकरणविरुद्धमपि व्याख्यानं कृतम्—यथा चतुर्थस्कन्धे तपःकर्तुमुद्यतान् प्राचेतसान् दृष्ट्वा तत्सङ्कल्पसिद्धये भगवत्प्राप्तये च योगादेशाख्यं रुद्रगीतं तेभ्य उपदिष्टवान् भगवान् शिवः—

स्वधर्मनिष्ठः शतजन्मभिः पुमान्।
विरिञ्चितामेति ततः परं हि माम्।।

इति पद्यस्य व्याख्यानं कुर्वद्भिः तीर्थैः प्रसङ्गात् प्राप्तमपि अस्मद् पदवाच्यं श्रीशिवमुपेक्ष्य मां श्रियमेतीति व्याख्यातम्। तस्मिन्नेव चतुर्थस्कन्धे मूर्तित्रयेण अत्रिसमक्षं प्रत्यक्षीभूय भगवता स्पष्टतया 'उक्तं 'यद्वै ध्यायति ते वयमिति'। ते वयं त्रयोऽपि तदेकं तत्त्वं नास्माकं भेदोऽस्ति। एतादृशी साम्प्रदायिकता भावार्थदीपिकायां तु सर्वथा दुर्लभा एव। अनेनैव कारणेन आचार्यवंशीधरशर्मणा अस्योपरि टिप्पणी कुर्वता स्पष्टमेव लिखितम्—अत्र तीर्थैर्यदुक्तं सार्वत्रिकाद् चारुवद् भातीति। अस्याः भावार्थदीपिकाटीकायाः पक्षपातराहित्यादेव विद्वन्मूर्धन्यैः वैष्णवाचार्यैः श्रीजीवगोस्वामिपादैरपि यथा प्रकरणं तट्टीकायाः प्रतीकान्युधृत्य स्पष्टतया भावः स्फुटीकृतः। अन्यैष्टीकाकारैरपि श्रीविश्वनाथचक्रवर्तिभिः गङ्गासहायविद्यावाचस्पतिभिः वंशीधरशर्मभिः स्वामिचरणैरित्युक्त्वा महानादरः सूचितः।

अस्या भावार्थदीपिकाटीकाया एकमन्यं वैशिष्ट्यं यत् श्रीमद्भागवतस्य प्रसङ्गायातपरपक्षीयदैत्यादिकृतभगवद्भक्तनिन्दनादि अनुलक्ष्य श्रीधरस्वामिभिर्वाग्देव्याभिप्रेतार्थस्तु इत्युपक्रम्य निन्दापदान्यपि स्तुत्यर्थन्तरपराणि प्रदर्शितान्येव—यथा हिरण्याक्ष प्रसङ्गेः स भगवन्तं प्रति कथयति—'जहास चाहो वनगोचरो मृगः'। अत्र वारिचरो वराहः, इत्युक्त्वा आक्षिपति किन्तु स्वामिपादैः लिखितं यद् हिरण्याक्षेनाधिक्षेपार्थं प्रयुक्ताऽपि भारती भगवन्तं स्तौति। तथा हि वनगोचरो जले शयानः श्रीनारायणः स एव योगिभिर्मृग्यते, दुष्टान् वा हन्तुं मृगयत इति मृगः। एवं हि तत्रैवाग्रेऽपि 'अज्ञः' नास्ति ज्ञो यस्मात् सर्वज्ञेत्यर्थः सुराधमः—सुरा अधमा यस्मात् हे सुरोत्तम, अपरोक्षजितं—चौर्येण जयति। दूरतः एव स्थित्वा जयते।

पुनरग्रेऽपि दक्षप्रसङ्गे (सतीचरित्रवर्णनप्रसङ्गे) यत्र दक्षः शिवमाक्षिपति तत्राऽपि यथा केचन यशोघ्नः—परमतेजस्वित्वात् तद् यश आच्छादकः निरपत्रपः—निर्गता अप समन्तात् त्राणं रक्षणं येषां तान् अत्रपान् रक्षकहीनान् पातीति।

ततः परं शिशुपालप्रसङ्गेऽपि यत्र शिशुपालः श्रीकृष्णस्य निन्दां करोति, तत्रापि स्तुति एव—

सदस्पतीनतिक्रम्य गोपालः कुलपांसनः ।
यथा काकः पुरोडाशं सपर्या कथमर्हति ।।

गोपालः—वेंदपृथिव्यादिपालकः जितेन्द्रियः हृषीकेश एव ।

कुलपांसनः—कुत्सितं वेदविपरीतं लपन्तीति कुलपाः पाखण्डास्तान् अंसते समाघातयति इति सः, अकाकः कं च अकं च काके सुखदुःखे ते न विद्येते यस्य सः अकाकः आप्तकामः । यथा आप्तकामो देवयोग्यं केवलं पुरोडाशमात्रं नार्हति, अपि तु सर्वस्वमपि तथाऽयं श्रीकृष्णोऽपि ब्रह्मर्षियोग्यं सपर्यां कथमर्हति किन्त्वात्मसमर्पणमर्हति । वर्णाश्रमकुलोपेतः ब्रह्मत्वात्, सर्वधर्मबहिष्कृतः—स्वैरवर्ती परमेश्वरत्वात् । 'अनामगोत्रं'—श्रुतिः ।

अत्रावधेयं यथा श्रीधरस्वामिपादैः प्रतिज्ञातं—सम्प्रदायानुरोधेन पौर्वापर्यानुसारतः । श्रीभागवतभावार्थदीपिकेयं प्रतन्यते ।। उपर्युक्तप्रसङ्गे श्रीधराचार्यमहाभागैः स्वटीकायां सम्प्रदायानुसारेण भागवतस्य यत् प्रतिपाद्यं अद्वैतसमन्वितभक्तियोगसंरक्षणं कृतम् । भागवतस्य सिद्धान्तपक्षस्तु अद्वैत एव किन्तु साधनपक्षस्तु भक्तिरेव ।

यथा पूर्वोक्तप्रकरणे निर्गुणनिर्विकारब्रह्मणि स्तुतिः निन्दयोर्मिथ्यात्वमेव । केवलं वाणीविलासम् । निर्गुणब्रह्म तु सर्वथा निरपेक्षमेव । अतः ज्ञानदृष्ट्या अद्वैतब्रह्मणि स्तुतिनिन्दयोर्न किमपि प्रयोजनम् । इदानीं भक्तिदृष्ट्या विचार्यते—भागवते स्पष्टमुक्तं यत्—येन केनाप्युपायेन मनः कृष्णे निवेशयेत् । स्नेहाद् द्वेषाद् भयात् कामाद् वा तस्योद्धारस्तु भवत्येव । स्वामिपादैरतिलङ्घितमर्यादलक्षणं पोषणमिति उक्तम् । एवं हि भागवतेऽपि 'पोषणस्तदनुग्रहः' इति परिभाषितम् । यथाऽजामिलप्रसङ्गे पुत्रव्याजेन कृतेन नारायणेति नामोच्चारेण तस्योपरि भगवदनुग्रहो जात इति सर्वे जानन्त्येव । एवं हि हिराण्याक्ष-दक्ष-शिशुपालप्रभृतीनां प्रसङ्गेऽपि स्वभूमिकानुसारं तेषां तै किमुक्तमिति नास्ति महत्त्वपूर्णम् । भक्तिशास्त्रानुसारं तु भगवत्स्वभाव एव अनुग्रहस्य । श्रद्धया हेलया वा कथमपि नामग्रहणपूर्वकं यदि भक्तः स्तौति निन्दति वा तत्र वस्तुतः भगवद्बलं प्रमेयबलं कार्यते, न तु प्रमातुः भक्तस्य वा बलम् । अतः निन्द्याक्षराण्यपि स्तुत्याक्षराणि भवन्ति, तस्य अचिन्त्यलीलस्य वाक्शक्त्या । यथा स्वामिपादा अधिक्षेपार्थं प्रयुक्ताऽपि भारती स्तौतीत्येति । यतो हि श्रीधरस्वामिनः अद्वैतवादिनः, अतो यथा मङ्गलाचरणे माधवं उमाधवं समानरूपेण स्तौति, तथैव हिरण्याक्षकृतयज्ञवाराहस्य निन्दायाः, दक्षकृतशिवनिन्दायाः, शिशुपालकृतकृष्णनिन्दाया अथवा अन्यत्रापि समानरूपेण स्वकीयां टीकायां पक्षपातरहिता विवेचना कृता ।

अत्रेत्यप्यवधेयं यत् स्वामिपादाः न केवलं पदान्यनुवदन्ति, अपि तु गूढार्थविवेचनपुरस्सरं तानि व्याख्यानमपि । न केवलं शुष्केण तर्केण, अपि तु

स्वानुभवसरण्या अप्रत्यक्षानपि पदार्थान् प्रत्यक्षीकुरुते भागवतपुराणस्यैकादशस्कन्धे द्वाविंशतितमेऽध्याये वृत्तिविवेचनावसरे श्रीधरस्वामिपादैर्या मनसो वृत्तिर्वर्णिता, सा तु केवलमनुभूतिगम्या। तेषामनुसारं मनोलिङ्गशरीरं तच्चाहङ्कारावेष्टितं सच्छ्रवणविषयगतान् चक्षुर्गोचरांश्च पदार्थान् चिन्तयति। क्रमशश्च मनसश्चिन्तनक्रियायां शैथिल्यमुपजायते। देहान्तरगतश्च मनः पूर्वजन्मानुभावान् विस्मरति तदेव मृत्योरत्रात्यान्तिकी विस्मृतिः।

अन्ते च सर्वमान्या कृतिः गुरोरनुग्रहेण तथा भगवत्कृपया विना न निर्मीयते। द्वयोरपि कृपा परस्परसापेक्षा। भगवदानुग्रहेणैव सद्गुरो प्राप्तिः गुरुप्रसादेन भगवत्साक्षात्कारो भवति। अस्यां टीकायां सर्वत्र समानरूपेण उभयत्र निष्ठा दृश्यते, यथा मङ्गलाचरणे—

मूकं करोति वाचालं पङ्गुं लङ्घयते गिरिम्।
यत्कृपा तमहं वन्दे परमानन्दमाधवम्।।

अत्र परमानन्दस्वरूपं माधवं अथवा परमानन्दैव माधवः तं, तं परब्रह्मरूपिणं गुरुं वन्दे। विष्णुसहस्रनामस्तोत्रे परमेश्वरस्यानेकानि नामानि तत्र एका पङ्क्तिरायाति— 'अमानी मानदो मान्यः.........' एतानि तस्य गुणविशेषप्रकाशकानि नामानि। अतः आमानी निरभिमानी एव तस्य गुरोर्वा प्रियो भवितुमर्हति। यथार्थ अद्वैतानुयायी एव निरभिमानित्वाद् रागद्वेषरहितो भूत्वा मानदो भवति, येन सर्वमान्यत्वं च लभते।

अतः यथा भागवतं सम्प्रदायनिरपेक्षत्वात् सर्वेषां कृते समादरणीयं सर्वग्राह्यं सर्वोपकारकं तथैव श्रीधरस्वामिपादानां भावार्थदीपिका टीकाऽपि विष्णुवैष्णवसम्मता सर्वग्राह्या स्वस्वसम्प्रदायसिद्धान्तसंरक्षणतत्परैरपि समादृता पुराणेषु भागवतवट्टीकासु ललामभूतेति नास्ति सन्देहलेशः।

श्रीमद्भागवतेऽद्वैतपरिशीलनम्

डॉ. हरिप्रसाद अधिकारी

❋❋❋

श्रीमद्भागवतमहापुराणमष्टादशपुराणेषु मूर्धन्यं विद्यत इत्यत्र नास्ति विदुषां विमतिः। भगवान् व्यासः महाभारतादीन् ग्रन्थानितरपुराणानि विरच्यापि शान्तिं न लेभे। आह स नारदं प्रति—

अस्त्येव मे सर्वमिदं त्वयोक्तं तथापि नात्मा परितुष्यते मे[1]। व्यासवचांसि श्रुत्वा श्रीनारदः वासुदेवगुणानुवादयुतं श्रीमद्भागवतमहापुराणं रचयितुं तमुपदिदेश। एतत्कथया सिध्यति पुराणस्यास्यानितरसाधारणवैशिष्ट्यम्। **विद्यावतां भागवते परीक्षा** इत्याभाणकेनाप्यस्य पुराणस्य वैशिष्ट्यं सिध्यति। इदं पुराणं मुख्यतः श्रीकृष्णस्य भगवतः लीलावर्णनपरं भक्तिमयं द्वैततत्त्वप्रतिपादकं मन्यते। अत एव सर्वे द्वैताचार्याः श्रीमद्भागवतं परमप्रमाणत्वेनाङ्गीकुर्वन्ति। यदा ग्रन्थेऽस्मिन्नद्वैततत्त्वान्वेषणायायं जनः प्रवृत्तः तदा महदाश्चर्यं संवृत्तम्। स्थाने स्थाने क्वचित्साक्षात्क्वचिच्च परम्परया सङ्केतरूपेण वाद्वैततत्त्वस्य निगुर्णस्य निर्विशेषब्रह्मणो वा वर्णनं प्राशस्त्येन समधिगतमभूत्। ततश्च पुराणमिदं न केवलं द्वैताचार्याणामेवापि त्वद्वैततत्त्वोपासकानाञ्च तथैव समादरणीयमिति निष्कर्षः समधिगतः। अत्र तावत् समासेनाऽद्वैतनिर्गुण-निर्विशेषत्वादिप्रतिपादकप्रसङ्गानां दिङ्निर्देशं चिकीर्षामि। प्रथमस्कन्धस्य तृतीयाध्याये निर्विशेषस्य सदसद्विलक्षणस्य मायावरणरहितस्य निर्गुणस्य ब्रह्मणः सङ्केतः कृतः व्यासदेवेन। तद्यथा—

यत्रेमे सदसद्रूपे प्रतिषिद्धे स्वसंविदा।
अविद्ययात्मनि कृते इति तद्ब्रह्मदर्शनम्[2]॥

एवञ्च वस्तुतस्तु परब्रह्म ईश्वरो वा अकर्ता अभोक्ता अजन्मा चास्ति तथापि लोकहिताय तस्य जन्मादिरहितस्यापि जन्मकर्माणि पूर्ववर्तिभिः कविभिः वर्णितानि व्यावहारिकदृष्ट्येति सूचयन्नाह व्यासदेवः—

---

१. स्कन्ध-५/अध्याय-५/श्लोक-५।
२. स्कन्ध-१/अध्याय-३/श्लोक-३३।

एवं जन्मानि कर्माणि ह्यकर्तुरजनस्य च ।
वर्णयन्ति स्म कवयो वेदगुह्यानि हृत्पते:[१] ।।

अपि च—

जन्मकर्म च विश्वात्मन्नजस्याकर्तुरात्मनः ।
तिर्यङ्नृषिषु यादःसु तदत्यन्तविडम्बनम्[२] ।।
कचिदाहुरजं जातं पुण्यश्लोकस्य कीर्तये[३] ।

एभिः कथनैरिदं सूच्यते यत् श्रीव्यासदेवोऽपि जानीतेऽथवा मनुते यद् वस्तुतस्तु नित्यशुद्धबुद्धमुक्तस्य ब्रह्मणः प्राकट्यमसम्भवम्, तत्रानिर्वचनीयमायागुणकारणादेव जगत्प्रपञ्चात्मकं द्वैतमवभासते। सः पुराणपुरुषस्तु विशेषहीनः रराज। गुणसंसर्गजन्यैव प्रपञ्चे तस्य प्रवृत्तिरिति सूचयतोक्तं बादरायणेन—

स वै किलायं पुरुषः पुरातनो य एक आसीदविशेष आत्मनि ।
अग्रे गुणेभ्यो जगदात्मनीश्वरे निमीलितात्मन्निशि सुप्तशक्तिषु[४] ।।

ज्ञानिना स्वतःसिद्धस्यात्मन एवोपासनं कार्यमिति प्रतिपादयता सेव्यसेवकयोर्भेदो निराकृतः शुकदेवेनापि। एतेनापि श्रीमद्भागवतस्याद्वैतप्रतिपादनपरत्वं स्फुटं सिध्यति। तद्यथा—

एवं स्वचित्ते स्वत एव सिद्ध आत्मा प्रियोऽर्थो भगवाननन्तः ।
तं निर्वृतो नियतार्थो भजेत संसारहेतूपरमश्च यत्र[५] ।।

मायोपहितमात्मानं समष्टिरूपात्मनि संवेश्य जनः सेव्यसेवकरूपादिकर्मणः विरमेतेति स्पष्टं समुदीरितं तत्रैव—

आत्मानमात्मन्यवरुध्य धीरो लब्धोपशान्तिर्विरमेत कृत्यात्[६] ।
न यत्र कालोऽनिमिषां परः प्रभुः कुतो नु देवा जगतां य ईशिरे ।
न यत्र सत्त्वं न रजस्तमश्च न वै विकारो न महान् प्रधानम्[७] ।।

एवमेव ज्ञानिन आत्मना आत्मानमेवोपयान्ति। स च समष्टिरूप आत्मा कूटस्थः सन्नपि मायाबलेन जगत्प्रपञ्चोत्पत्तिस्थितिनाशहेतुर्जायते।

---

१. स्कन्ध १ अध्याय-३/श्लोकः ३५ ।
२. स्कन्ध-१/अध्याय-८/श्लोक-३० ।
३. तत्रैव श्लोकः-३२ ।
४. स्कन्ध-१/अध्याय-१०/श्लोक-२७ ।
५. स्कन्ध-२/अध्याय-२/श्लोक-६ ।
६. तत्रैव श्लोक-१६ ।
७. तत्रैव श्लोक-१७ ।

द्वितीयस्कन्धे ब्रह्मणा निरूपितमद्वैततत्त्वं मननीयं श्रीमद्भिः—

शश्वत् प्रशान्तमभयं प्रतिबोधमात्रं शुद्धं समं सदसतः परमात्मतत्त्वम् ।
शब्दो नु यत्र पुरुकारकवान् क्रियार्थो माया परैत्यभिमुखे च विलज्जमाना[1] ।
तद् वै पदं भगवतः परमस्य पुंसो ब्रह्मेति यद् विदुरजस्रसुखं विशोकम् ।
सध्र्यङ् नियम्य यतयो यमकर्तहेतिं जह्युः स्वराडिव निपानखनित्रमिन्द्रः[2] ।।

सर्वोत्पत्तिकारणभूतोऽपि परमात्मा अज इत्युच्यते । यश्च स्वयमजः सः कथं सृष्टिकर्मणि प्रवृत्तः ? एवंविधाः प्रश्नाः अपि श्रीमद्भागवते बहुत्रोपस्थापिताः । तस्य नामरूपादिहीनस्य अजनस्य अकर्तुः ब्रह्मणः प्रवृत्तौ त्रिगुणात्मिका मायैव कारणमिति समाधिरपि तत्र प्रदर्शितः ।

भक्तिमार्गानुसारं भगवतः पर-नित्य-विभवान्तर्याम्यर्चारूपेण पञ्चविधरूपाणि भवन्ति ।

भक्ताः सर्वेषु रूपेषु भगवद्रूपेण समानां श्रद्धां धारयन्ति । तत्र मोक्षावाप्तिदशायामपि भगवतो नित्यकैङ्कर्यत्वमेव काङ्क्षितम् । तद्विपरीता श्रीमद्भागवतोक्तिरवलोकनीया श्रीमद्भिः—

आर्चादावर्चयेत्तावदीश्वरं मां स्वकर्मकृत् ।
यावन्न वेद स्वहृदि सर्वभूतेष्ववस्थितम्[3] ।।

न केवलमेतदेवापि तु यः स्वात्म-परात्मनोर्भेदं पश्यति, तत्र पार्थक्यं पश्यति, तस्य भिन्नदृष्टियुतस्य कृते मृत्युरुल्बणं भयं जनयति । अद्वैतदर्शनयुक्तस्य तु न मृत्युभयं भवतीत्यपि स्पष्टतयोदीरितं श्रीमद्भागवते—

आत्मनश्च परस्यापि यः करोऽत्यन्तरोदरम् ।
तस्य भिन्नदृशो मृत्युर्विदधे भयमुल्बणम्[4] ।।

श्रीमद्भागवते परब्रह्म निरञ्जनं निर्गुणमद्वयं ज्ञप्तिमात्रं भवतीति स्पष्टतयोदीरितम् । एतेनापि श्रीमद्भागवतमद्वैततत्त्वप्रतिपादनेऽपि दत्तावधानमस्तीति सिध्यति । यथोक्तं दशमस्कन्धस्थायां मुकुन्दस्तुतौ—

तस्माद् विसृज्याशिष ईश सर्वतो
रजस्तमः सत्त्वगुणानुबन्धनाः ।

---

१. स्कन्ध-२/अध्याय-७/श्लोक-४७ ।
२. तत्रैव श्लोक-४८ ।
३. स्कन्ध-३/अध्याय-२९/श्लोक-२५ ।
४. तत्रैव श्लोक-२६ ।

निरञ्जनं निर्गुणमद्वयं परं
त्वां ज्ञप्तिमात्रं पुरुषं व्रजाम्यहम्[१] ।।

कपिलोपाख्याने श्रेष्ठभागवतवर्णनप्रसङ्गे निगदितम्—

सर्वभूतेषु यः पश्येद् भगवद्भावमात्मनः ।
भूतानि भगवत्यात्मन्येष भागवतोत्तमः[२] ।।

जीवमुक्तपुरुषलक्षणं प्रतिपादयता समुल्लिखितं वेदव्यासमहोदयेन—

सर्वत्रात्मेश्वरान्वीक्षां कैवल्यमनिकेतताम् ।
विविक्तचीरवसनं सन्तोषं येन केनचित्[३] ।।

यथोपनिषदि मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यतीत्यादिवचनैर्द्वैत-निराकरणपूर्वकमद्वैतं व्यवस्थापितम्, तथैव श्रीमद्भागवतकारा अपि पारमार्थ्येनाद्वैतं प्रतिष्ठापयितुमीहन्त इति प्रतीयते। अवलोकनीयं श्रीमद्भागवतम्—

एक एव परो ह्यात्मा भूतेष्वात्मन्यवस्थितः ।
यथेन्दुरुदपात्रेषु भूतान्येकात्मकानि च[४] ।।

श्रीमद्भागवतमहापुराणं स्ववैशिष्ट्येन वस्तुतः सर्वाण्यन्यपुराणान्यतिशेते। विषयदृष्ट्या भाषादृष्ट्या च न किमपि श्रीमद्भागवतसमतां लब्धुं प्रभवति। अन्यानि पुराणानि प्रायस्तत्तत् सम्प्रदायानुयायिभिरेव समाद्रियन्ते समाश्रियन्ते च। किन्तु श्रीमद्भागवतं न केवलं द्वैतपथानुयाभिर्वैष्णवैरेव समाश्रियतेऽपि त्वद्वैतपथपथिका अपि पुराणमिदं परमश्रद्धया समुपासते। तद्रहस्यमवलोकनीयं श्रीमद्भिः—

पुरुषेश्वरयोरत्र न वैलक्षण्यमनागपि ।
तदन्यकल्पनाऽपार्था ज्ञानं च प्रकृतेर्गुणः[५] ।।

अपि च

आत्मैव तदिदं विश्वं सृज्यते सृजति प्रभुः ।
त्रायते त्राति विश्वात्मा ह्रियते हरतीश्वरः[६] ।।

अपि च—

---

१. स्कन्ध-१०/अध्याय-५१/श्लोक-५७।
२. स्कन्ध-११/अध्याय-२/श्लोक-४५।
३. स्कन्ध-११/अध्याय-३/श्लोक-५२।
४. स्कन्ध-११/अध्याय-१८/श्लोक-३२।
५. स्कन्ध-११/अध्याय-२२/श्लोक-११।
६. स्कन्ध-११/अध्याय-२८/श्लोक-६।

तस्मान्न ह्यात्मनोऽन्यस्मादन्यो भावो निरूपितः ।
निरूपितेयं त्रिविधा निर्मूला भातिरात्मनि[१] ।।

इत्थं समासेन श्रीमद्भागवतेऽद्वैतपरिशीलनमिति शीर्षकेण प्राथम्येनात्राद्वैत-सिद्धान्तोल्लेखः यत्र तत्र समुज्जृम्भत इति सप्रमाणं निरूपितम्। तच्चाद्वैततत्त्वं कुत्र कुत्र कया रीत्या कस्मिन् प्रसङ्गे निरूपितम्। ब्रह्मसूत्रदृष्ट्यात्र को भेदः ? शङ्कराद्वैतेन च किमस्य वैलक्षण्यम्। प्रातिभासिक-व्यावहारिक-पारमार्थिकसत्तानां निरूपणं विवर्तवाद-परिणामवादविवेचनमित्यादयोऽद्वैतवेदान्तविषयाः कियन्मात्रयात्र विवेचिता इति बोधार्थं कश्चन विशिष्टः प्रयत्न आवश्यकः। समुद्रे रत्नांस्तित्वबोधानन्तरमेव तत्प्राप्तये यतते लोकस्तथैवात्राप्यस्माभिः प्राथमिक-प्रयत्नेनैवाद्वैततत्त्वस्य प्रबलोल्लेखः समधिगतः। साम्प्रतमेतस्य लेखस्योपसंहार चिकीर्षामि पद्येनैकेन भागवतीयेन—

न यत्र वाचो न मनो न सत्त्वं
तमो रजो वा महदादयोऽमी ।
न प्राणबुद्धीन्द्रियदेवता वा
न सन्निवेशः खलु लोककल्पः[२] ।।

---

१. स्कन्ध-११, अध्याय-२८ श्लोक-७।
२. स्कन्ध-१२/अध्याय-४/श्लोक-२०।

श्रीमद्भागवते षोडशकलाविशिष्टः श्रीकृष्णः

डॉ. भगवतशरणशुक्लः

❁❁❁

ऋषयो मनवो देवा मनुपुत्रा महौजसः ।
कलाः सर्वे हरेरेव सप्रजापतयस्तथा ।।
एते चांशकलाः पुंसः कृष्णस्तु भगवान् स्वयम् ।
इन्द्रारिव्याकुलं लोकं मृडयन्ति युगे युगे[1] ।।

भगवतो श्रीमन्नारायणस्य यद्यपि बहवोऽवताराः सन्ति । येषु केचन कलावताराः केचनांशावताराः केचन पूर्णावताराः । तत्र ऋषिमनुदेवप्रभृतयः पूर्वोक्ताः कलावताराः वराहनृसिंहकच्छपप्रभृतयः रामकृष्णभिन्नाः चतुर्विंशतिसंख्याकाः अंशावताराः सन्ति रामस्य कृष्णस्य चावतारः पूर्णावतारः भगवतः श्रीरामस्य मर्यादापुरुषोत्तमावतारो भगवतश्श्रीकृष्णस्यावतारो लीलापुरुषोत्तमरूपश्च विद्यते ।

श्रीमद्भागवतपुराणं भगवतश्श्रीन्नारायणस्य वासभूमिरस्ति । उक्तं च तथा पद्मपुराणे—

इत्युद्धववचः श्रुत्वा प्रभाषेऽचिन्तयद्धरिः ।
भक्तावलम्बनार्थाय किं विधेयं मयेति च ।।
स्वकीयं यद्भवेत् तेजस्तच्च भागवतेऽधात् ।
तिरोधाय प्रविष्टोऽयं श्रीमद्भागवतार्णवम् ।।
तेनेयं वाङ्मयी मूर्त्तिः प्रत्यक्षा वर्त्तते हरेः ।
सेवनाच्छ्रवणात् पाठाद्दर्शनात् पापनाशिनी[2] ।।

एतस्मिन् पुराणे माधवरूपश्रीमन्नारायणचरितवर्णनसन्निधाने गङ्गायमुना-सरस्वतीस्वरूपतां ज्ञानवैराग्यभक्तीनां त्रिवेणी प्रवहन्ती विद्यते । यत्र भावुकाः रसिका अवगाहनं विधाय स्वमानवजीवनं सफलयन्ति । श्रीमन्नारायणस्य अवताराः वराहमत्स्य-

---

१. श्रीमद्भागवते १/३/२७,२८ ।
२. श्रीमद्भागवतमाहात्म्ये ३/६०-६२ ।

विष्णुकूर्मप्रभृतिषु विविधेषु पुराणेषु यथा वर्णिताः, तथैव श्रीमद्भागवतेऽपि वर्णिताः, किन्तु श्रीमद्भागवते तेषामवताराणां वर्णनमर्थवादवाक्यगुम्फनविरहितं सत्यनिष्ठं विद्यते। तथैव भगवतः श्रीकृष्णस्य वैभवमपि वास्तविकत्वेनैव वर्णितम्। प्रतिजानाति च तथा स्वयं श्रीमद्भागवतकारः—

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्।
श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिश्शुश्रूषुभिस्तत्क्षणात्[1] ।।

अनेन ज्ञायते यत् श्रीमद्भागवतपुराणे यत्किमपि वर्णितं तत्सर्वं सत्यादतिरिक्तं नास्ति। श्रीमन्नारायणस्य यद्यपि सर्वेऽपि अवताराः उपास्याः भक्तजनैस्तथापि भगवति रामे भगवति कृष्णे च तेषां श्रद्धाभक्त्योरतिशयत्वमवलोक्यते। यथा शुष्कतृणपुञ्जदहने अल्पोऽप्यग्निस्तथैव समर्थः यथा दावाग्निः। किन्तु यस्य समीपे अधिकमिन्धनं भवति तस्य स्वरूपं बृहद् दृश्यते, यस्य च पार्श्वेऽल्पमिन्धनं भवति तस्य स्वरूपमपि सूक्ष्मं दृश्यते। एवमेव यस्यावतारप्रयोजनमल्पकार्यसम्पादनायासीत् तस्य लीलाः अल्पाः सञ्जाताः यस्य प्रयोजनमधिककार्यसम्पादनायासीत्, तस्य लीला अपि अधिकाः सञ्जाताः। एताः लीला एव तेषामवताराणां कलाविशेषो वक्तुं शक्यन्ते। इत्थं नास्ति यदवतारेषु सामर्थ्यभेदो विद्यते। परशुरामः रामश्च यथा एकस्यैव नारायणस्यावतारौ किन्तु रामस्यावतारस्य प्रयोजनानि बहूनि आसन् फलतस्तेषां सम्पादनाय परशुरामस्यापि योगदानं सञ्जातं तेनाल्पमतयो जनाः परशुरामाद्राममधिकं वदन्ति। किन्तु तत्त्वत उभावपि एकमेव श्रीमन्नारायणस्य तत्त्वरूपे वर्तेते। प्रयोजनानुसारेण श्रीमन्नारायणस्स्वेष्ववतारेषु कलाः प्रकटयति।

परब्रह्मणः षोडश कलाः सन्तीति सर्वे वेदादिसद्ग्रन्थाः वदन्ति। यथा यजुर्वेदे—

'यस्माज्जातं न पुरा किं च नैव य आबभूव भुवनानि विश्वा प्रजापतिः प्रजया सः रयाराजस्त्रीणि ज्योतींषि सचते स षोडशी'[2]। अर्थाद् यस्माद् ब्रह्मणः पूर्वं किञ्चन= किमपि न जातमेव यश्च प्रजापतिरूपः परमात्मा (परम्ब्रह्म) सर्वाणि भुवनानि समन्ताद् भावयामास। स षोडशी = षोडशावयवलिङ्गशरीरी प्रजापतिः स्वोत्पादितप्रजया सह रममाणः सूर्यचन्द्राग्निरूपाणि त्रीणि ज्योतींषि सचते = सेवते।

प्रश्नोपनिषदि ऋषिः कथयति 'षोडश कलं भारद्वाज पुरुषं वेत्य........तस्मै स होवाच। इहैवान्तःशरीरे सोम्य स पुरुषो यस्मिन् नेताः षोडश कलाः प्रभवन्तीति'

१. श्रीमद्भागवते १/१/२।
१. यजुर्वेदे ३२/५।

काश्च ताः इति प्रश्ने कथयति यत् 'स प्राणमसृजत प्राणाच्छ्रद्धां खं वायुर्ज्योतिरापः पृथिवीन्द्रियं मनोऽन्नमन्नाद्वीर्यं तपो मन्त्रः कर्म लोका लोकेषु च नाम च'[१]।

अनेनात्र प्राणाः श्रद्धा आकाशं वायुः ज्योतिः, जलं पृथिवी इन्द्रियं, मनः, अन्नं वीर्यं तपः मन्त्रः, कर्म, लोकः, नाम इति षोडश कलाः फलिताः भवन्ति। एताभिः कलाभिः विशिष्टः परमात्मा अण्डजपिण्डजस्वेदजोद्भिज्जेति चतुर्विधेषु योनिषु जीवान् उत्पादयति। तत्र स्वेदजजीवाः प्राणमपकलातः विशिष्टाः मक्षिकामशकजूलीक्षा-प्रभृतयोऽन्नकोशरूपकलया स्वकर्म विदधति। तथैवाण्डजाः पक्षिसरीसृपप्रभृतयो जीवाः, अन्नप्राणाभ्यां सह मनोमयकलातो विकसितः स्वकार्यं सम्पादयन्ति एवमेमोद्भिज्जा अपि अन्नमेव (भोजनमेव) वाञ्छन्तो वृक्षलतागुल्मवनस्पतयः स्वकीयं प्रयोजनमन्नकलातः साधयन्ति। जरायुजयोनिषु प्रमुखाः पशवो मनुष्याश्च भवन्ति। तत्र पशुषु अन्नप्राणमनोभिः सह विज्ञानमयकला अतिरिक्ता भवति। तेनैतेषु वैचारिकगुणानां विकासो दृश्यते। अत एव श्वाश्वहस्तिकपिषु मानववत् कासाञ्चित् क्रियाणां स्वामिभक्तित्वादीनां विविधमनोरञ्जककलाशिक्षण-प्रगतिश्च दृश्यते। अत एव पशुभिर्बहुज्ञाः अनेकाः कलाः प्रदर्शयन्ति।

मानवोऽन्नप्राणमनोविज्ञानरूपाभिश्चतुष्कलाभिः सह आनन्दमयकलया सह अतिशायिनी, विपरिणामिनी सङ्क्रमिणी इति कलाभिरपि विशिष्टः सन् सम्पूर्णब्रह्माण्डस्य प्रतिनिधिर्भवति। इत्थं पूर्वोक्ताः अष्टौ कलाः मानवेषु चतस्रोऽन्तप्राणमनोविज्ञानमपकलाः पशुषु, तिस्रोऽन्नप्राणमनोमयकलाः अण्डजेषु पक्षिसरिसृपप्रभृतिषु, द्वेऽन्नप्राणमयकले स्वेदजमक्षिकामशकजूलीक्षाप्रभृतिषु एकान्नमयकला उद्भिज्जेषु वृक्षलतागुल्मवनस्पतिषु भवति। भगवतोऽवतारेषु चैताभिः अष्टाभिः सह अन्याः कलाः यावत्यः प्रयोजनानुसारेण भासन्ते तावद् वैशिष्ट्यमवताराणां समुपासकेषु प्रज्ञेषु दृश्यते। रामावतारे तावद् अत्यधिकप्रयोजन-साधनस्य सत्त्वाद् द्वादशकलाः कृष्णावतारे च सर्वाधिकप्रयोजनसाधनस्य सत्त्वात् तत्र षोडश कलाः आयान्ति। ताश्च षोडशकला अखिले ब्रह्मनिर्मिते ब्रह्माण्डे सन्ति ब्रह्मस्वरूपत्वाद् ब्रह्माण्डस्य। अत एव श्रीकृष्णः पूर्णं ब्रह्मणोऽवतार इति विज्ञाः वदन्ति।

षोडशकलानां विषयेऽपि विभिन्नाः प्रकारा दृश्यते। यथा प्रश्नोपनिषदि पूर्वोक्ताः अन्नप्राणमनोनभोवायुज्योतिजलपृथिवीन्द्रियवीर्यतपोमन्त्रश्रद्धाकर्मलोकनामप्रभृतयः सन्ति। एवमेव धर्मदिग्दर्शने माधवाचार्योऽन्नप्राणमनोविज्ञानानन्दातिशायिनी विपरिणामिनी विकासिनी मर्यादिनी संह्लादिन्याह्लादिपरिपूर्णस्वरूपावस्थितरूपाः षोडशकलाः कथितवान्[२]। एकत्र च—

---

१. प्रश्नोपनिषदि षष्ठे प्रश्ने।

२. द्वितीयभाग पृ. ३७५।

अमृता मानदा पूषा तुष्टिः पुष्टी रतिर्धृतिः ।
शशिनी चन्द्रिका कान्तिर्ज्योत्स्ना श्रीः प्रतिरङ्गदा ।।
पूर्णा पूर्णामृता कान्तिदायिनी स्वरजाः कलाः ।

एषाः षोडशकलाः एवम्भूताः लिखिताः सन्ति । एवमेव जैमिनीयोपनिषदि च—

स (प्रजापतिः) षोडषधाऽऽत्मानं व्यकुरुत भद्रं च समाप्तिश्चाऽभूतिश्च सम्भूतिश्च भूतं च सर्वं च रूपं चापरिमितं च श्रीश्च यशश्च नामाग्रं च सजाताश्च पयश्च महीया च रसश्च[१] शतपथब्राह्मणेऽपि षोडशकलः प्रजापतिः' इत्युल्लिखितमस्ति[२] ।

एकत्र चैताः श्रीमालिनीविजयोत्तरतन्त्रे पूर्वोक्तनामभिः किञ्चिद्भिन्नत्वेन परिगणिता प्राप्ताः—

सिद्धिः ऋद्धिर्द्युतिर्लक्ष्मीः मेधा कान्तिः स्वधा धृतिः ।
दीप्तिः पुष्टिर्मतिः कीर्तिः संस्थितिः सुगतिस्स्मृतिः ।।

सुप्रभा षोडशी कलाः[३] । एवमेव षोडशमातृकाविषयेऽपि चेद् विचारयामः तर्हि ता अपि परब्रह्मण कला इव प्रतीयन्ते । ताश्चैवम्भूताः

गौरी पद्मा शची मेधा सावित्री विजया जया ।
देवसेना स्वधा स्वाहा मातरो लोकमातरः ।।
धृतिः पुष्टिस्तथा तुष्टिरात्मनः कुलदेवताः[४] ।।

एतासां सर्वासां समन्वयः सम्बन्धश्च कथम्भूत इत्यपि विचारणीयं भवति । यद्यपि एतासां सर्वासां समन्वयविधानमतीव कठिनं तथापि निजबुद्ध्या एतदर्थं कश्चित् प्रयासो विहितस्तत्र बुधा एव प्रमाणम् ।

अत्र मातृकाः षोडशकलानामधिदेवताः स्वीकरणीयाः । प्रश्नोपनिषदि च याः ब्रह्मणः कलाः, याश्च जैमनीयोपनिषदि प्रोक्ताः तासां नामतो भिन्नतायाः सत्त्वेऽपि तात्पर्यतः ऐक्यं भवितुमर्हति । एवमेव सातवलेकरप्रोक्ताः माधवाचार्यप्रोक्ता, अथ च मालिनीविजयोत्तरतन्त्रप्रोक्ताः कलाः याः सन्ति तासामपि तात्पर्यतः समानता स्थापयितुं शक्यते ।

---

१. शुक्लयजुर्वेदे सातवलेकरटीकायां ३२.५ इति मन्त्रे ।
२. जैमिनीयोप. १.४६.२ ।
३. श. प. ७.२.२.१७ ।
४. मालिनी वि. ।

षोडशकलाविवरणभेदाः समन्वयश्च

क्रम.	मातृका	पृथक्मत	प्रश्नोपनिषद्	मालिनीविजयोत्तरतन्त्र	माधवाचार्य	जैमनीयोपनिषद्
१	गौरी	शशिनी	आकाशम्	सिद्धि	अन्नम्	भद्रम्
२	पद्मा	अङ्गद	जल्म्	ऋद्धि	प्राणाः	समाप्तिः
३	शची	पूषा	अन्नम्	द्युतिः	मनः	आभूतिः
४	मेधा	अमृता	मनः	मेधाः	विज्ञानम्	सम्भूतिः
५	सावित्री	ज्योत्स्ना	अग्निः	लक्ष्मीः	आनन्द	यशः
६	विजया	मानद	तपः	दीप्तिः	अतिशायिनी	भूतः
७	जया	तुष्टि	इन्द्रियम्	मतिः	विपरिणामिनी	रूपम्
८	देवसेना	कान्तिः	वायुः	कान्तिः	सङ्क्रमिणी	सर्वम्
९	स्वधा	रतिः	प्राणः	स्वधा	प्रभ्वी	अपरिमिता
१०	स्वाहा	प्रीतिः	कर्म	स्मृतिः	कुण्ठिनी	सञातः
११	मातरः	चन्द्रिका	नाम	सुगतिः	विकासिनी	नाम
१२	लोकमातरः	पूर्णा	पृथिवी	संस्थितिः	मर्यादिनी	महीया
१३	धृतिः	धृतिः	वीर्यम्	धृतिः	संह्लादिनी	अन्नम्
१४	पुष्टि	पुष्टि	मन्त्रः	पुष्टि	आह्लादिनी	पयः
१५	तुष्टि	श्रीः	लोकः	कीर्तिः	परिपूर्णा	श्रीः
१६	आत्मकुलदेवता	पूर्णामृता	श्रद्धा	सुप्रभाः	स्वरूपावारिणी	रसः

भगवति श्रीकृष्णे काश्च ताः षोडशकलाः सन्ति। कासां विवेचनं श्रीमद् भागवते समागतमिति विचारणीयमस्ति। भगवति कृष्णे सर्वेषां गुणानां कलानां च पराकाष्ठा विद्यते। तमेव प्राप्य ताः कलाः कलाः भवन्ति, तथापि भगवतः श्रीकृष्णस्य याः भक्तजनमनोहारिण्यो लीलाः सन्ति ताभिः षोडशकलाः बोध्याः भवन्ति। यद्यपि कलानां षोडशधा परिगणनं पञ्चभिर्भेदैर्विहितम्। समासां स्वरूपं वैशद्येन समीक्ष्यते तर्हि ग्रन्थ एव एको भविष्यति, तथापि जैमिनीयोपनिषदो वर्णिताः याः कलास्तदाधारेण स्वरूपं वर्ण्यते।

१. भद्रम्–भद्रमित्यस्य भजनीयत्वं कल्याणकरत्वमित्यर्थः, भगवान् श्रीकृष्णो भक्तैस्सदा आराध्यते। बहुत्र च समाराधनविषये लिखितमस्ति। उदाहरणाय प्रथमस्कन्धस्य द्वितीयाध्यायस्य काश्चन पङ्क्तयो दीयन्ते—

> भेजिरे मुनयोऽथाग्रे भगवन्तमधोक्षजम्।
> सत्त्वं विशुद्धं क्षेमाय कल्पन्ते येऽनु तानिह।।
> मुमुक्षवो घोररूपान् हित्वा भूतपतीनथ।
> नारायणकलाः शान्ता भजन्ति ह्यनसूयवः।।
> रजस्तमःप्रकृतयः समशीला भजन्ति वै।
> पितृभूतप्रजेशादीन् श्रियैश्वर्यप्रजेप्सवः[1]।।

---

१. श्रीमद्भागवते १/२/२५-२७।

एतस्याः कलायाः दशमस्कन्धेऽप्येकमुदाहरणमवलोकनीयम्,

वाणी गुणानुकथने श्रवणौ कथायां
हस्तौ च कर्मसु मनस्तव पादयोर्नः ।
स्मृत्यां शिरस्तव निवासजगत् प्रणामे
दृष्टिः सतां दर्शनेऽस्तु भवत्तनूनाम् ।

२. समाप्तिः–सम्=सम्यक्, आप्तिः= समस्तगुणसम्पन्नता इति समाप्ति-पदस्य तात्पर्यमायाति । भगवान् श्रीकृष्णः समस्तकल्याणगुणगुणाकरो भवति । एतस्याः कलाया उदाहरणाय काश्चन पङ्क्तयो दीयन्ते—

वासुदेवपरा वेदा वासुदेवपरा मखाः ।
वासुदेवपरा योगा वासुदेवपरा क्रियाः ।।
वासुदेवपरं ज्ञानं वासुदेवपरं तपः ।
वासुपरो धर्मो वासुदेवपरा गतिः ।।
स एवेदं ससर्जाग्रे भगवानात्ममायया ।
सदसद्रूपया चासौ गुणमय्या गुणो विभुः ।।
तथा विलसितेष्वेषु गुणेषु गुणवानिव ।
अन्तःप्रविष्ट आभाति विज्ञानेन विजृम्भितः[१] ।।

दशमस्कन्धस्थमप्येकमुदाहरणं दर्श्यते—

गुणात्मनस्तेऽपि गुणान् विमातुं हितावतीर्णस्य ईशिरेऽस्य ।
कालेन यैर्वा विमिता सुकल्पैर्भूपांसवः खे मिहिका सुभाषः[२] ।।

३. आभूतिः–आ समन्ताद् भूति= जीवानां जडचेतनानां समुद्भवो यस्माद् असौ आभूतिः । जडचेतनात्मकजगतः समुत्पादनकला एव आभूतिरिति वक्तुं शक्यते । एतस्याः उदाहरणमेकमित्थं विद्यते—

त्वया सृष्टमिदं विश्वं धातर्गुणविसर्जनम् ।
नानास्वभाववीर्यौजो योनिबीजाशयाकृति[३] ।।

४. सम्भूतिः–सम्—सम्यक्, भूतिः संरक्षणं (जीवानां) यस्मादसौ कलाविशेषः सम्भूतिर्भवति । अर्थाद् भगवान् तया कलया समस्तजडचेतनात्मकं जवात् सम्पाथयति । इन्द्रकोपानलेन हि समस्तव्रजस्य रक्षणं कृष्णो गोवर्धनगिरिमुत्थाप्य कृतवान्—

---

१. श्रीमद्भागवते १.२.२८-३१ ।
२. श्रीमद्भागवते १०.१४.७ ।
३. श्रीमद्भागवते १०.१६.५७ ।

न हि सद्भावयुक्तानां सुराणामीश विस्मयः ।
मत्तोऽसतां मानभङ्गः प्रथमायोपकल्पते ।।
तस्मान्मच्छरणं गोष्ठं मन्नाथं मत्परिग्रहम् ।
गोपा ये स्वात्मयोगेन सोऽयं मे व्रत आहितः ।।
इत्युक्त्वैकेन हस्तेन कृत्वा गोवर्धनाचलम् ।
दधार लीलया कृष्णश्छत्राकमिव बालकः[१] ।।

५. **भूतम्**—सृष्टिः भूयते उत्पद्य लीयते येन कलाविशेषेण तत् कलारूपं भूतं भवति । अनयैव कलया भगवान् श्रीकृष्णः कालरूपः सृष्टिं संहरति । भूमिभाराहरणमयमनयैव । दुष्टान् जीवान् हन्ति साधून् च परिपाति । एतस्याः कलाया उदाहरणमद्वयवलोकनीयम्—

१. आत्मानमेवात्मतया विजानतां तेनैव जातं निखिलं प्रपञ्चं ज्ञानेन भूयोऽपि च तत्प्रलीयते रज्ज्वामहेर्भोगमवाभवौ यथा[२] ।

निरीक्ष्य तद्बलं कृष्ण उद्वेलमिव सागरम् ।
स्वपुरं तेन संरुद्धं स्वजनं च भयाकुलम् ।।
चिन्तयामास भगवान् हरिः कारणमानुषः ।।
तद्देशकालानुगुणं स्वावतारप्रयोजनम् ।।
हनिष्यामि बलं ह्येतद् भुवि भारं समाहितम् ।
मागधेन समानीतं वश्यानां सर्वभूभुजाम् ।।
एतदर्थोऽवतारोऽयं भूभारहरणाय मे ।
संरक्षणाय साधूनां कृतोऽन्येषां बधाय च[३] ।।

६. **सर्वम्**—सर्वः परिपूर्णः यः सर्वात्मिकया कलाया खिलप्रपञ्चं स्वात्मनि दधाति तत्र चान्तःप्रविष्टः स एव सर्वोऽपि भवति यथा विष्णुसहस्रनामस्तोत्रे—"सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः" इति[४] । एतस्याः कलायाः उदाहरणमेवमस्ति—

कृष्ण ! कृष्ण ! महोयोगिंस्त्वमाद्यः पुरुषः परः ।
व्यक्ताव्यक्तमिदं विश्वं रूपं ते ब्राह्मणा विदुः ।।
त्वमेकः सर्वभूतानां देहास्वात्मेन्द्रियेश्वरः ।
त्वमेव कालो भगवान् विष्णुरव्यय ईश्वरः ।।

---

१. श्रीमद्भागवते, १०.१४.१७-१९ ।
२. तत्रैव १०.१४.२५ ।
३. तत्रैव १०.५०.५-९ ।
४. वि. स. १९ ।
५. श्रीमद्भागवते १०.१०.२९-३१ ।

त्वं महान् प्रकृतिः सूक्ष्मा रजःसत्त्वतमोमयी ।
त्वमेव पुरुषोऽध्यक्षः सर्वक्षेत्रविकारवित् ।।

७. रूपम्–रूप्यते ज्ञायतेऽनुभूयते इन्द्रियविषयो यथा सा रूपवाच्या कला कथ्यते। अनया कलया कृष्णोऽखिलविषयाणामाधारो भवति। उदाहरणमेतस्यैवम्भूतमस्ति—

उपहृत्य बलीन् सर्वानादृता यवसं गवाम् ।
गोधनानि पुरस्कृत्य गिरिं चक्रुः प्रदक्षिणम् ।।
अनास्यनडुद्युक्तानि ते चारुह्य स्वलङ्कृताः ।
गोप्यश्च कृष्णवीर्याणि गायन्त्यः स द्विजाशिषः ।।
कृष्णस्त्वन्यतमं रूपं गोपविश्रम्भणं गतः ।
शैलोऽस्मीति ब्रुवन् भूरि बलमाददबृहद्वपुः[1] ।।

८. अपरिमितम्–न परिमीयते मनोवाणीबुद्धिभिः यः सः अपरिमितः श्रीकृष्णः अपरिमितं ब्रह्म च भवति। उदाहरणमेतस्यैवम्भूतमस्ति—

नतोऽस्म्यहं त्वाखिलहेतुभूतं नारायणं पूरुषमाद्यमव्ययम् ।
यन्नाभिजातादरविन्दकोशाद् ब्रह्माऽविरासीद् यत एष लोकः ।।
भूस्तोयमग्निः पवनः खमादिर्महानजादिर्मन इन्द्रियाणि ।
सर्वेन्द्रियार्था विबुधाश्च सर्वे ये हेतवस्ते जगतोऽङ्गभूताः ।।
नैते स्वरूपं विदुरात्मनस्ते ह्यजादयोऽनात्मतया गृहिताः ।
अजोऽनुबद्धः स गुणैरजाया गुणात् परं वेद न ते स्वरूपम् ।।
त्वां योगिनो यजन्त्यद्धा महापुरुषमीश्वरम् ।
साध्यात्मं साधिभूतं च साधिदैवं च साधवः[2] ।।

९. श्रीः–शोभातिशयत्वमेव श्रीः। सा च भगवतः श्रीकृष्णस्य न तथा कस्मिन्नपि। यस्य रूपमाधुरीं दृष्ट्वा सर्वेऽपि मुह्यन्ति। बहुषु स्थलेषु श्रीमद्भागवते एतस्य वर्णनमायाति। उदाहरणमित्थमस्ति गोपीगीते—

मधुरया गिरा वल्गुवाक्यया बुधमनोज्ञया पुष्करेक्षण ।
विधिकरीरिमा वीरमुह्यतीरधरसीधुनाऽप्यापयस्व नः ।।
तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहम् ।
श्रवणमङ्गलं श्रीमदाततं भुवि गृणन्ति ते भूरिदा जनाः ।।

---

१. श्रीमद्भागवते १०.२४.३३-३५ ।
२. तत्रैव १०.४०.१-४ ।

प्रहसितं प्रिय प्रेमवीक्षणं विहरणं च ते ध्यानमङ्गलम् ।
रहसि संविदो या हृदिस्पृशः कुहक नो मनः क्षोभयन्ति हि ।।
चलसि पद् ब्रजाच्चारयन् पशून् नलिनसुन्दरं नाथ ते पदम् ।
शिलतृणाङ्कुरैः सीदतीति नः कलिलतां मनः कान्त गच्छति[१] ।।

१०. यशः–विविधसत्कर्मविधानमेव यशोवर्धनकला । सा च वेदगोविप्रसाधु-परिरक्षणयागविधानदुष्टदलनरूपास्ति । श्रीकृष्णस्य तादृशीं स्वभावपद्धतिमवगम्य महर्षिः गुरुः सान्दीपनिरपि आशीर्वचोभिर्भूषयति—

सम्यक् सम्पादितो वत्स भवद्भ्यां गुरुनिष्क्रयः ।
को न युष्मद्विधगुरोः कामानामवशिष्यते ।।
गच्छतं स्वगृहं वीरौ कीर्तिर्वामस्तु पावनी ।
छन्दांस्ययातयामानि भवन्त्यिह परत्र च ।।

अयमाशीर्वादो भगवतः श्रीकृष्णस्य पूर्णतया फलितः । तस्य लोकपावनी कीर्तिः सर्वत्र विद्यते । सर्वेऽपि जनाः तस्य चरितं संस्मृत्य गायित्वा चात्मानं पावयन्ति ।

(११) नाम–सर्वेषां नामानि सन्ति यस्माद् असौ नाम । अर्थाद् येनैव सर्वे नाम धारिणो भवन्ति । उदाहरणमेतस्याः नाम कलाया इत्थमस्ति—

दृष्टं श्रुतं भूतभवद्भविष्यत् स्थास्नुश्चरिष्णुर्महदल्पकं च ।
विनाच्युताद् वस्तु तरां न वाच्यं स एव सर्वं परमार्थभूतः[२] ।।

(१२) अग्रम्–सर्वासां क्रियाणां प्राथम्यं यया कलया सा अग्रनाम्नी कला भवति । सा भगवति कृष्णेऽस्ति । अत एव सः सर्वमपि श्रुत्वा ज्ञात्वा शीघ्रमेव सर्वत्र अग्रे भवति । गुरोः सान्दीपनेः आश्रमे वसन् सर्वासु विद्यासु कलासु चाग्रगामी भवति—

प्रभवौ सर्वविद्यानां सर्वज्ञौ जगदीश्वरौ ।
नान्यसिद्धामलज्ञानं गूहमानौ नरे हितैः ।।
यथोपसाद्य तौ दान्तौ गुरौ वृत्तिमनिन्दिताम् ।
ग्राहयन्तावुपेतौ स्म भक्त्या देवमिवादृतौ ।।
तयोर्द्विजवरस्तुष्टः शुद्धभावानुवृत्तिभिः ।
प्रोवाच वेदानखिलान् साङ्गोपनिषदो गुरुः ।।
सरहस्यं धनुर्वेदं धर्मान् न्यायपथांस्तथा ।
तथा चान्वीक्षिकीं विद्यां राजनीतिं च षड्विधाम् ।।

---

१. श्रीमद्भागवते १०.३१.८-११ ।
२. तत्रैव १०.४६.४३ ।

सर्वं नरवरश्रेष्ठौ सर्वविद्याप्रवर्तकौ ।
सकृन्निगदमात्रेण तौ सञ्जगृहतुर्नृप ।।
अहोरात्रैश्चतुःषष्ट्या संयतौ तावतीः कलाः ।
गुरुदक्षिणयाचार्यं छन्दयामासतुर्नृप[1] ।।

(१३) सजातः–जाताभिः शक्तिभिः सह वर्तत इति सजातः एतस्योहारण-मेवम्भूतमस्ति—

सृजस्यथो लुम्पसि पासि विश्वं रजस्तमः सत्त्वगुणैः स्वशक्तिभिः ।
न बाध्यसे तद्गुणकर्मभिर्वा ज्ञानात्मनस्ते क्व च बन्धहेतुः ।।
देहाद्युपाधेरनिरूपितत्वाद् भवो न साक्षान्नभिदात्मनः स्यात् ।
अतो न बन्धस्तव नैव मोक्षः स्यातां निकामस्त्वयि नोऽविवेकः ।।

(१४) पयः–पीयन्ते लीयन्ते पञ्च भूतानि यया कलया यस्मिन् पुरुषविशेषे सा पयः कला भवति । एतस्योदाहरणमिदमस्ति—

त्वं हि ब्रह्म परं ज्योतिर्गूढं ब्रह्मणि वाङ्मये ।
यं पश्यन्त्यमलात्मान आकाशमिव केवलम् ।।
नाभिर्नभोऽग्निर्मुखमम्बरेतौ द्यौः शीर्षमाशा श्रुतिरङ्घ्रिरुर्वी
चन्द्रो मनो यस्य दृगर्क आत्मा अहं समुद्रं जठरं भुजेन्द्रः ।।
रोमाणि यस्यौषधयोऽम्बुवाहाः केशा विरिञ्चोधिषणा विसर्गः ।
प्रजापति हृदयं यस्य धर्मः स वै भवान् पुरुषो लोककल्पः ।।

१५. महीया–मायापतिः समस्तकर्मचक्रप्रवर्त्तको भवति यया कलया ब्रह्म सा महीया कला भवति । एतस्या उदाहरणमित्थमस्ति—

यस्याङ्घ्रिपङ्कजरजोऽखिललोकपालैर्मौल्युत्तमैर्धृतमुपासिततीर्थतीर्थम् ।
ब्रह्मा भवोऽहमपि यस्य कलाः कलायाः श्रीश्चोद्वहेम चिरमस्य नृपासनं क्व।।

१६. रसः–रस्यते आनन्द्यते यया स्वात्मनि यया कलया सा रस कला कथ्यते । एतस्योदाहरणं महारासो विद्यते भगवतः श्रीकृष्णस्य यत्र सः श्रुतिरूपाभिः गोपीभिः सह महारासं विहितवान्—

तत्रारभत गोविन्दो रासक्रीडामनुव्रतैः ।
स्त्रीरत्नैरन्वितः प्रीतैरन्योन्याबद्धबाहुभिः ।।

---

१. श्रीमद्भागवते १०.४५.३०-३६ ।

रासोत्सवः सम्प्रवृत्तो गोपीमण्डलमण्डितः ।
योगेश्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः ।
प्रविष्टेन गृहीतानां कण्ठे स्वनिकटं स्त्रियः ।।

इत्थमेतासां षोडशकलानामुदाहरणानि श्रीकृष्णविषयकानि बहूनि सन्ति । एताश्च कलाः यथा श्रीकृष्णे तथैव कश्चिद् रामेऽपि स्थापिताः भवितुमर्हन्ति रामस्यापि परब्रह्मस्वरूपत्वात् । रामस्यावतारः द्वादशकलानामिति प्रवादः सूर्यस्य वंशेऽवतारग्रहणादेव । यतो हि सूर्यस्य द्वादशराशिरूपकलाः भवन्ति ताः एव आदाय रामस्य द्वादश कलावतार इति प्रवादो विद्यते । श्रीकृष्णस्य चावतारः चन्द्रवंशेऽभूत् । चन्द्रस्य षोडशकलाः सन्ति, अमातः पूर्णां यावत् । अत एव श्रीकृष्णस्य षोडशकला इति प्रवादो विद्यते । श्रीमद्भागवतकारश्चापि कृष्णस्य जन्म प्राच्यां दिशि इन्दुरिव वर्णितवान्—

निशीथे तम उद्भूते जायमाने जनार्दने ।
देवक्यां देवरूपिण्यां विष्णुः सर्वगुहाशयाः ।
आविरासीद् यथा प्राच्यां दिशीन्दुरिव पुष्कलः ।।

एवम्भूतकलाविवरणं भगवतः श्रीकृष्णस्य न्यूनमेव । तस्य त्वनन्ताः कलाः सन्ति यासां विवरणविधानमसम्भवमेव, अत एवोक्तम्—**कृष्णस्तु भगवान् स्वयम्** ।

श्रीमद्भागवतबौद्धधर्मयोः कर्मवादविमर्शः

डॉ. धर्मदत्तचतुर्वेदी

❋❋❋

किमपि शास्त्रं धर्मो वा समाजे परिव्याप्तविकृतीनामुन्मूलनाय मानसिक-परिष्काराय, समतासुखशान्तिस्थापनाय, साम्प्रदायिककलहवैमत्यवारणाय सामरस्य-सदाशयसौहार्दसामञ्जस्यप्रतिष्ठापनाय मनोगततुच्छभावोत्पाटनाय विश्वमङ्गलसन्देशाय च जायते। श्रीमद्भागवतं हि सकलपुराणमौलिभूतं धर्मदर्शनसाहित्यगतविचारसारभूतं सृष्टिमारभ्य प्रलयान्तविषयप्रकाशकं त्रिलोकलोकभावकं सूक्ष्मविद्यारहस्यपरिज्ञापकं सत्यशुचितात्यागक्षमौदार्यं संस्कृतिविभावकं दानवसंस्कृतिपरिमर्दकं देवजयघोषकं सर्वविद्यागूढार्थपरिष्कारकं विद्यावतां परीक्षकं प्राच्यैतिह्यप्रकाशकं वेदोपबृंहकं श्रीकृष्णभक्तिरसायनं प्रसादगुणगुम्फितं रसपेशलं विषयवासनापवारकं परमात्मतत्त्वप्राधान्य-ख्यापकं क्रूराचरणधर्मकं दुश्चिन्तनापसारकं सामाजिकविषमतोन्मूलकं मिथ्याजीव-दम्भ कृत्रिमव्यवहारनिवर्तकं योगतपः साधनाप्रवर्तकं सांसारिकबन्धनोच्छेदकं किमपि महनीयं शास्त्रम्। बौद्धतत्त्वं (धर्मो वा) मानवसभ्यताविकासकं कारुण्याहिंसोद्भावकं जगन्मैत्रीवर्धकं समत्वादर्शज्ञापकं दण्डभयदमनकुशासनोपेक्षकं बहुजनहिताय बहुजनसुखायेति लोकयात्राकारकं जागतिकासूक्तिविधूनकं प्रज्ञापारमितया जगदन्धतमोनिवारकं बुद्धत्वपर्यवसितं चतुरार्यसत्यज्ञापकं रागद्वेषक्लेशाद्यपवारकं शीलत्यागदानधैर्यप्रवृत्तिसाधकं पूर्वबुद्धबोधिसत्त्वजन्मवृत्तप्रकाशकं मारच्छलविध्वंसकं प्रतीत्यसमुत्पादोपदेशकं निर्वाणमार्गदेशकं शून्यतायां प्रतिष्ठितमाख्यानशैलीविजृम्भितं निजभार्यासन्ततिवैभवादि-समर्पणात्मकं चित्तसन्ततिशोधकं भ्रान्त्युच्छेदकं च सद् विश्वस्मिन्नपि विश्वे प्रतिष्ठतेतराम्।

श्रीमद्भागवतं बौद्धधर्मश्चैतद्द्वयं समेत्य परिस्थित्युनुसारेण विविधकथाप्रसङ्गै-र्लोकयात्राभिश्च मानवस्य जीवस्य वा भ्रमाज्ञानवासनाप्रमादकारकं सत् तस्याभ्युदयाय निःश्रेयसे च प्रयतमानं सन्दृश्यते।

साम्प्रतं मानवव्यवहारप्रबोधनमपेक्षते। व्यवहारे कर्मणि वा प्रवृत्तौ चेतस एव मुख्यत्वम्मन्यते बौद्धधर्मे। सङ्कुचिते चेतसि सङ्कुचितप्रवृत्तयः समुदारचेतसि च समुदारवृत्तयो

लभ्यन्ते। सांसारिकविषयवासनालोभमात्सर्यसङ्कुलस्य जीवस्य मनसि नैके विकारा दूषणानि चोत्पद्यन्ते साम्प्रतम्। तस्मादेवादानसंस्कृतिः क्षीयते सामदानसंस्कृतिश्च परिवर्धते। व्यवहारे शैथिल्यं स्वार्थप्रवृत्तयः, अयुक्ता महत्त्वाकांक्षा निजोत्कर्षभावना एव विलसन्त्योऽद्य दृश्यन्ते। न परार्थः, न दाक्षिण्यम्, न च राष्ट्रसमाजसेवनं क्वचिद् दृष्टिपथमायाति। तस्मादेव महाकविक्षेमेन्द्रेणावदानकल्पलताख्ये निजकाव्ये प्रभासावदाने समुट्टङ्कितं यत् तत्रैको हस्ती प्रभासाख्यनृपेण नियन्त्रितः सुशिक्षितः सन्नपि वनविहारकाले करिणीगन्धमाघ्राय तं राजानं विहाय तामालिलिङ्ग। राजा तद्विलोक्य प्राह—

नोपदेशं न नियमं न दाक्षिण्यं न साधुताम्।
स्मरन्ति जन्तवः कामं कामस्य वशमागताः।।
केन रतिरसोत्सिक्ता विषयाभिमुखी रतिः।
अदभ्रश्वभ्रविभ्रष्टशैलकुल्येव वार्यते।।
व्यसनी पतितः सत्यं पातयत्येव दुर्जनः[१]।

ततः स द्विरदः करिणीं समालिङ्ग्य सन्तृप्य च स्वयमेव राजभवनं प्राप। तदा संयातो नृपः प्राह—

शक्या दमयितुं देव! सिंहव्याघ्रवनादयः।
न तु रागासवक्षीबविषयाभिमुखं मनः।।

बुद्धो मनश्चित्तं वा द्विपत्वेनोद्घोषितवान्। स्मृतिरज्ज्वा चित्तमतङ्गजं नियमयितुं चापि बुद्धो दिदेश। शान्तिदेवेन बोधिचर्यावतारे यथोक्तम्—

अदान्ता मातमातङ्गा न कुर्वन्तीह तां व्यथाम्।
करोति यामवीच्यादौ मुक्तचित्तमतङ्गजः।।
बद्धश्चेत् चित्तमातङ्गः स्मृतिरज्ज्वा समन्ततः।
भयमस्तङ्गतं सर्वं कृत्स्नं कल्याणमागतम्[२]।।

उन्मत्तगजवन्मनोवशीकृत्यैव भयापकरणम्, अभ्युदयो निश्रेयसश्चावाप्तुं शक्यते, सर्वत्र कल्याणवृष्टिरपि तदा सम्पत्स्यते। चित्तस्यानियन्त्रितत्वात् संसारेऽद्य हिंसावैर-भावाशान्तयो जायन्ते। बौद्धधर्मे पुनश्चित्तं बोधौ बुद्धत्वे च समाश्रीयते। बोधिचित्ते समुत्पादिते सति बोधिसत्त्वो भूत्वा बुद्धत्वं लभते।

श्रीमद्भागवते परमात्मनि श्रीकृष्ण एव चित्तमश्रीयते। तत्रैव कर्मणि समर्प्यन्ते। वैदिकं कर्म द्विधा प्रोक्तम्।

---

१. अवदानकल्पलता प्रभासावदानम्।
२. बोधिचर्यावतारः सम्प्रजन्यरक्षणम् ५.२-३।

प्रवृत्तिरूपं निवृत्तिरूपं च। प्रथमेनात्र संसारे पौन:पुन्येनावर्तनं जन्ममृत्युसरणात्मकं द्वितीयेन चामरत्वप्राप्तिश्च कल्प्यते। अत्र श्येनयागादिकं दर्शपूर्णमास-चातुर्मास्य-पशुयाग-सोमयाग-वैश्वदेव-बलिहरणादीनि च प्रवृत्तिकर्माणि काम्यकर्माणि जीवं पौन:पुन्येन संसारे अवतारयन्ति, निवृत्तिकर्माणि च देवयानानुसारीणि। एतत्प्रक्रियायां इन्द्रियाणि दर्शनादिसङ्कल्पात्क्रमनसि वैचारिकं मनः परावचि परावाणीं च वर्णसमुदाये वर्णसमुदायं च ओङ्कारबिन्दौ, बिन्दुं च नादे नादं च सूत्रात्मप्राणेषु प्राणांश्च ब्रह्मणि विलीनयते जीवः। ततो ब्रह्मलोके जीवस्तत्र भोगेषु समापितेषु स्थूलोपाधिं सूक्ष्मतायां निलीय तैजसो जायते सूक्ष्मोपाधिं च कारणे निलीय प्राज्ञरूपेणावतिष्ठते, पुनश्च साक्षित्वेन कारणोपाधिं निलीय तुरीयत्वेन विपरिणमते ततः शुद्ध आत्मैवावशिष्यते। एतद्धि देवयानमुच्यते। यत्र संसारान्मुक्तिर्लभ्यते।

एतत् पितृयानं देवयानं चेति वेदनिर्मितम्—

य एते पितृदेवानामयने वेदनिर्मिते।
शास्त्रेण चक्षुषा वेद जनस्थोऽपि न मुह्यति[१]।।

परमात्मनि समस्तकर्मणामर्पणं क्रियाद्वैतं स्वार्थे परार्थे न किमप्यन्तरं यत्र तद्धि द्रव्याद्वैतम्—

यत् स्वार्थकामयोरैक्यं द्रव्याद्वैतं तदुच्यते[२]।

वेदोक्तकर्मसेवनेनैव कश्चिद् भगवद्भक्तो भवितुमर्हति। तस्माद् वेदोक्त-कर्माण्येव श्रीमद्भागवतोक्तकर्माणि। यथा हि—

एतैरन्यैश्च वेदोक्तैर्वर्तमानः स्वकर्मभिः।
गृहेऽप्यस्य गतिं यामाद् राजँस्तद् भक्तिभाङ्नरः।।

बौद्धेषु न कस्यचिददृश्यदेवस्य कल्पना तत्र बुद्धस्य महामानवत्वेन प्रतिष्ठा, न च तत्रापौरुषेयवेदवत् कस्यचिच्छास्त्रस्य कल्पनैव जायते। बुद्धस्योक्तिर्लोक-प्रामाण्यमपेक्षते, यथोक्तम्—

तापाच्छेदाच्च निकषात् स्वर्णमिव पण्डितैः।
परीक्ष्य भिक्षवो ग्राह्यं मद्वचो न तु गौरवात्।।

बुद्ध आत्मनि कश्चिद् विशिष्टां प्रभुसत्तां न स्वीकुरुते स च किमपि गौरवं

---

१ (क) श्रीमद्भागवतम् ७.१५.५६।
(ख) प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकम्।
आवर्तेत प्रयत्नेन निवृत्तेनाश्नुतेऽमृतम्। ७-१५-४७
२. श्रीमद्भागवतम् ७.१५.६५।

स्वीकर्तुं चापि न प्रयतते। स च सामाजिकपरीक्षणमपेक्षते निजवचसाम्। यथा कनकं परीक्ष्यतेऽग्नितापेन तथा तद्वचांसि परीक्ष्यैव ग्राह्यानि, न च तद्गौरवादेव।

बौद्धसिद्धान्ते कर्मचित्तयोरैक्यम्। चेतना हि कर्म, चेतनापूर्वकं क्रियमाणानि कर्माणि सचित्तानि। तस्माच्चेतना सङ्कल्पजन्यक्रियाणां कर्मत्वम्। कस्यापि कर्मणः प्रवर्तने मनसोऽग्रगामित्वम्—

चेतना चेतयित्वा च कर्मोक्तं परमर्षिणा।
तस्यानेकविधो भेदः कर्मणः परिकीर्तितः[1]॥

चेतनाऽहं भिक्खवे कम्मं वदामि चेतयित्वा कम्मं करोति, कायेन मनसा वाचा[2] कर्मकर्तृत्वं मनसो, न च शरीरस्य। शुभाख्यब्राह्मणेन कर्मविषयके प्रश्ने कृते सति बुद्धेनोक्तम्—कर्मणो दायादत्वम्, कर्मणे योनित्वं बन्धुत्वं च। कर्मनिबन्धनेयं सत्ता। पापस्योत्तराधिकारित्वं कर्मणः। न कोऽपि जन्मना ब्राह्मणो न च वृषलः। कल्याणकर्ता कल्याणात्मकं कर्मणि पापाचारी च पापे रमते। अविद्याबद्धानां तृष्णाशृङ्खलानिगृहीतानां पुनर्भवो जायते। कर्मण एव पुनर्जन्मनि हेतुत्वम्।

बौद्धमते तृष्णा दुःखसमुदयाख्यद्वितीयार्यसत्यत्वेनोच्यते। ज्ञानेन्द्रियाणि यदा बाह्यजगद्बद्धानि तदा तृष्णां जनयन्ति। तृष्णामूलमात्मा। तृष्णापरिहारायात्मवादोत्सर्गस्यापरिहार्यत्वं बौद्धदृष्ट्या। कामं स आत्मा वैदिकदृष्ट्याऽमरत्वमविनश्वरत्वं लभताम्। तृष्णायास्त्रैविध्यम्—कामतृष्णा भवतृष्णा विभवतृष्णेति। तृष्णानिरोधायार्याष्टाङ्गमार्गो बुद्धेन निरदेशि। आसनो हि मलम्, मलाच्च शोकपरिदेवदुःखदौर्मनस्योपायासा उत्पद्यन्ते। भोगेषु चिरकालिकस्थितिमतवादिनां दृष्टिरेव भवकामनां जनयति। आसवैः नरा नरकपशुप्रेतमनुष्यदेवलोकान् लभन्ते। तस्मादासवतृष्णादीनि प्रहातव्यानि बौद्धदृष्ट्या।

श्रीमद्भागवतेऽपि तृष्णैव दुःखोद्गमे हेतुत्वं लभते। मन्दबुद्धयस्तृष्णां हातुं न क्षमन्ते। शरीरे जीर्णे जातेऽपि तृष्णा न जीर्यति। कल्याणमतिना तृष्णा नूनं हेया। यथोक्तम्—

या दुस्त्यजा दुर्मतिभिर्जीर्यतो या न जीर्यते।
तां तृष्णां दुःखनिवहां शर्मकामो द्रुतं त्यजेत्[3]॥

तृष्णेयं शक्तिमती निजमातरं भगिनीं चैकान्ते दृष्ट्वा कर्षति—

---

१. मध्यमकशास्त्रम्, नागार्जुनकृतम् १६.२-३।
२. अट्ठसालिनी पालि. पृ. ८२।
३. श्रीमद्भागवतम् ९.१९.१६।

मात्रा स्वस्त्रा दुहित्रा वा नाविविक्तासनो भवेत् ।
बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति ।।

तृष्णाविषये ययातेरियमुक्तिः—

पूर्णं वर्षसहस्त्रं मे विषयान् सेवतोऽसकृत् ।
तथापि चानुसवनं तृष्णा तेषूपजायते ।।
तस्मादेतामहं त्यक्त्वा ब्रह्मण्याधाय मानसम् ।
निर्द्वन्द्वो निरहङ्कारश्चरिष्यामि मृगैः सह ।।

ययातिना तृष्णात्यागोद्घोषोऽक्रियत । साम्प्रतं धनलिप्सया नैके अपराधाः दोषाः सङ्कटानि चोपतिष्ठन्ते । शृङ्गिमुनिनाऽभिशप्तः परीक्षितस्तस्य च नाशाय तक्षको यदा प्रतस्थे तदा मार्गे समागच्छन्तं सर्पविषहरं कश्यपं वीक्ष्य तस्मै द्रव्यं समर्प्य निवर्तयामास । यथोक्तम्—

गन्तुकामो नृपं गच्छन् ददर्श पथि कश्यपम् ।
तं तर्पयित्वा द्रविणैर्निवर्त्य विषहारिणम् ।।

तृष्णैव देवमायात्वेन स्वीकृता । परं च बौद्धैर्मायापदत्वेन सा न स्वीक्रियते । श्रीमद्भागवते देवमाया स्त्रीमयी कल्पिता यस्या भ्रूविजृम्भेण दिग्विजयिनोऽपि पदाक्रान्ता भवन्ति—

बलं मे पश्य मायायाः स्त्रीमय्या जयिनो दिशाम् ।
या करोति पदाक्रान्तान् भ्रूविजृम्भेण केवलम्[1] ।।

अत्र स्त्री नरकद्वारत्वेन कल्प्यते तस्मात्तासु सङ्गं न कुर्यात् । पञ्चतन्त्रेऽपि नातिप्रसङ्गः प्रमदासु कार्यो, नेच्छेद् बलं स्त्रीषु विवर्धमानमित्युक्तिः । श्रीमद्भागवते यथा—

सङ्गं न कुर्यात् प्रमदासु जातु योगस्य पारं परमारुरुक्षुः ।
मत्सेवया प्रतिलब्धात्मलाभो वदन्ति या निरयद्वारमस्य[2] ।।

किमेतावता तत्र स्त्री मृत्युरूपेण कल्पिता । यस्याः सङ्गतः पुरुषोऽपि स्त्रीत्वं लभते—

यां मन्यते पतिं मोहान्मन्मायामृषभायतीम् ।
स्त्रीत्वं स्त्रीसङ्गतः प्राप्तो वित्तापत्यगृहप्रदम्[3] ।।

---

१. श्रीमद्भागवतम्-३.३१.३८ ।
२. श्रीमद्भागवतम्-३.३१.३९ ।
३. श्रीमद्भागवतम् ३.३१.४१ ।

वेदानां तात्पर्यावबोधे काठिन्यमपि श्रीमद्भागवतं सूचयति तस्मादेव तदर्थावबोधे सूरयो मुह्यन्ति। कर्माकर्मविकर्माख्यं त्रिविधं कर्म इति वेदवादः—

कर्माकर्मविकर्मेति वेदवादो न लौकिकः।
वेदस्य चेश्वरात्मवात् तत्र मुह्यन्ति सूरयः ।।

वेदोऽनभिज्ञेभ्यः स्वर्गप्रलोभनं दत्वा श्रेष्ठकर्मसु तान् नियुङ्क्ते—

नाचरेद् यस्तु वेदोक्तं स्वयमज्ञोऽजितेन्द्रियः।
विकर्मणा ह्यधर्मेण मृत्योर्मृत्युमुपैति सः ।।

यो हि वेदविहितकर्माणि नाचरति स विकर्माधर्मं प्राप्नोति मृत्युचक्रे च निबध्यते। कर्मरहस्यं ये न जानते, तेषां स्थितिर्यथा—

कर्मण्यकोविदाः स्तब्धाः मूर्खाः पण्डितमानिनः।
वदन्ति चाटुकान् मूढा यया माध्व्या गिरोत्सुकाः ।।

बौद्धधर्मे श्रीमद्भागवते चोभयत्र जीवस्याहङ्कारः संसारजन्मनः कारणत्वं मन्यते। यथा श्रीमद्भागवते तृतीयस्कन्धे—

सोऽहं वसन्नपि विभो बहुदुःखवासं
गर्भान्न निर्जिगमिषे बहिरन्धकूपे।
यत्रोपयातमुपसर्पति देवमाया
मिथ्यामतिर्यदनु संसृतिचक्रमेतत् ।। (३.३१.२०)

रत्नावल्यां नागार्जुनमतं यथा

अहङ्कारप्रसूतेयं ममकारोपसंहिता।
प्रजा प्रजाहितैकान्तवादिनाभिहिताखिला ।।

इदं मम, अहमस्मि इति परमार्थिभिर्मिथ्याज्ञानं मन्यते। यथाभूतपरिज्ञानादेव मिथ्याज्ञानं नश्यति। बौद्धमते कर्मणोऽस्तित्वं तद्विपाकश्च स्वीक्रियते। सम्पूर्णं सांसारिकजीवनं हि कर्मपरिणामितैव। कर्मानुसारी विपाको जायते। संसारस्य यथार्थमनवबुध्य मूर्खः पाये रमते पापं चैव मधुसमं मन्यते। यथा धम्मपदे—(बालवग्ग-१०)

मधुवा मञ्ञति बालो यान पापं न पच्चति।
यदा च पच्चति पापं अथ बालो दुक्खं निगच्छति ।।

यथा नवीनं दुग्धं द्रुतं दधि न जायते एवमेव कृतं पापकर्म द्रुतं न फलति, परं च तद् भस्मावृताग्निसमं परिदग्धं जायते तथैव पापं पापिनं न जहाति—

न हि पापं कतं कम्मं सज्जु खीरं व मुच्चति।
दुहन्तं बालमन्वेति भस्मच्छन्नोव पावको ।।

(धम्मपद-बालवग्गा १२)

यदा आर्यमौद्गल्यायनः प्रेतमेकं ददर्श तदा बुद्धेनोक्तमनेन प्रेतेन पुरा बुद्धकुटी दग्धा तस्मादेवास्य शिरो मानुषं शरीरं च सर्पवत्। रूपरसगन्धादिपञ्चगुणाः यावत् सेविष्यन्तेऽस्माभिस्तावत् तृष्णा वर्धिष्यते। तस्मात्—

तत्राभिरतिमिच्छेय्य हित्वा कामे अकिञ्चनो।
परियोदपेय्य अत्तानं चित्तक्लेसेहि पण्डितो ।।

पण्डिताः सर्वकामान् विहाय स्वचित्तमलं शोधयन्तु इति बुद्धोक्तिः। श्रीमद्भागवते दण्डव्यवस्था स्वीकृता। विनाशाय दुष्कृतामनुज्ञा तत्र भगवदवतारस्य परं बुद्धस्तु दण्डव्यवस्थाविरोधी सन् कमपि दण्डयितुं नेहते—यथोक्तम्-(धम्मपदे दण्डवग्गो १)

सब्बे तस्सन्ति दण्डस्स सब्बे भायन्ति मच्चुनो।
अलानं उपमं कत्वा न हनेय्य न घातये ।।

सर्वे यदा दण्डाद् बिभ्यति मृत्योश्च तस्मादेकोऽन्यं कमपि न दण्डयेत्। न च हन्यात्। अद्य जनो निजहितलाभेभ्यः घृणितकर्माणि कुरुते प्रतिष्ठायशःसम्मानप्राप्त्यै च परेषां प्रतिष्ठां दमयते स न विद्वानपि तु मूर्ख एवास्ते बौद्धदृष्ट्या। यो जनोऽदण्ड्यं निर्दोषिणं वा दण्डयति स दशस्ववस्थासु गतिमेकां लभते तीव्रवेदना, हानिः शरीराङ्गकर्तनम् महारोगः, विक्षिप्तता, राजदण्डः कठोरनिन्दा सम्बन्धिनां विनाशः सम्पत्तिनाशः परगृहदहनं चेति विविधदोषानापद्यते। श्रीमद्भागवते यज्ञवेदिकायां मूत्रविसर्जनं यज्ञपात्रभञ्जनं वेदिमेखलाभेदनं चेति घटना दक्षयज्ञविध्वंसावसरे रुद्रगणैर्विहिताः[१] परं च बौद्धधर्मे न एतासां घटनानां कृते लेशतः स्थानम्। तत्र दण्डप्रक्रिया हिंसा शरीरघातनं च शत्रूणामपि निषिद्धं दृश्यते। धम्मपदे बुद्धोक्तिर्यथा—

न हि वैरेण वैराणि शाम्यन्तीह कदाचन।
अवैरेण च शाम्यन्ति एष धर्मः सनातनः ।। (यमकवग्गे५)

बुद्धस्योक्तिस्तर्हि यो हि एतज्जन्मनि यं हन्ति स परस्मिन् जनानि वैरभावतः तं हन्ति। एवं सत्त्वा नैकयोनिषु लब्धजन्मानः परस्परं घातयन्तः शोषयन्तो वञ्चयन्तश्चान्योन्यं सुखं शान्तिं वा लभन्ते नैव। यां दुष्प्रवृत्तिं वञ्चनां च पालयति जनस्तद्वासित एवान्यस्मिन् जन्मनि तथाऽऽचरत्येव। अतो न कोऽपि दण्डार्हः न घातनार्हः कश्चित्।

कर्मकर्ता एव दुःखसुखभोक्ता मन्यते। श्रीमद्भागवतेऽपि—

अहं क्रिया विमूढात्मा कर्ताऽस्मीत्यभिधीयते (३-२६-२)

सुखी भवेयं दुःखी वा मा भूवमिति तृष्यतः।
यैवाहमिति धीः सैव सहजं सत्त्वदर्शनम् ।।

---

१. रुरुजुर्यज्ञपात्राणि तथैकोऽग्नीननाशयन्।
कुण्डेष्वमूत्रयन् केचिद् बिभिदुर्वेदिमेखलाः ।। श्रीमद्भागवते चतुर्थस्कन्धे ५.१५।

बौद्धैरात्मभावस्य संसारकारणत्वं मन्यते। मानवः क्षणप्रध्वंसिविज्ञानेषु अहमिति बुद्धिमाधत्ते। तस्मादेव सुखावाप्त्यै दुःखनिरसनाय च यतते।

नागार्जुनेन दशकुशलकर्माणि दश चाकुशलकर्माणि व्याख्यातानि यथोक्तं रत्नावल्याम्—

अहिंसाचौर्यविरतिः परदारविवर्जनम्।
मिथ्यापैशुन्यपारुष्याबद्धवादेषु संयमः।
लोभव्यापादनास्तिक्यदृष्टीनां परिवर्जनम्।
एते कर्मपथाः शुक्ला दश कृष्णा विपर्ययात्[१] ।।

श्रीमद्भागवते शुक्लानि कृष्णान्यथ लोहितानि तेभ्यः सवर्णाः सृतयो भवन्ति[२]। बौद्धमते कर्मफलं नेश्वराधीनं न च पराश्रितमपि तु तच्चित्तसन्तत्यधीनमेव तत्। बुद्धोऽपि कर्मफलभोक्ता न स ईश्वरः। एकदा बुद्धो भिक्षुभिः साकं विहरन् आसीत् क्वचिन्मार्गे तस्य पादे कण्टकः प्रविष्टस्तदा पीडाहतः स एतद्रहस्यमुवाच मया पूर्वजन्मनि शूलेन एको जनो हतस्तस्यैव फलमिदम्।

बुद्धेन कायाकुशलकर्माणि प्राणातिपात-अदत्तादानकाममिथ्याचारीणि प्रतिपादितानि। मृषावाद-पैशुन्य-पारुष्याणि वाचिकानि अकुशलकर्माणि मानसिकानि च अभिध्या-व्यापाद-मिथ्यादृष्टिरूपाणि। लोभमूलकचित्तात् काममिथ्याचार-अभिध्या-मिथ्यादृष्टय उत्पद्यन्ते। नारीकामवासनया मनुष्ये लोभद्वेषभावना वर्धते। लोभद्वेषयोः सहगतत्वं स्वीकार्यम्।

बौद्धमते देहेन्द्रियबुद्धिसङ्घातस्य क्षणप्रध्वंसित्वम्। यः सङ्घातः कर्म कुरुते स कर्म समुत्पाद्य विनश्यति फलभोगावस्थायां परिवर्तते। बौद्धानां कर्मवादविषयिणी नीतिरियं सनातनसिद्धान्तवादिभिर्न स्वीकृता। अनात्मवादिबौद्धदर्शने विप्रतिपत्तिरियं कर्तृत्वभोक्तृत्वयोः समानाधिकरणनियमत्वाद् यः क्षणः प्रध्वंसी, स कर्मफले न तिष्ठति कथं कर्मवादव्यवस्थेयं प्रसज्यते। भोगक्षणस्य फलेन सह कथमैकात्म्यम्? एतत्समाधानं वाचस्पतिमिश्रेण न्यायवार्तिकतात्पर्यटीकायामेवं प्रत्यपादि—येन कायेनोपलक्षितः कश्चित् चित्तसन्तानः स कार्यान्तरवर्त्यपि फलं भुङ्क्ते इत्यर्थः[३]।

बौद्धधर्मे श्रीमद्भागवतोक्तात्मनोऽनस्तित्वं मन्यते।

बौद्धमते तु पूर्वकृतकर्मण आगामिनि जन्मनि एकाऽप्यवस्था नावशिष्यते आत्मनोऽजरस्य तत्र का कथा? अभिधर्मकोशे वसुबन्धुनाचार्येण—कर्मणा, अविद्यादिक्लेशैश्च पञ्चस्कन्धसन्ततिः प्रवहति सततं मृतमेकं शरीरं विहाय नवशरीरं

१. रत्नावली-१.८-९।
२. श्रीमद्भागवतम्-११.२३.४३।
३. न्यायवार्तिकतात्पर्यटीका-पृ. ५००।

धत्ते। स्कन्धा हि रूपवेदनासंज्ञासंस्कारविज्ञानानि। स्कन्धसन्ततिरेव जन्मान्तरं याति। अभिधर्मकोशे यथा—

नात्मास्ति स्कन्धमात्रं तु कर्मक्लेशाभिसंस्कृतम्।
अन्तराभवसन्तत्या कुक्षिमेति प्रदीपवत्[1]॥

यथा—अरैश्चक्रं निबद्धं तथा कर्मणा बद्धत्वं जीवस्य। मानवस्य यथा कर्माणि प्रभास्वराणि शोभनानि शीलवन्ति भविष्यन्ति तथा जीवनं तदीयं कल्प्यते। बुद्धो वक्ति—पुनर्जन्मनि जनः न स एव, न चान्यः प्रदीपस्य वर्तिकाप्रकाशो यथा प्रारम्भे, न तथा मध्ये न चान्ते तथा। एवमेव परिवर्तिनि बौद्धमते बुद्धस्य धर्मकाय एवात्मनो विकल्पत्वेन स्वीक्रियते।

श्रीमद्भागवतेऽपि बौद्धकर्मवादसमर्थनम्[2], यथा—

कर्मणा जायते जन्तुः कर्मणैव विलीयते।
सुखं दुःखं भयं क्षेमं कर्मणैवाभिपद्यते॥१३॥
अस्ति चेदीश्वरः कश्चित् फलरुप्यन्यकर्मणाम्।
कर्तारं भजते सोऽपि न ह्यकर्तुः प्रभुर्हि सः॥१४॥
किमिन्द्रेणेह भूतानां स्वस्वकर्मानुवर्तिनाम्।
अनीशेनान्यथां कर्तुं स्वभावविहितं नृणाम्॥१५॥
देहानुच्चावचान् जन्तुः प्राप्योत्सृजति कर्मणा।
शत्रुर्मित्रवदासीनः कर्मैव गुरुरीश्वरः॥१६॥
तस्मात् सम्पूजयेत् कर्म स्वभावस्थः स्वकर्मकृत्।
अञ्जसा येन वर्तेत तदेवास्य हि दैवतम्[3]॥१८॥

यथा मनसश्चित्तस्य वा बौद्धमते मुख्यहेतुत्वं तथा श्रीमद्भागवतेऽपि[4]

नायं जनो मे सुखदुःखहेतुर्न देवतात्मा ग्रहकर्मकालाः।
मनः परं कारणमामनन्ति संसारचक्रं परिवर्तयेद् यत्॥

एवं श्रीमद्भागवतं बौद्धधर्मश्च समेत्य मानवस्य आत्मशुद्ध्यै चित्तसन्ततिशुद्ध्यै च प्रयतते। बौद्धमते हिंसाया लेशतोऽपि न स्थानं तथा महाकरुणोत्पादेन हिंस्रकानां चित्तशोधनं, न तत्र शिशुपालचाणूरकंसादीनां प्राणहननस्वीकृतिर्न च रक्तपातः। दुःखनिरोधाय तृष्णां लिप्सां सांसारिकभोगं चोपेक्षत एतदुभयम्। श्रीमद्भागवतं चापि मानवं सांसारिकानैतिकविषयवासनाभ्यो निवारयितुं प्रयतते, एवं श्रीकृष्णभक्तिरेव

---

१. अभिधर्मकोशः-३.१८।
२. श्रीमद्भागवतम् १०.२५.१३—१४।
३. श्रीमद्भागवतम्-१०.२५।
४. श्रीमद्भागवतम्-११.२३.४३।

तदर्थं शरणं मन्यते। बौद्धमते बोधिचित्तमेव भक्तेर्विकल्पपरं दृश्यते" तज्जीयतेऽन्येन शुभेन केन सम्बोधिचित्तं यदि नाम न स्यात्'[१] इति शान्तिदेवोक्तिर्बोधिचर्यावतारे। क्षणसम्पदो दौर्लभ्यसूचिकोक्तिरपि तत्र—यदि नात्र विचिन्त्यते हितं पुनरप्येष समागमः कुतः। बुद्धो सूत्रग्रन्थानुसारेण द्वीपाद् द्वीपं, मठाद् मठं, विहाराद् विहारं, पर्वतात् पर्वतं। गच्छन् एकैकस्य मानवस्य दुःखहेतुं पश्यन् परिशोधयति तत्। इत्थं श्रीमद्भागवतस्य कर्मसिद्धान्तानामीश्वरात्मवादसिद्धान्तमन्तरेण क्वचित् साम्यं क्वचिच्च वैषम्यं समुपपद्यत एव।

अन्ते "मातृ आनन्दमयी पौराणिकवैदिकाध्ययनानुसन्धानसंस्थानेन नैमिषारण्यस्थेन समायोजितत्रिदिवसीयराष्ट्रियपुराणसङ्गोष्ठीविषये कानिचन पद्यप्रसूनानि सम्पर्यन्ते—

गोष्ठी भागवते पुराणविदिते या नैमिषारण्यके
विद्वद्भिर्विहिताऽत्र गुञ्जति पुनर्व्यासोक्तिसद्गौरवम्।
विख्यातं भुवनत्रये सुगुणिनं रागान्धकारापहं
वन्दे व्यासमुनिं कविं गुरुवरं विद्यावतां सत्प्रियम्॥१॥

माता आनन्दमयी—

विद्याशास्त्रसुदीक्षिता समभवल्लोकोपकारे रता
माताऽनन्दमयी वरा विनयिनी कारुण्यसम्भूषिता।
विष्णोर्भक्तिनिषेविका सुसरला दुःखार्तसंरक्षिका
तामेवं सुतपस्विनीं सुविदितां सच्छ्रद्धया नौम्यहम्॥२॥
मुक्तिर्यत्र हि दास्यतामधिगता भक्तेः प्रियायाः परा
विष्णौ भक्तजनाः सदा विनयिनो भूयो रमन्ते प्रियाः।
ग्रामे चापि पुरेषु यत् सुविदितं श्रीमत्पुराणं जने
यो जानाति हि तत्त्वतः प्रतिपदं जीवेत्तथा नौमि तम्॥३॥
लाभाननेकान् परिकीर्तयामि श्रीमत्पुराणाध्ययनस्य सम्यक्।
चेद् दूषितं यस्य मनः प्रलोभाद् व्यासोक्तिभिस्तत् परिशोधयेत् सः॥४॥
श्रेयः परेषां परिसाधयेत् स नैजं हितं यः समुपेक्षतेऽपि।
तज्जीवनं भागवतोक्तमेवं न द्वेषकृज्जनशोषकं नो॥५॥
यत् पाटवं क्षौद्रमिदं हि कस्मान्निजार्थसिद्ध्यै नु समागतं तत्।
आस्वाद्य शास्त्रं परिमार्जयेत्तत्सुशिक्षितं स्यादपरोऽपि कश्चित्।
साफल्यमायातु तदा सुगोष्ठी पदार्पणं यद् विदुषां हि जातम्।
दोषान् विकारांश्च हृदि स्थितांस्तान् जहातु विद्वन्! सुनिवेदयामि॥

---

१. बोधिचर्यावतारः शान्तिदेवस्य प्रथमपरिच्छेदः।

माघकाव्योपरि श्रीमद्भागवतस्य प्रभावः

डॉ. सूर्यमणिरथः

❀❀❀

अस्माकं भारतीयानां वेदाः एव निःश्वाससमानाः भवन्ति। अस्माकं रक्तेषु वेदमन्त्रध्वनिः निनादितो भवति। वेदानन्तरं रामायणं महाभारतं श्रीमद्भागवतञ्च मुख्यरूपेणास्माकं पथप्रदर्शकमस्ति। भारतीय आत्मा एतदनुसारेणानुप्राणितः। महामुनिः श्रीव्यासदेवः वेद-ब्रह्मसूत्रोपनिषदादिभ्यः सारमाकृष्य आत्मतृप्तये लोकोपकाराय च श्रीमद्भागवतं रचयामास।

व्याससुतः ब्रह्मज्ञानी श्रीलशुकदेवः पितुः सकाशाद् दिव्यज्ञानबलेन श्रीमद्भागवतमधीत्य गङ्गाकूले ब्रह्मशापग्रस्तं मरणापन्नं राजानं परीक्षितं श्रावयामास। एतच्छ्रुत्वा परीक्षितो मुक्तिमवाप। श्रीमद्भागवतस्य प्रथमे स्कन्दे लिखितमस्ति यत्—

इदं भागवतं नाम पुराणं ब्रह्मसम्मतम्।
उत्तमश्लोकचरितं चकार भगवानृषिः ।। (१.३.४०)

श्रीमद्भागवतं यदा शुकदेवः परीक्षितं श्रावयामास, तदा सूतमुनिः एतत् सम्यग् बुद्ध्वा नैमिषारण्ये शौनकादिमुनिगणान् श्रावितवान्। अनेन क्रमेण श्रीभागवतस्य प्रचारः जातः।

श्रीमद्भागवते विभिन्नानि उपाख्यानानि चरित्राणि च सन्ति। परवर्तिसमये संस्कृतकवयः स्वपाण्डित्यबलेनोपजीव्यग्रन्थरूपेण स्वीकृतात् श्रीभागवताद् उपाख्यानान्यानीय मञ्जुलतरशब्दार्थयुगलप्रयोगपुरःसरं महाकाव्यादिकं रचितवन्तः। तेषां कृतिषु श्रीमद्भागवतस्य प्रभावः दरीदृश्यते। अस्मिन् प्रबन्धे श्रीमद्भागवतस्य प्रभावः माघकविविरचिते 'शिशुपालवधम्' इति महाकाव्ये कथं पतितः, तद्विषयये आलोच्यते।

'शिशुपालवधम्' इति महाकाव्यं श्रीमता माघकविना विरचितम्। अस्मिन् महाकाव्ये २० सर्गाः सन्ति। एषु सर्गेषु १६४५ श्लोकाः सन्ति। शिशुपालवधे श्रीकृष्णचरितं वर्णितमस्तीति २० तमसर्गस्य अन्तिमे कविवंशवर्णने स्वयं कविः लिखति। तद्यथा—

श्रीशब्दरम्यकृतसर्गसमाप्तिलक्ष्म-
लक्ष्मीपतेश्चरितकीर्तितमत्र चारु ।
तस्यात्मजः सुकविकीर्तिदुराशयादः
काव्यं व्यधत्त शिशुपालवधाभिधानम् ।। (कविवंशवर्णनम्)

माघः श्रीमद्भागवतस्य १० मस्कन्धस्य ६९ तमाध्यायतः ७४ तमाध्यायान्तर्गतं विषयवस्तु मुख्यरूपेण गृहीत्वा विभिन्नानि उद्भटानि वर्णनानि योजयित्वा विभिन्नालङ्कारसन्निवेशपूर्वकं शिशुपालवधमहाकाव्यं रचितवान्। श्रीमद्भागवतस्य प्रभावः तस्मिन् काव्ये कथं पतित इति अस्मिन् निबन्धे आलोचयामः ।

शिशुपालवधस्य प्रथमे सर्गे शिशुपालं विरुध्य इन्द्रः नारदद्वारा श्रीकृष्णं प्रति सन्देशं प्रेरयति। नारदोऽपि इन्द्रसन्देशमविकलं श्रीकृष्णं श्रावयति। अस्मिन्नभ्यन्तरे युधिष्ठिरेण करिष्यमाणं राजसूययज्ञं प्रति गन्तुं निमन्त्रणं श्रीकृष्णेन प्राप्तम्। परन्तु श्रीमद्भागवते यदा नारदः श्रीकृष्णस्य नगरीमागतः तदा श्रीकृष्णः पाण्डवानां वृत्तान्तं पृच्छति। तदवसरे नारदः राजसूययज्ञे योगदानाय युधिष्ठिरस्य निमन्त्रणं प्रददाति।

राजदूते ब्रुवत्यैवं देवर्षिः परमद्युतिः
बिभ्रत्पिङ्गजटाभारं प्रादुरासीद्यथा रविः ।
न हि तेऽविदितं किञ्चिल्लोकेष्वीश्वरकर्तृषु
अथ पृच्छामहे युष्मान् पाण्डवानां चिकीर्षितम् ।।

(भाग.१०.७०.३२-३६)

नारदोऽपि एतदुत्तरयति—

यक्षति त्वां मखेन्द्रेण राजसूयेन पाण्डवः ।
पारमेष्ठ्यकामो नृपस्तद्भवाननुमोदताम् ।
तस्मिन् देवक्रतुवरे भवन्तं वै सुरादयः ।।
दिदृक्षवः समेष्यन्ति राजानश्च यशस्विनः ।।

(तत्रैव ४१-४२)

श्रीमद्भागवतानुसारेण श्रीकृष्णः उद्धवस्य परामर्शमिच्छति, अधुना किं कर्त्तव्यमिति। उद्धवोऽपि नारदसूचितपाण्डवयज्ञं प्रति प्रथमतया गन्तव्यमिति ततः जरासुतवध इति च सूचयति—

यदुक्तमृषिणा देव ! साचिव्यं यक्षतस्त्वया ।
कार्यं पैतृष्वसेयस्य रक्षा च शरणैषिणाम् ।।

(१०.७१.२)

शिशुपालवधानुसारेणापि उद्धवः पाण्डवानां राजसूययज्ञं प्रति गन्तुं श्रीकृष्ण-मुपदिशति। श्रीकृष्णः इन्द्रप्रस्थं गत्वा जरासन्धवधाय भीमार्जुनाभ्यां सह ब्राह्मणवेषं धृत्वा जराराजधानीं गिरिव्रजनगरीं प्रति गत इति श्रीमद्भागवतं घोषयति। तत्र ब्राह्मणवेषधारी श्रीकृष्णः जरासन्धं द्वन्द्वयुद्धं कर्तुं याचितवान्। जरापि ब्राह्मणवेषिश्रीकृष्णमर्जुनं च प्रत्यवहेलनं प्रदर्श्य भीमेन सह योद्धुं स्वकीयामिच्छां प्रकटितवान्। युद्धे कथञ्चिद् जरासन्धं विनाश्य तन्निगृहीतान् राज्ञः मोचयित्वा श्रीकृष्णः भीमः अर्जुनश्च इन्द्रप्रस्थं प्रत्यागताः। आगमनात्पूर्वं श्रीकृष्णः गिरिव्रजे जरासन्धस्य पुत्रं सहदेवं राजरूपेण अभिषिक्तवान्। श्रीमद्भागवते यथा—

सहदेवं तत्तनयं भगवान् भूतभावनः।
अभ्यषिञ्चदमेयात्मा मगधानां पतिं प्रभुः॥
मोचयामास राजन्यान् संरुद्धा मागधेन ये।

(१०.७२.४८)

अनन्तरं राजसूययज्ञे उपस्थितेषु देव-मुनि-नरपतिषु कोऽग्रपूज्यो भवेदिति विषये विचारः जातः, परन्तु नैकमत्यं जातम्। अस्यां परिस्थितौ पाण्डवः सहदेवः श्रीकृष्णं प्रति अङ्गुलिनिर्देशपूर्वकं तस्याग्रपूज्यत्वं बलिष्ठया युक्त्या समर्थयामास। श्रीमद्भागवतानुसारेण यथा—

सदस्याऽग्र्यार्हणार्हं वै विमृशन्तः सभासदः।
नाध्यगच्छन्ननैकान्त्यात् सहदेवस्तदाब्रवीत्॥
अर्हति ह्यच्युतः श्रैष्ठ्यं भगवान् सात्त्वतां पतिः।
एष वै देवताः सर्वाः देशकालधनादयः॥
यदात्मकमिदं विश्वं क्रतवश्च यदात्मकाः।
अग्निराहुतयो मन्त्राः सांख्यं योगश्च यत्परः॥
एक एवाद्वितीयोऽसावैतदात्म्यमिदं जगत्।
आत्मनानात्माश्रयः सभ्याः सृजत्यवति हन्त्यजः॥

(श्री. भाग. १०.७४.१८-२१)

शिशुपालवधानुसारेण भीष्मः एतत् सूचयति यत् श्रीकृष्णोऽग्रपूज्यः भवेदिति। अस्मिन् प्रसङ्गे माघः लिखति—

इत्थमत्र विततक्रमे क्रतौ वीक्ष्य धर्ममथ धर्मजन्मना।
अर्घ्यदानमनुचोदितो वचः सभ्यमभ्यधितशन्तनो सुतः॥

(शिशु.१४.५३)

पुनः तत्रैव ३४ श्लोकैः भीष्मः स्वयुक्तेः पुष्टिं समीचीनरूपेण करोति। अन्तिमे युधिष्ठिरः श्रीकृष्णाय अर्घ्यं समर्पितवान्। एतत् माघः प्रकाशयति, यथा—

भीष्मोक्तं तदिति वचो निशम्य सम्यक् साम्राज्यश्रियमधिगच्छता नृपेण।
दत्तेऽर्घे महति महीभृतां पुरोऽपि त्रैलोक्ये मधुभिदभूदनर्घ एव।।

(शिशु. १४.८८)

अत्र महति अर्घे दत्तेऽपि मधुभित् त्रैलोक्ये अनर्घोऽभूदिति कथनेन विरोधाभासः अलङ्कारो भवति। अनर्घशब्दस्य अमूल्यार्थकरणेन विरोधः परिहृतः भवति। हरिपूजानन्तरं तदसहमानः चेदिपतिः शिशुपालः भगवन्तं श्रीकृष्णं प्रति कोपं प्रकाशितवान्। श्रीमद्भागवते सहदेवः हरिपूजार्थं युक्तिं दर्शयति, परन्तु माघकाव्यानुसारेण भीष्मः एतादृशीं युक्तिं करोतीति पार्थक्यम्। पूर्णसभायां शिशुपालः उक्तवान् यत् हे सभासदः! सहदेवेन कृष्णपूजार्थं यदुक्तं तद् भवन्तः न स्वीकुर्वन्तु। असौ सहदेवः बालकः, तद् वचसा भवादृशाः ज्ञानिनः न मुह्येरन्। कुलकलङ्कः गोपालः कृष्णः कथमग्रपूज्यो भवेत्? काकः किं यज्ञीयपुरोडाशभक्षणे योग्यो भवेत्। कृष्णः न कस्यापि वर्णस्याश्रमस्य वा अन्तर्गतो भवति। कोऽपि गुणोऽस्मिन् नास्ति। एवंरूपेण बहुकटुवाक्यानि सः श्रीकृष्णमुद्दिश्य उद्गारयामास। शृगालरुतं निशम्य सिंहः यथा किञ्चिद् विचलितो न भवति तथा श्रीकृष्णः शिशुपालवचसा किञ्चिदपि न बभाषे, अथवा विचलितो जातः। श्रीमद्भागवतानुसारेण एतद्यथा—

इत्थं निशम्य दमघोषसुतः स्वपीठादुत्थाय कृष्णगुणवर्णनजातमन्युः।
उत्क्षिप्य बाहुमिदमाह सदम्यमर्षी संश्रावयन् भगवते परुषाण्यभीतः।।
ईशोःदुरत्ययः काल इति सत्यवती श्रुतिः।
वृद्धानामपि यद्बुद्धिर्बालवाक्यैर्विभिद्यते।।
यूयं पात्रविदां श्रेष्ठा मा मन्ध्वं बालभाषितम्।
सदसस्पतयः सर्वे कृष्णो यत् सम्मतोऽर्हणे।।
तपोविद्याव्रतधरान् ज्ञानविध्वस्तकल्पषान्।
परमर्षीन् ब्रह्मनिष्ठान् लोकपालैश्च पूजितान्।।
सदस्पतिनतिक्रम्य गोपालः कुलपांसनः।
यथा काकः पुरोडाशं सपर्यां कथमर्हति।।
वर्णाश्रमकुलापेतः सर्वधर्मबहिष्कृतः।
स्वैरवर्ती गुणैर्हीनः सपर्यां कथमर्हति।।
एवमादीन्यभद्राणि बभाषे नष्टमङ्गलः।
नोवाच किञ्चिद्भगवान् यथा सिंहः शिवारुतम्।।

(भाग.१०.७४.३०-३८)

माघकाव्येऽपि कविः एवंरूपेण शिशुपालमुखेन श्रीकृष्णं तर्जयति। यथा—

यदराज्ञि राजवदिहार्घ्यमुपहितमिदं मुरद्विषि।
ग्राम्यमृग इव हविस्तदयं भजते ज्वलत्सु न महीशवह्निषु ।।

(शिशु १५.१५)

तव धर्मराज इति नाम कथमिदमपष्ठु पठ्यते।
भौमदिनमभिदधत्यथवा भृशमप्रशस्तमपि मङ्गलं जनाः ।।

(शिशु. १५.१७)

ननु सर्व एव समवेक्ष्य कमपि गुणमेति पूज्यताम्।
सर्वगुणविरहितस्य हरेः परिपूजया कुरुनरेन्द्र को गुणः ।।

(शिशु. १५/प्रक्षिप्त ७)

एवरूपेण शिशुपालतर्जनं निशम्याऽपि श्रीकृष्णः किञ्चिन्नोवाच। एतन्माघः वक्ष्यमाणरीत्या प्रकाशयति। यथा—

कटुनापि चैद्यवचनेन विकृतिमगमन्न माधवः।
सत्यनियतवचसं वचसा सुजनं जनाश्चलयितुं क ईशते ।।

(शिशु. १५.४०)

श्रीकृष्णसपक्षाः राजानोऽपि शिशुपालं प्रति कुपिताः नाभवन्। तत्र श्रीकृष्णः शिशुपालस्यापराधानां गणनामपि कृतवान्। यतो हि शिशुपालस्य शतमपराधान् मर्षयिष्यामीति तेन पूर्वं प्रतिज्ञा कृता। यथा—

न च तं तदेति शपमानमपि यदुनृपाः प्रचुक्रुधः।
शौरिसमयनिगृहीतधियः प्रभुचित्तमेव हि जनोऽनुवर्तते ।।
विहितागसः मुहुरलङ्घ्य निजवचनदाससंयतः।
तस्य कतिथ इति तत्प्रथमं मनसा समाख्यपराधमच्युतः ।।

(शिशु. १५.४१-४२)

परन्तु श्रीकृष्णः तस्यापकारं गणयितुमसमर्थोऽभवत्। यतो हि उत्तमाः अधिगतगुणस्मरणाः अखिलं दोषं स्मर्तुं पटवः न भवन्ति। माघानुसारेण यथा—

स्मृतिवर्त्म तस्य न समस्तमपकृतमियाय विद्विषः।
स्मर्तुमधिगतगुणस्मरणाः पटवो न दोषमखिलं खलूत्तमाः ।।

(शिशु. १५.४३)

कृष्णं प्रति शिशुपालस्य आक्षेपवचनं निशम्य पितामहः कुपितो जातः। स उच्चैरकथयद् यन्मया यदिदमच्युतार्चनं कथितं तद् यस्य कृते असोढो भवति स चापं

नमयतु। सर्वेषां राज्ञां पुरस्तात् तस्य शिरसि अयं मे चरणः कृतः। माघः एतत् स्पष्टतया स्वकाव्ये प्रकाशयति। यथा—

अथ गौरवेण परिवादपरिगणयन् तमात्मनः
प्राह मुररिपुतिरस्करणक्षुभितः स्म वाचमिति जाह्नवीसुतः।
विहितं मयाद्य सदसीदमपमृषितमच्युतार्चनं
यस्य नमयतु स चापमयं चरणः कृतः शिरसि सर्वभूभृताम्।।

(शिशु. १५.४५-४६)

अथ भीष्मवचनं निशम्य सर्वे शिशुपालपक्षपातिनः राजानः क्षोभं गताः। शिशुपालोऽपि अतिकटुवचनैः भीष्म-कृष्ण-पाण्डवान् निर्भर्त्स्य स्वसैन्यान् युद्धाय उद्बोधितवान्। माघस्य भाषायाम्—

गुरु निःश्वसन्नथ विलोलसदवथुवपुर्वचोविषम्।
कीर्णदशनकिरणाग्निकणः फणवानिवैष विससर्ज चेदिपः।।
किमहो नृपाः सममभीभिरुपपतिसुतैर्न पञ्चभिः
वध्यमभिहत भुजिष्यममुं सह चानया स्थविराजकन्यया।।

(शिशु. १५.६२,६३)

श्रीमद्भागवतानुसारेण श्रीकृष्णस्य निन्दां श्रुत्वा सभासदः कर्णौ पिधाय चैद्यं शपन्तः बहिर्जग्मुः। पाण्डुपुत्राः मत्स्य केकयसृञ्जयाश्च शिशुपालजिघांसया उत्तस्थुः। ततः भगवान् सर्वान् निषिध्य रुषा स्वयं क्षुरान्तचक्रेण शिशुपालस्य शिरः चकर्त। शिशुपालस्य देहात् तदा निर्गतं ज्योतिरेकं भगवतः वासुदेवस्य शरीरे लीनमभवत्। जन्मत्रयमभिव्याप्य शिशुपालः भगवता सह शत्रुतामाचरितवान्। शत्रुतासम्बन्धेन सः भगवत्स्मरणं कृत्वा तन्मयतां गतः, अन्तिमे मोक्षं प्राप्तश्च। यथा—

भगवन्निन्दनं श्रुत्वा दुःसहं तत् सभासदः।
कर्णौ पिधाय निर्जग्मुः शपन्तश्चेदिपं रुषा।।
ततः पाण्डुसुताः क्रुधा मत्स्यकेकयसृञ्जयाः।
उदायुधाः समुत्तस्थुः शिशुपालजिघांसया।।
तावदुत्थाय भगवान् स्वान् निवार्य स्वयं रुषा।
शिरः क्षुरान्तचक्रेण जहारापततो रिपोः।।
चैद्यदेहोत्थितं ज्योतिर्वासुदेवमुपाविशत्।
पश्यतां सर्वभूतानामुल्केव भुवि खात् च्युता।।
जन्मत्रयानुगुणितवैरसंरब्धया धिया।
ध्यायन् तन्मयतां यातो भावो हि भवकारणम्।।

(भाग. १०.७४.४१-४६)

अधुना शिशुपालवधं काव्यं पश्यामः। तत्र माघः कथमनुप्राणित इति आलोचयामः। शिशुपालवधमहाकाव्ये पञ्चदशसर्गाद् विंशसर्गं यावत् पाण्डवशिशुपालमध्ये वाग्युद्धं, सैन्ययुद्धं च महता आटोपेन वर्णितमस्ति। अन्तिमे विंशसर्गे श्रीकृष्णशिशुपालयोः युद्धं वर्णितमस्ति। युद्धेन श्रीकृष्णः अपराजेय इति मत्वा शिशुपालः वाक्शायकैः तं तुतोद। ततः श्रीकृष्णः कालक्षेपं न कृत्वा चक्रेण शिशुपालस्य शिरः विच्छेद। माघस्य भाषायाम्—

राहुस्त्रीस्तनयोरकारि सहसा येनाश्लथालिङ्गन-
व्यापारैकविनोददुर्ललितयोः कार्कश्यलक्ष्मीर्वृथा।
तेनाक्रोशत एव तस्य मुरजित् तत्काललोलानल-
ज्वालापल्लवितेन मूर्धविकलं चक्रेण चक्रे वपुः॥

(शिशु. २०.७८)

न केवलमेतत् श्रीमद्भागवतानुसारेण माघोऽपि शिशुपालशरीरान्निर्गतं धाम उपेन्द्रस्य शरीरे लीनमभवदिति लिखति। यथा—

श्रिया जुष्टं दिव्यैः सपटहरवैरन्वितं पुष्पवर्षै-
र्वपुष्टश्चैद्यस्य क्षणमृषिगणैः स्तूयमानं निरीय।
प्रकाशेनाकाशे दिनकरकरान् विक्षिपद्विस्मिताक्षै-
र्नरेन्द्रैरौपेन्द्रं वपुरथ विशद्धाम वीक्षाम्बभूवे॥

(शिशु. २०.७९)

अनेन प्रकारेण श्रीमद्भागवतेन प्रभावितः महाकविः माघः स्वरचिते 'शिशुपालवधम्' इति महाकाव्ये शिशुपालस्य चरित्रं वर्णयति।

श्रीमद्भागवते दार्शनिकचिन्तनस्यावधारणा

डॉ. रामसुमेरयादवः

❁❁❁

वेदानिव पुराणान्यपि अत्यन्तमेव विस्तृतानि आसन्। महर्षिवेदव्यासैः पुराणसाहित्यस्याष्टादशविभागाः विहिताः। वेदेषु तु किमपि परिवर्तनं नैव विहितं, परन्तु पुराणानां समासः यथेष्टपरिवर्तनञ्च विहितमेव। यतो हि कोऽपि जनः गभीरं सारतत्त्वविषयमपि सारल्येनावगन्तुं शक्नोति। महाभारतं वेदार्थं प्रतिपादयति। 'भारतव्यपदेशेन ह्याम्नायार्थश्च दर्शितः'। श्रीमद्भागवतमहापुराणं वेदकल्पतरोः निसर्गतः निर्गलितं फलमेवास्ति। निगमकल्पतरोर्गलितं फलम्। (भाग. १-१-३) पद्मपुराणे 'वेदोपनिषदां स्वराज्जाता भागवतीकथा (उत्तरखण्डकुमारनारदसंवादे-२-६७) ग्रन्थपरिसमाप्तौ पुराणमिदं सर्ववेदान्तसारत्वं भजते'।

सर्ववेदान्तसारं हि श्रीभागवतमिष्यते।
तद्रसामृततृप्तस्य नान्यत्र स्याद्रतिः क्वचित्॥

(भाग. १२-१३-१५)

दार्शनिकं चिन्तनं सभ्यानां जनानां स्वभावोऽस्ति। सभ्यतेतिहासे दार्शनिक-चिन्तनस्य विकासः कतिपयेषु देशेष्वेव जातः। प्राचीने यूनानभारतवर्षयोः स्थानं प्रामुख्यं भजते। भारते हि ऋग्वेदे यत्र तत्र दार्शनिकं दर्शनं दृश्यते। उपनिषद्दर्शनस्यारम्भः धार्मिकी आध्यात्मिकीजिज्ञासारूपेण परीवर्तते। बृहदारण्यकछान्दोग्योपनिषदौ प्राचीनतमे वर्तते (अष्टमीशताब्दी ई. पू.)। तत्र श्रेयप्रेयसोः परापरयोश्च विद्ययोः ज्ञानं प्रतिपादितम्। भारतीयदर्शनचिन्तनपरम्परायां ज्ञानमेव ध्येयम्, ज्ञानस्य च लक्ष्यं आत्मलाभ एव, तत एव मोक्षावाप्तिर्जायते।

पुराणसाहित्ये श्रीमद्भागवतमहापुराणं दार्शनिकतायाः पराकाष्ठाया विपुलत्वेन परिव्याप्तया धार्मिकतया सर्वोत्तमत्वमुपयाति। प्रायशः भारतीयदर्शनस्य परम्परागतानां समेषां ख्यातानां सिद्धान्तानामेकत्र समन्वयं भागवतदर्शने परिलक्ष्यते। भारते हि सदाचरणानां परिपालनं आवश्यकत्वेन प्रथमसोपानरूपेण परिगण्यते। दर्शनधर्मयोः

घनिष्ठतमो सम्बन्धः । दर्शनं विचाराणां प्रतिपादनं विदधाति । एषां विचाराणामनुकूलतया आचाराणां व्यवस्थापनं धर्मः करोति । दर्शनं हि सिद्धान्तान् प्रतिपादको नियामकश्चास्ति । धर्मस्तु व्यवहारमार्गं प्रदर्शयति । धार्मिककृत्यैः विना दर्शनं निष्फलितमेवास्ति । दार्शनिकभूमिकाभावे धर्मसत्ताप्रतिष्ठिता एव भवितुं नार्हति । धर्मस्य योगेनैव भारतीयदर्शनस्य व्यावहारिकी दृष्टिः भागवते आध्यात्मिकतायाः परिपाकः ज्ञातः ।

दर्शनशब्दस्यार्थः तावद् अवबोध्यं वर्तते । दृश्यतेऽनेनेति दर्शनम् । तत्सिद्धिः दृशधातोः करणे 'ल्युट् चे'ति सूत्रेण ल्युटि कृते सम्पद्यते । ई. पू. षट्शताब्द्यां भारते धार्मिकं वैदिकं च सूत्रपातमभूत् । परिणामतः वैदिकतत्त्वदर्शनस्य तिस्रः धाराः सूत्रकाले षड्दर्शनेषु विनिर्मिताः । वैदिकपरम्पराधारीकृत्य विचारकैः षड्दर्शनेष्वेव विचाराः शृङ्खलाबद्धाः जाताः ।

श्रीमद्भागवतपुराणे भक्तिधर्मयोः महनीयत्वं बहुतरं प्रकाशितं, तस्मिन् साहित्यदर्शनयोः पूर्णतया सामञ्जस्यं वर्तते । भागवतकारैः समन्वयात्मकं रूपं प्रस्तुतं, प्रायशो समेषां दर्शनानां मूलतत्त्वानि महनीयेऽस्मिन् ग्रन्थे विवेचितानि वर्तन्ते । प्रामुख्येन वेदान्तदर्शनस्य प्रतीतिः बहुषु स्थलेषु जायते । मङ्गलाचरणमेव द्रष्टव्यं प्रथमं तावत्—

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ।।

(भाग. १.१.१)

अर्थात् यस्माद् इदं जगत् सृष्टिं, स्थितिं, प्रलयमवाप्नोति । यतो हि सर्वेषु सद्रूपपदार्थेषु अनुगतं असत्पदार्थैः पृथगस्ति जडस्थाने चेतनत्वं भजते । नास्ति परतन्त्रं स्वयंप्रकाशं विद्यते । विपश्चितोऽपि नितरां मुह्यन्ति । तेजोमय्यासु सूर्यरश्मिषु जलस्य, जले स्थलस्य तथा च स्थले जलस्य भ्रान्तिर्जायते तथैव च त्रिगुणात्मिका सृष्टिः जाग्रत्-स्वप्न-सुषुप्तिस्वरूपा मिथ्याभूतायां सति अधिष्ठानसत्यया सत् प्रतीयते । स्वज्योतिषा सर्वदा हि मायया मुक्तस्य परमात्मनः चिन्तनं विदधत् तस्यैव ध्यानं करोति भागवतकारः । सत्यरूपं वयं नितरां स्मरामः ।

धर्मः प्रोज्झितकैतवोऽत्र परयो निर्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।। (भाग. १.१.२)

भागवतेऽस्मिन् मोक्षपर्यन्तं कामनारहितस्य परमातिपरमधर्मस्य निरूपणं सञ्जातम् । अतः शुद्धान्तकरणानां सत्पुरुषाणां कृते ज्ञातव्यस्य वस्तुनः निरूपणं जातं यत् पापत्रयाणां विनाशं परमकल्याणप्रदायकञ्च वर्तते ।

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः ।।
(भाग.१.१.३)

अर्थात् श्रीमद्भागवतं वेदस्वरूपस्य कल्पवृक्षस्य फलं वर्तते । श्रीशुकदेव-रूपस्य शुकस्य मुखान्निसृतं परमानन्ददायकं अमृतसन्निभं रसं पीत्वा जनाः अमरत्वं यान्ति । एवमेव त्रिषु श्लोकेषु भागवतस्य प्रतिपाद्यं आत्मनः ब्रह्मणश्च एकत्वभावं यद् वेदानामपि सारभूतं गूढञ्च विद्यते—

सर्ववेदान्तसारं यद् ब्रह्मात्मैकत्वलक्षणम् ।
वस्त्वद्वितीयं तन्निष्ठं कैवल्यैकप्रयोजनम् ।।
(भागवत. १२.१३.१२)

यत् समेषां उपनिषदां सारं ब्रह्मणः आत्मनश्च एकत्वरूपमद्वितीयं सदवस्तु तदेव श्रीमद्भागवतस्य प्रतिपाद्यं विद्यते । निर्माणमेव कैवल्याय मोक्षाय च विद्यते ।

भागवते स्थले स्थले दार्शनिकं चिन्तनं विद्यते । एकस्मिन्नेवानेकेषां भासत्वं विद्यते । दर्शनदृष्ट्या दर्शनसन्दर्भे भारतस्य प्राचीनत्वं चेत्, पश्यामः तदा तु त्वेकैव दर्शनमासीत् । यद् विश्वदर्शनं कथ्यते, परन्तु शनैः शनैः सांख्ययोगदर्शनं तस्यैव परिवर्तितं रूपमेव जातः, यत् संस्कृतसाहित्यस्य कृते वैदिकसम्पद्रूपेण प्राप्तम् । सांख्ययोगस्य प्रवर्तकः कपिलो मुनिः वर्तते । भागवते ब्रह्मणावगतमेव—

भगवन्तं परं ब्रह्म सत्त्वेनांशेन शत्रुहन् ।
तत्त्वसंख्यानविज्ञप्त्यै जातं विद्वानजः स्वराड् ।।
(भाग. ३-२४-१०)

भागवते अग्नेरवतारः कपिलः सांख्यशास्त्रस्य प्रवर्तकः स्वीकृतः । सांख्यशास्त्रस्योदेश्यं सम्यग् ज्ञानं वर्तते । अमरकोषे सांख्यशब्दस्यार्थः विचारणा च जाता । समन्वयमेष आदिकाले वेदैः उपनिषद्भिश्चाङ्गीकृतम् । तदैक्यभावेन भारतीयषड्दर्शनेषु गृहीतम् । वास्तविकरूपेण समेषां दर्शनानां विषयः जीव-जगत-ब्रह्म-मायादयः सन्ति गीतायामपि—'सांख्ययोगौ पृथग्बालाः प्रवदन्ति न पण्डिताः' (श्रीमद्भगवद्गीता ५-४) अल्पज्ञानिनः सांख्यं पृथक् स्वीकुर्वन्ति । योगः सांख्यपूरकः । तत् सर्वश्रेष्ठज्ञानं कृष्णः एवास्ति । तत्कर्म कृष्णमयं हि विद्यते ।

वासुदेवपरा वेदा वासुदेवपरा भावाः ।
वासुदेवपरा योगाः वासुदेवपरा क्रियाः ।। (भाग. १-२-२८)

योगकर्माणि कृष्णस्य कृते सम्पादितानि भवन्ति । भागवते अनेकेषु स्थलेषु तत्त्वानां विवेचनं विहितम् । योगदर्शनदृष्ट्या दशमस्कन्धस्य वैशिष्ट्यं विद्यते । अनाहदनाद

एव भगवतः श्रीकृष्णस्य वंशीयन्त्रस्य ध्वनिः वर्तते। नाडीसंस्थानमेव गोपिकाः वर्तन्ते। कुण्डलिनी एव राधा प्रतिभासते। तथा मस्तिष्कस्य सहस्रदलकमलं वृन्दावनमिवाभासते। यत्र आत्मनः परमात्मनश्च परमं सुखमयं मिलनं भवति। यत्र जीवात्मनः समग्राः शक्तयः ईश्वरीयविभूतिभिः सह मनोहरं नृत्यं विदधति। दशमे स्कन्धे भगवतः महायोगेश्वरत्वस्यैकं विचित्रं चित्रं दर्शनीयं विद्यते।

रासोत्सवः सम्प्रवृत्तो गोपीमण्डलमण्डितः।
योगेश्वरेण कृष्णेन तासां मध्ये द्वयोर्द्वयोः॥

(भाग. १०-३३-३)

समस्तानां योगानां स्वामी द्वयोः गोपिकयोः मध्ये प्रकटिता सञ्जाता। भगवतः कृष्णस्य बालक्रीडा मातुः कृते आश्चर्यं जनयति। बालसुलभचेष्टाभिः भगवता मृद्भक्षिते सति यदा जननी मुखमवलोकयति तदाश्चार्ययुता जाता।

किं स्वप्न एतदुतदेव माया किं वा मदीयो वत बुद्धिमोहः।
अथो अमुष्यैव ममार्थकस्य यः कश्चनोत्पत्तिक आत्मयोगः॥

(भाग. १०.८.४०)

मातानुचिन्तयति यदीयः बालकः जन्मजातः योगी वर्तते। एवं भगवते योगदर्शनस्य दर्शनं भवति।

भारतीये वाङ्मये न्यायशब्दः विभिन्नेषु अर्थेषु प्रयुज्यते व्युत्पत्यनुसारेण नि-उपसर्गपूर्वकं इण्गतौ धातोः घञ्प्रत्यये जाते न्यायशब्दः जायते। यस्यार्थः उचितं भवति। दर्शनशास्त्रे नीयते प्राप्यते विनिश्चितार्थं सिद्धिरनेन इति न्यायः।

(न्यायभाष्यवात्स्यायन.)

न्यायदर्शनं वैशेषिकदर्शनं समानमेव तिष्ठतः। यतो हि द्वावपि परमाणुभिः जगदुत्पत्तिमङ्गीकुरुतः। ताभ्यामनुसारेण ब्रह्मस्वरूपायां सूक्ष्मावस्थानां प्रलयं यावत् सर्वासामवस्थानामुपभोगं करोति। परमेश्वरेच्छया सृष्टिविषयकेच्छयैव स्पन्दनं भवति। (भाग. ३.११-०५) द्वाभ्यां परमाणुभ्यामणुः त्रयाणामणूनां समन्वयेन त्रसरेणुर्जायते। न्यायवैशेषिकदर्शनं यथार्थतया ईश्वरवादमङ्गीकरोति। जीव-जगत्-ईश्वर इति त्रीणि सत्यानि भवन्ति। तथा सनातनस[illegible]ः प्रतिपद्यते। सत्यासत्ययोः भेदः न्यायस्य प्रमुखो विषयः। भागवते न्यायवैशेषिकस्यानेकेषां तत्त्वानां दिग्दर्शनं सौन्दर्येण सारल्येन च विहितम्।

मीमांसाशब्दः मान्धातोः जिज्ञासार्थे सन्प्रत्यये सति निष्पद्यते। तात्पर्यं यस्य ब्रह्मस्वरूपस्य व्याख्या एव। धर्मः ब्रह्म चेति मीमांसादर्शनस्य विभागद्वयं विद्यते।

ब्रह्म-आत्मा-जीवादितत्त्वानि उपनिषद्भिः सह सम्बन्धितानि। अस्मादेवोत्तरमीमांसा तथा वेदस्यान्तिमः भागत्वाद् वेदान्तमपि कथ्यते। मीमांसादर्शनं वेदान् शाश्वतं नित्यं चाङ्गीकरोति यतो महर्षिणा जैमिनीभगवता वेदानां प्रामाण्यवादत्वं निर्मितम्। कर्माकर्मधर्माधर्माणां फलस्वरूपं तदेवास्ति।

प्रवृत्ताय निवृत्ताय पितृदेवाय कर्मणे।
नमोऽधर्मविपाकाय मृत्यवे दुःखदाय च ।।(भाग. ४.२४.११)

भागवते कर्मज्ञानोपासनानां सुन्दरं समन्वयं विद्यते। अनेके प्रसङ्गाः धर्मप्रधानकर्मणः पुष्टिं कुर्वन्ति।

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सताम्।
वैद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम् ।।(भाग. ५.७.५)

भारतीये हि दर्शने वेदान्तदर्शनं प्रसिद्धतमं वर्तते। ज्ञानमेवास्य मूलाधारः। वैदिकसाहित्येषु उपनिषत्सु आरण्यकेषु यद् ज्ञानं विकीर्णं वर्तते, तदेव वेदान्ते परिलक्ष्यते। सृष्टेः पूर्वं पश्चाद् ब्रह्म एवाभिवर्तते। एवं वेदान्तिनो भणन्ति।

अहमेवासमेवाग्रे नान्यद् यत् सदसत् परम्।
पश्चादहं यदेतच्च योऽवशिष्येत् सोऽस्म्यहम् ।।(भाग. २-९.३२)

भागवते दार्शनिकसिद्धान्तानां सरलतयोपस्थापनं जातम्। महर्षिणा वेदव्यासेन सर्वदर्शनानां मूलतत्त्वानां विवेचनं भागवते सुष्ठुतया विहितम्। क्वचित् मानवधर्मं क्वचित् कर्मयोगं कुत्रचिच्च वेदान्तमाश्रित्य दार्शनिकताधारेण भक्तिपरकतत्त्वानि प्रतिपादितानि। भागवतकारेण सर्वदर्शनानां समन्वयं विदधन् वेदान्तदर्शनस्य स्थापनं प्राधान्येन विहितम्। दार्शनिकसिद्धान्तानां रसात्मकता भागवते आप्लाविता।

समासतः निगदितुं शक्यते यद् भागवते दार्शनिकचिन्तनं बाहुल्येनोपलभ्यते। इदं हि समग्रे विश्वेस्मिन् परिपाल्यते रसास्वाद्यते चेति शम्।

भागवते भक्तिस्वरूपम्

डॉ. महेशझाः

❀❀❀

श्रीमद्भागवते एकादशस्कन्धे परमकारुणिकेन भगवता श्रीकृष्णेन नृणां परमनिःश्रेयस्साधनीभूतास्त्रयो योगाः निरूपिताः । तद्यथा—

योगास्त्रयो मया प्रोक्ता नृणां श्रेयोविधित्सया ।
ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कश्चन[1] ।।इति ।

एतन्मध्ये कर्मयोगो न साक्षान्निःश्रेयसहेतुः, किन्तु "तमेतमात्मानं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन" इत्यादिश्रुत्या चित्तशुद्धिद्वारा ज्ञानभक्त्योरुपकारकतया परम्परया एव मोक्षसाधनत्वं कर्मणः । मनो हि स्वतन्त्रम्, अस्माकं वशे न वर्तते । बलवद्भगवच्चिन्तने प्रवर्त्यमानमपि क्षणेन किमपि विषयान्तरमनुधावति । तस्मादादौ मनसो वशीकरणे यतितव्यम् । तत्रोपायः कर्मयोगः । विहितेषु कर्मसु स्ववर्णाश्रमानुगुणं किमपि परिगृह्य फलाभिसन्धिं विना भगवदाराधनतया तस्यानुष्ठानं कर्मयोग इति व्यवह्रियते । यथावदनुष्ठितेनानेन निर्मलीभूतं मनोऽस्माकं वश्यं भवति । ततः परं तेन शरीरेन्द्रियप्राणव्यतिरिक्तं चिन्मयमणुपरिमाणं भगवत्परतन्त्रं यदस्मदात्मस्वरूपम्, तद्ध्यानं कर्तव्यम् । अयमेव ज्ञानयोग इत्युच्यते । चिराभ्यस्तो ज्ञानयोगः अस्मदात्मस्वरूप-साक्षात्कारं जनयति । आत्मसाक्षात्कारे लब्धे स्वस्वरूपस्य यथावद्विशदमुपलब्धत्वाद् यस्य वयं परतन्त्राः, योऽस्माकं निरुपाधिकः स्वामी, यस्य कैङ्कर्यकरणमेवास्माकमनुत्तमः पुरुषार्थः, तस्मिन् भगवति प्रावण्यं मनसः स्वयं सम्पद्यते । ततो भक्तियोगानुष्ठाने नास्ति श्रमः ।

वस्तुतः ज्ञानयुक्तभक्तेः परममहत्त्वम् । किन्तु केवलज्ञानापेक्षया केवलभक्ति-र्गरीयसी । यतो हि ज्ञानेनाक्षरब्रह्मणः प्राप्तिः, भक्त्या तु परब्रह्मणः श्रीकृष्णेन सह रममाणः निरतिशयानन्दमनुभवति जीवः । भक्तौ प्रासादानन्दो रसपानं च फलम् । ज्ञाने दुःखाभावमात्रं फलम् । भक्तौ पूर्णानन्दानुभवः, ज्ञाने स्वरूपेण प्रकर्षतः फलम्, भक्तौ मूलत एव निरतिशयानन्दः फलम् । भक्तौ पूर्णानन्दानुभवः, ज्ञाने स्वरूपेण प्रकर्षतः फलम्, भक्तौ मूलत एव निरतिशयानन्दः, ज्ञाने प्रथमं कष्टम्, अन्ते दुःखाभावोऽगणितानन्दश्च । भक्तौ "आक्षिप्तचित्ताः प्रमदारमापतेस्तास्ताविचेष्टा

---

१. ११.२०.०६ ।

जगृहुस्तदात्मिकाः ।' (१०/३०/२) इति भागवतोक्तदिशा सकला भगवल्लीला भक्तास्तु तन्मनस्काः, तदालापाः, तद्विचेष्टाः, तदात्मका भूत्वा स्वयमेव कुर्वन्ति । ज्ञाने तु "अहं ब्रह्मास्मि" (बृहदा. १/४/१०) इत्यादिवाक्यैः केवलमक्षरभावना । ज्ञाने कामक्रोधादयः प्रतिबन्धकाः, भक्तौ तु तेऽपि सहायकाः । तदुक्तं श्रीमद्भागवते—

कामं क्रोधं भयं स्नेहमैक्यं सौहृदमेव च ।
नित्यं हरौ विदधतो यान्ति तन्मयतां हि ते[1] ।।इति ।

किञ्च—

गोप्यः कामाद् भयाद् कंसो द्वेषाच्चैद्यादयो नृपाः ।
सम्बन्धाद् वृष्णयः स्नेहाद् यूयं भक्त्या वयं विभो[2] ।।

इत्येवं कामक्रोधादिभ्योऽपि भगवत्साम्यं प्राप्ताः । एवञ्च—"न ज्ञानं न च वैराग्यं प्रायः श्रेयो भवेदिह" इत्येवं केवलज्ञानवैराग्यादीनामश्रेयस्करत्वं प्रदर्श्य "केवलेन हि भावेन गोप्यो गावः खगा मृगाः" इत्यनेन केवलभक्त्या तिरश्चामपि भगवत्प्राप्तिकथनाद् नूनं ज्ञानापेक्षया भक्तेः गरीयस्त्वं सुप्रतीतं भवति ।

भजसेवायामिति धातोर्भावे क्तिन् प्रत्ययेन भक्तिरिति पदं निष्पन्नं भवति । पितृभक्तिर्मातृभक्तिः पतिभक्तिरित्यादिकापि भक्तिरेव, किन्तु न पारमार्थिकी । तासां चापरमार्थिकं नश्वरं न्यूनमेव फलम्—

यान्ति देवव्रता देवान्पितृन् यान्ति पितृव्रताः ।
भूतानि यान्ति भूतेज्या यान्ति मद्याजिनोऽपि माम्[3] ।।

इति भगवद्वचनात् न तत्फलं परमं चरमं वा, अतस्ताः पित्रादिभक्तयो न मुख्यतो भक्तिपदेनाभिहिताः । तर्हि किं नाम भक्तिरित्याकाङ्क्षायां श्रीधरस्वामिभिः श्रीमद्भागवतीयद्वितीयपद्यव्याख्यानावसरे उक्तम्—'श्रीकृष्णस्यानुकूल्येन श्रवणादिका भक्तिर्भजनम्' इति ।

नारदपञ्चरात्रे तु—

सर्वोपाधिविनिर्मुक्तं तत्परत्वेन निर्मलम् ।
हृषीकेण हृषीकेशसेवनं भक्तिरुच्यते ।

किञ्च—

अनन्यममता विष्णौ ममता प्रेमसङ्गता ।
भक्तिरित्युच्यते भीष्मप्रह्लादोद्धवनारदैः ।।

एभिर्वचनैः परिलक्ष्यते यद् भगवत्यनन्यं प्रेमैव भक्तिरस्ति । यद्यपि यथाकथञ्चिद् सम्पदादिलाभेच्छया भगवद्भजनमपि भक्तिरेव, किन्तु सा सकामा एव न निष्कामा ।

---

१. १०.२९.१५; २. ७.०१.३० ।
३. गीता. ९.२५ ।

सकामा भक्तिश्च सगुणैव। सा च एकाशीतिप्रकारा श्रीमद्भागवते तृतीयस्कन्धे श्रीकपिलदेवहूतिसंवादादवगम्यते। तत्र मोक्षकामनयापि या भक्तिः, सा हि सात्त्विकी श्रेष्ठा सगुणैव स्यान्न निर्गुणा।

एवञ्च गौणीपराभेदाद् भक्तिस्तावद् द्विविधा। गौणी पुनर्द्विधा—वैधी रागात्मिका च। तत्र वैधी पुनर्नवधा। तथाचोक्तं प्रह्लादेन—

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्[1] ।। इति।

तत्र भगवद्गुणगाथायाः श्रवणं नाम श्रवणभक्तिः। श्रवणभक्तिः सर्वधर्मेभ्यः श्रेष्ठा स्वीकृताऽस्ति। तथा चोक्तं श्रीमद्भागवतमाहात्म्ये—

श्रवणं सर्वधर्मेभ्यो वरमन्ये तपोधनाः।
वैकुण्ठस्थो यतः कृष्णो श्रवणाद्यस्य लभ्यते[2] ।।

महाराजपरीक्षितः श्रवणभक्तिप्रभावेणैव परमात्मानं प्राप्तवान्। तदुक्तं श्रीमद्भागवतमाहात्म्ये—

असारे संसारे विषयविषसङ्गाकुलधियः
क्षणार्धं क्षेमार्धं पिबत शुकगाथाऽतुलसुधाम्।
किमर्थं व्यर्थं भो ? व्रजत कुपथे कुत्सितपथे।
परीक्षित्साक्षी यच्छ्रवणगतमुक्त्युक्तिकथने[3] ।।

अजामिलोऽपि नारायणशब्दोच्चारणेनैव यमपाशाद्विमुक्तः। तदुक्तं यमेन—

नामोच्चारणमाहात्म्यं हरेः पश्यत पुत्रकाः।
अजामिलोऽपि येनैव मृत्युपाशादमुच्यत[4] ।।

अतो श्रवणादन्यः नास्ति भगवत्प्राप्तिसाधकः कोऽपि सुगमः पन्थाः। भगवच्चरित्रकीर्तनं नाम कीर्तनभक्तिः। श्रीमद्भागवते यथा—

सङ्कीर्त्यमानो भगवाननन्तः श्रुतानुभावो व्यसनं हि पुंसाम्।
प्रविश्य चित्तं विधुनोत्यशेषं यथा तमोऽर्कोऽभ्रमिवातिवातः[5] ।।
इत्थं हरेर्भगवतो रुचिरावतारवीर्याणि बालचरितानि च शंतमानि।
अन्यत्र चेह च श्रुतानि गृणन् मनुष्यो भक्तिं परां परमहंसगतौ लभेत[6] ।।

अपि च—

नामसङ्कीर्तनं यस्य सर्वपापप्रणाशनम्।

---

१. भा. ०७.०५.२३; २. भा. ०६.७६।
३. भा. ६.१००; ४. भा. ०६.०३.२३।
५. भा. १२.१२.४७; ६. भा. ११.३१.२८।

प्रणामो दुःखशमनस्तं नमामि हरिं परम्[१] ।।

कीर्तनभक्तिशिरोमणिश्रीचैतन्यमहाप्रभोः मतानुसारं भगवन्नाम एवं सङ्कीर्तनीयं येन नेत्राभ्यामश्रुधारा प्रवहेद्, वाणी गद्‌गदा भवेत् सर्वाङ्गञ्च पुलकितं स्यात्। तेन—

हरे राम हरे राम राम राम हरे हरे ।
हरे कृष्ण हरे कृष्ण कृष्ण कृष्ण हरे हरे ।।

इति महामन्त्रो भगवन्नामसु सर्वश्रेष्ठः स्वीकृतः ।

भगवच्चरितचरणारविन्दादिस्मरणात्मिका स्मरणभक्तिः । श्रीमद्भागवते यथा—

अविस्मृतिः कृष्णपदारविन्दयोः क्षिणोत्यभद्राणि शमं तनोति च ।
सत्त्वस्य शुद्धिं परमात्मभक्तिं ज्ञानं च विज्ञानविरागयुक्तम्[२] ।।

भगवत्पादाब्जसेवनं सेवनभक्तिः । श्रीमद्भागवते यथा—

यत्पादसेवाभिरुचिर्मनस्विनामशेषजन्मोपचितं मलं धियः ।
सद्यः क्षिणोत्यन्वहमेधती सती यथा पदाङ्गुष्ठविनिःसृता सरित्[३] ।।

पाषाणादिनिर्मिताया भगवन्मूर्तेः पूजनमर्चनभक्तिः । सा च भगवतोऽतिप्रीतिकारिणी भवति । भगवतोऽर्चनेन भक्तानां हृदये प्रसन्नता जायते । एवञ्च भगवद्भावप्रीतिश्च शनैः शनैः समुदेति । तदुक्तं व्यासदेवेन श्रीमद्भागवते—

श्रीविष्णोरर्चनं ये तु प्रकुर्वन्ति नरा भुवि ।
ते यान्ति शाश्वतं विष्णोरानन्दं परमं पदम् ।।

अनया भक्त्या स्वर्गापवर्गसम्प्राप्तिः समस्तसिद्धिलाभश्च सञ्जायते । यदुक्तम्—

स्वर्गापवर्गयोः पुंसां रसानां भुवि मानसम् ।
सर्वासामपि सिद्धीनां मूलं तच्चरणार्चनम् ।।

श्रीकृष्णेनापि गीतायामुक्तम्—

यतः प्रवृत्तिर्भूतानां येन सर्वमिदं ततम् ।
स्वकर्मणा तमभ्यर्च्य सिद्धिं विन्दति मानवः ।। (१८/४६)

भगवच्चरणारविन्दयोर्वन्दनं वन्दनभक्तिरुच्यते । तथा चोक्तं श्रीमद्भागवते—

ध्येयं सदा परिभवघ्नमभीष्टदोहं तीर्थास्पदं शिवविरिञ्चिनुतं शरण्यम् ।
भृत्यार्तिहं प्रणतपालभवाब्धिपोतं वन्दे महापुरुष ते चरणारविन्दम्[४] ।।

अन्यत्रापि वन्दनभक्तेर्माहात्म्यमाह—

एकोऽपि कृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः ।

---

१. भा. १२.१३.२३; २. भा. १२.१२.५४ ।
३. भा. ०४.२१.३१; ४. भा. ११.५.३३ ।

दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय ।।

इत्थं वन्दनभक्त्या भक्तेष्वहङ्कारापनयनद्वारा भगवद्भावस्योदयो भवति । दासवत् सर्वतोभावेन भगवद्भक्तिसम्पादनं नाम दास्यभक्तिः । दास्यभक्त्या भगवत्सेवाभ्यासद्वारा भक्तहृदयतः सर्वथाऽभिमानापनयनं भवति । भगवन्तमेव सर्वस्वं मनुते भक्तः । तथा चोक्तं श्रीमद्भागवते—

न वासुदेवात् परमस्ति मङ्गलं न वासुदेवात् परमस्ति पावनम् ।
न वासुदेवात् परमस्ति दैवतं तं वासुदेवं प्रणमन्न सीदति ।।

भगवन्तं सखायं मत्वा तदनुकूलाचरणं सख्यभक्तिः । अत्र भगवत्सखिरूपेण भक्तहृदये मधुरमयस्य प्रेम्णः विकासो जायते । सख्यभक्तिप्राप्तौ भगवत्प्रेमिभिः सखिभिः सह सङ्गः, तेषां चरित्रस्याध्ययनमावश्यकं भवति । तदुक्तं श्रीमद्भागवते—

अहो भाग्यमहो भाग्यं नन्दगोपव्रजौकसाम् ।
यन्मित्रं परमानन्दं पूर्णं ब्रह्म सनातनम्[1] ।।

एवमेव सख्युः सुदाम्नः सेवापरस्य भगवतः श्रीकृष्णस्यावस्थां श्रीमद्भागवते इत्थं समुपवर्णितः दृश्यते—

सख्युः प्रियस्य विप्रर्षेरङ्गसङ्गातिनिर्वृतः ।
प्रीतो व्यमुञ्चदब्बिन्दून् नेत्राभ्यां पुष्करेक्षणः ।।
अथोपवेश्य पर्यङ्के स्वयं सख्युः समर्हणम् ।
उपहृत्यावनिज्यास्य पादौ पादावनेजनीः ।।
अग्रहीच्छिरसा राजन् ! भगवांल्लोकपावनः ।
व्यलिम्पद् दिव्यगन्धेन चन्दनागुरुकुङ्कुमैः[2] ।।

भगवत्यात्मसर्वस्वसमर्पणमात्मनिवेदनभक्तिरुच्यते । स्वात्मनिवेदनद्वारा भक्तानां सकला शारीरिकी-वाचनिकी-मानसिकी च चेष्टा भगवद्भावमयी भवति । भक्त आत्मनः सर्वं वस्तु भगवदर्थमेव मनुते । इत्थमात्मनिवेदनभक्त्या भक्तानां हृदये भगवद्विषयेऽपूर्व-दिव्यरागस्योदयो जायते । तथा चोक्तं श्रीमद्भागवते—

स वै मनः कृष्णपदारविन्दयोर्वचांसि वैकुण्ठगुणानुवर्णने ।
करौ हरेर्मन्दिरमार्जनादिषु श्रुतिं चकाराच्युतसत्कथोदये ।।
मुकुन्दलिङ्गालयदर्शने दृशौ तद्भृत्यगात्रस्पर्शेऽङ्गसङ्गमम् ।।
घ्राणञ्च तत्पादसरोजसौरभे श्रीमत्तुलस्यां रसनां तदर्पिते ।।
पादौ हरेः क्षेत्रपदानुसर्पणे शिरोहृषीकेशपदाभिवन्दने ।
कामं च दास्ये न तु कामकाम्यया यथोत्तमश्लोकजनाश्रयारतिः[3] ।।

---

१. भा. १०.१४.३२; २. भा. १०.८०.१९-२१ ।
३. भा. ९.४.१८-२० ।

नवधा वैधीभक्तिवर्णनप्रसङ्गे श्रीरूपगोस्वामिना नवानामपि भक्तीनामेकैकमुदाहरणं प्रदाय तत्फलञ्च श्रीकृष्णपादारविन्दप्राप्तिरेव प्रतिपादितम्। तथा हि—

श्रीविष्णोः श्रवणे परीक्षिदभवद् वैयासकिः कीर्तने
प्रह्लादः स्मरणे तदङ्घ्रिभजने लक्ष्मीः पृथुः पूजने।
अक्रूरस्त्वभिवादने कपिपतिर्दास्येऽथ सख्येऽर्जुनः
सर्वस्वात्मनिवेदने बलिरभूत्कृष्णाप्तिरेषां परम्॥

एवञ्च नवविधास्वासु वैधीभक्तिष्वेकविधयाऽपि भक्त्या भगवन्तं साक्षात्कृत्य भक्तोऽनायासेन संसारसागरादुत्तर्तुं शक्नोति। किं पुनः प्रह्लाद इव यत्र नवधा भक्तिर्भवेत्।

इत्थं गुरूपदेशात् विधिनिषेधानुकूलं साधनं कुर्वतो भक्तस्य हृदये प्रथमं वैधी भक्तिरुदेति। ततो निरन्तरं भगवच्चरणाविन्दविषयिणी रागात्मिका भक्तिराविर्भवति, यया भक्तहृदये आनन्दातिरेकः सञ्जायते। वंशीनिनादमाकर्ण्य स्वान्तिकमुपगता गोप्यो यदा कृष्णेनोक्ता यत्—

स्वागतं वो महाभागाः प्रियं किं करवाणि वः।
व्रजस्यानामयं कच्चिद् ब्रूतागमनकारणम्॥
रजन्येषा घोररूपा घोरसत्त्वनिषेविता।
प्रतियात व्रजं नेह स्थेयं स्त्रीभिः सुमध्यमाः॥
मातरः पितरः पुत्रा भ्रातरः पतयश्च वः।
विचिन्वन्ति ह्यपश्यन्तो मा कृढ्वं बन्धुसाध्वसम्॥
दृष्टं वनं कुसुमितं राकेशकररञ्जितम्।
यमुनानिलनीलैजत्तरुपल्लवशोभितम्॥
तद् यात मा चिरं गोष्ठं शुश्रूषध्वं पतीन् सतीः।
क्रन्दन्ति वत्सा बालाश्च तान् पाययत दुह्यत[1]।

तदा रागात्मिका भक्तिरसाभिप्लुता एव ता भगवन्तं श्रीकृष्णमेवमुक्तवत्यः—

मैवं विभोऽर्हति भवान् गदितुं नृशंसं सन्त्यज्य सर्वविषयांस्तव पादमूलम्।
भक्ता भजस्व दुरवग्रह मा त्यजास्मान् देवो यथाऽऽदिपुरुषो भजते मुमुक्षून्[2]॥

अपि च—

चित्तं सुखेन भवतापहृतं गृहेषु यन्निर्विशत्युत करावपि गृह्यकृत्ये।
पादौ पदं न चलतस्तव पादमूलाद्यामः कथं व्रजमथो करवाम किं वा[3]॥

वस्तुतः रागात्मिकायां भक्तौ भक्तः भगवत्प्रेमविह्वलः सन् उन्मत्तवत् नृत्यति गायति रोदिति हसति च। तथा चोक्तं श्रीमद्भागवते—

१. भा. १०.२९.१८-२२; २. भा. १०.२९.३१।
३. भा. १०.२९.३४।

क्वचिद् रुदन्त्यच्युतचिन्तया क्वचिद्धसन्ति नन्दन्ति वदन्त्यलौकिकाः ।
नृत्यन्ति गायन्त्यनुशीलयन्त्यजं भवन्ति तूष्णीं परमेत्य निर्वृताः[1] ।।

भगवान् श्रीकृष्णोऽपि उद्धवं प्रति रागात्मिकायामवस्थायां स्थितस्य भक्तस्य दशामेवं वर्णयति—

वाग्गद्गदाद्रवत्यस्य चित्तं रुदत्यभीक्ष्णं हसति क्वचिच्च ।
विलज्ज उद्गायति नृत्यते च मद्भक्तियुक्तो भुवनं पुनाति[2] ।।

एवञ्च गुरुवाक्यशास्त्रवचनाज्ञानुसारं वैधीभक्तिमभ्यस्यतो भक्तस्य हृदये सा रागात्मिका भक्तिरुदेति, यस्यां भक्तहृदयं सांसारिकविषयेभ्य उपरतं भूत्वा भगवति लीनं भवति। इत्येवंरूपाभक्तिर्योगशब्दघटनेन भक्तियोग इत्युच्यते। इयं भक्तिरहरहरभ्यस्यमाना तथा परिपक्वा भवति यथा तदर्हे काले दर्शनसमानाकारता तस्याः सम्पद्यते। अनुसन्धानं स्वयं स्मृतिरूपमपि वैशद्यातिशयात् साक्षात्कार इव भवति। इयं दर्शनसमानाकारता। इमां दशां प्राप्ता भक्तिरेव 'पराभक्तिः' इत्युच्यते। यस्यामहङ्कारदेहात्मभावौ नश्यतः सर्वात्मदृष्टिश्च सञ्जायते। उक्तञ्च जगद्गुरुशङ्कराचार्यचरणैः—

सम्पूर्णं जगदेव नन्दनवनं सर्वेऽपि कल्पद्रुमाः
गाङ्गं वारि समस्तवारिनिवहः पुण्याः समस्ताः क्रिया ।
वाचः प्राकृतसंस्कृताः श्रुतिगुरो वाराणसी मेदिनी
सर्वावस्थितिरस्य वस्तुविषया दृष्टे परे ब्रह्मणि ।।

भक्तेः के गुणा इति जिज्ञासायां प्राह भगवान् वादरायणः—

क्लेशघ्नी शुभदा मोक्षलघुताकृत् सुदुर्लभा ।
सान्द्रानन्दविशेषात्मा श्रीकृष्णाकर्षणी च सा ।।

स्कन्दपुराणे च—

अन्तःशुद्धिर्बहिःशुद्धिः तपःशान्त्यादयस्तथा ।
अमी गुणाः प्रपद्यन्ते हरिसेवाभिकामिनम् ।।

वस्तुतः भगवद्भक्तौ रूपस्यायुषश्च न वा सदाचारस्य सद्गुणस्य च प्राधान्यमस्ति। न वा भक्तौ विद्याया धनस्य जातेर्बलस्य चोत्कर्षोऽप्यपेक्ष्यते, किन्त्वनन्यप्रेमरूपा भक्तिरेव प्रतीक्षते भगवान्। तथा चोक्तं भक्तिसामृतसिन्धौ जीवगोस्वामिना—

व्याधस्याचरणं ध्रुवस्य च वयो विद्या गजेन्द्रस्य का
का जातिर्विदुरस्य यादवपतेरुग्रस्य किं पौरुषम् ।
कुब्जायाः कमनीयरूपमधिकं किं तत्सुदाम्नो धनं
भक्त्यां तुष्यति केवलं न च गुणैर्भक्तिप्रियो माधवः ।।

---

१. भा. ११.३.३२; २. भा. ११.१४.२४ ।

किञ्च श्रीमद्भागवतमाहात्म्ये नारदेनोक्तं भक्तिं प्रति—

त्वं तु भक्तिः प्रिया तस्य सततं प्राणतोऽधिका ।
त्वयाऽऽहूतस्तु भगवान् याति नीचगृहेष्वपि ।। (२/३)

प्रगाढ्या भक्त्या प्रसन्नो सर्वशक्तिसम्पन्नो कर्तुमकर्तुमन्यथाकर्तुं सर्वथा समर्थो भगवान् सर्वमपि कार्यं परित्यज्य भक्तस्य कृतेऽलौकिकं कर्म करोति। भक्तस्य सर्वविधां विपदं वारयति, मनोरथं च सर्वं पूरयति। तदुक्तं भागवते—

सत्यं विधातुं निजभृत्यभाषितं व्याप्तिञ्च भूतेष्वखिलेषु चात्मनः ।
अदृश्यतात्यद्भुतरूपमुद्वहन् स्तम्भे सभायां न मृगं न मानुषम्[१] ।।

भगवद्भक्तिसमासक्तो भक्तः गोपदमिव संसारसागरमुत्तीर्य परमं पदं लभते— यथा श्रीमद्भागवते—

समाश्रिता ये पदपल्लवप्लवं महत्पदं पुण्ययशो मुरारेः ।
भवाम्बुधिर्वत्सपदं परं पदं पदं पदं यद्विपदां न तेषाम्[२] ।।

वस्तुतः भक्तिर्भगवतः प्राणतोऽप्यधिका प्रियाऽस्ति। भक्तस्तद्भक्तिं लब्ध्वा न पुनः जन्म-मरणचक्रचङ्क्रमितो भवति। तथा हि ब्रह्मादयो देवा देवकीगर्भगतं भगवन्तं स्तुवन्ति—

शृण्वन् गृणन् संस्मरयंश्च चिन्तयन् नामानि रूपाणि च मङ्गलानि ते ।
क्रियासु यस्त्वच्चरणारविन्दयोराविष्टचेता न भवाय कल्पते[३] ।

तस्मादात्मकल्याणकामभिः पुरुषैर्भगवत्स्वरूपसाक्षात्कारात्मकमुक्तिप्राप्तये तत्साधनत्वेनोपयोगिनीं भगवद्भक्तिरवश्यमनुष्ठेया, ययाऽन्तेऽवश्यं कल्याणं भवेत्। अत एव श्रीमद्भागवतमाहात्म्ये भगवद्भक्तानामेवं प्राशस्त्यमुक्तम्—

सकलभुवनमध्ये निर्धनास्तेऽपि धन्या
निवसति हृदि येषां श्रीहरेर्भक्तिरेका ।
हरिरपि निजलोकं सर्वथातो विहाय
प्रविशति हृदि तेषां भक्तिसूत्रोपनद्धः[४] ।।इति।

उपसंहारः–

ब्रह्मसूत्रभाष्यभूतस्य सर्वेष्वपि पुराणेषु श्रेष्ठस्य श्रीमद्भागवतस्य तात्पर्यं परात्परस्य परमेश्वरस्य भगवतः श्रीकृष्णस्य साक्षात्कार एव। स च साक्षात्कारः तस्यैवानन्यभक्तितो जायते। तदाह—श्रीकृष्णः उद्धवं प्रति—

न साधयति मां योगो न सांख्यं धर्म उद्धव ।
न स्वाध्यायस्तपस्त्यागो यथा भक्तिर्ममोर्जिता ।।

---

१. भा. ७.८.१८; २. भा. १०.१४.५८।
३. भा. १०.२.३७; ४. भा. ०३.७३।

भक्त्याहमेकया ग्राह्यः......................इति[१]।

तथा च कलौ भक्तिरेव साधनम्। सा द्विविधा गौणीपराभेदात्। गौणी पुनर्द्विधा वैधी रागात्मिका च। वैधी अपि श्रवण-कीर्तन-स्मरण-पादसेवन-अर्चन-वन्दन-दास्य-संख्यात्मनिवेदनरूपेण पुनर्नवधा विभज्यते। तत्र गुरूपदेशाद् विधिनिषेधानुकूलं साधनं कुर्वतो भक्तस्य हृदये प्रथमं या भक्तिरुदेति सा वैधी भक्तिरुच्यते। पुनः शास्त्रवचनानुसारं भक्तिमभ्यस्यतो भक्तस्य हृदये रागात्मिका भक्तिरुदेति, यस्यां भक्तहृदयं सांसारिकविषयेभ्य उपरतं भूत्वा भगवति लीनं भवति। एतत्परिपक्वदशायाः परिणाम एव पराभक्तिरित्युच्यते। यस्यामहङ्कारदेहात्मभावौ नश्यतः सर्वात्मदृष्टिश्च जायते। तथा चोक्तं श्रीमद्भागवते—

मुद्रणस्तुतिमात्रेण मयि सर्वगुहाशये।
मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ॥
लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम्[२]॥इति।

इयमेव साक्षान्मोक्षसाधनभूता भक्तिः। वस्तुतस्तु भक्ता भक्तिं पञ्चमपुरुषार्थ-रूपेणाङ्गीकुर्वन्ति। भगवता साक्षाद्दीयमानमपि मोक्षं नेच्छन्ति। तदुक्तं भगवता—

सालोक्यसार्ष्टिसामीप्यसारूप्यैकत्वमप्युत।
दीयमानं न गृह्णन्ति विना मत्सेवनं जनाः[३]॥

इत्थमस्याः भक्तेः स्वरूपं, प्रकाराः, तासां प्राप्तिसाधनान्यपि श्रीमद्भागवते तृतीयस्कन्धे एकादशस्कन्धे च विस्तरेण प्रोक्तानीति शम्॥

●

---

१. भा. ११.१४. २०-२१; २. भा. ३.२९.११-१२।
३. भा. ३.२९.१३।

श्रीमद्भागवतमहापुराणस्योत्कलीयं स्वरूपम्

डॉ. प्रमोदिनी पण्डा

❊❊❊

'पुरा नवं भवतीति पुराणमिति' यास्कमतं श्रीमद्भागवतेऽविकलतया प्रतिपादितमस्ति । यतो हि पुरा भूत्वाऽपीदानीं येन केनापि प्रकारेण नवनवीनतया लोकेषु जीवति भागवतपुराणमिति न कस्यापि सन्देहलेशः । यथा वेदानां प्रामाण्यं सिद्धमस्ति तथैव पुराणानां प्रामाण्यं वर्तत इति । वेदादधिकं पुराणस्य प्रामाण्यमस्ति इति पुराणस्योद्घोषः ।

वेदार्थादधिकं मन्ये पुराणार्थं वरानने ।
वेदाः प्रतिष्ठिताः सर्वे पुराणे नात्र संशयः ।।

यथा वेदः अपौरुषेयस्तथैव पुराणमपौरुषेयमिति मन्यन्ते केचन । परन्तु व्यासोक्तं सर्वपुराणमिति निर्विवादोऽयं प्रसङ्गः । केचन आधुनिकाः परम्परामतमविगण्य पुराणानां कालगणनां चक्रुस्तेषु डॉ. आर. सी. हाजरामहोदयानां कार्यं ख्यातिमलभत । तन्मतेन भागवतस्य रचना ईशवीय ५०० वर्षतः १००० मध्ये कृताऽस्ति । अस्तु, पुराणानां सनातनत्वं पुरुषकर्तृत्वं वा भवतु, तेषु पुराणतिलकं वैष्णवानां धनं साहित्यिकानां रत्नं श्रीमद्भागवते सर्वश्रेष्ठमिति निर्विवादोऽयं विषयः ।

महापुराणानामनन्तरं लिखितानि सन्ति बहूनि पुराणानि यानि उपपुराण-औपपुराण-उपौपपुराण-स्थलपुराणनाम्ना प्रथितानि सन्ति । एतानि विहाय विभिन्नेषु प्रान्तेषु प्रान्तीयभाषायां लिखितानि सन्ति पुराणानि, यानि खलु महापुराणानां सम्पोषकानि सन्ति । एतेषु प्रान्तेषूत्कलं भवति प्रमुखतमं स्थानं यत्र संस्कृतेन उत्कलभाषया चोपलब्धानि सन्ति पुराणानि । संस्कृतभाषया एकाम्रपुराणं पुरुषोत्तममाहात्म्यं कवित्वसंहिता, मुक्तिचिन्तामणिः नीलाद्रीमहोदयः प्राचीमाहात्म्यं च वर्तन्ते प्रसिद्धानि । उत्कलभाषया सारलादासप्रणीतं महाभारतं बलरामदासप्रणीतं रामायणं विहाय भागवतपुराणं प्रतिजनं प्रसिद्धिं प्राप्य इदानीमपि पुरपल्लीषु जीवितमस्ति ।

कविपरिचयः

इतिहासस्यालोडनेन ज्ञायते यद् उत्कले खिष्टीयचतुर्थ-शतकादारभ्य द्वादशशतकं यावत् शैववैष्णवाख्ये द्वे धारे प्रवहतः स्म। परन्तु द्वादशशतकात्परं रामानुज-विष्णुस्वामि-निम्बार्क-मध्व-वैष्णवाचार्याणां प्रभावेण उत्कले वैष्णवधर्मस्य प्रवर्तनं सञ्जातम्। पुर्यां विष्णुस्वामिनः मठत्रयमस्ति, यत्र वैष्णवधर्मस्य प्रचारः प्रसारश्चाभूताम्। अस्मिन्नैव क्रमे श्रीजगन्नाथदासस्य जनिर्बभूव। तत्समसामयिक-(Contemporary) पद्मपादसुधानिधिदाढ्यताभक्ति-जगन्नाथचरितामृतपुस्तकेषूपलब्धतथ्यानुसारं जगन्नाथदासस्य प्रादुर्भावकालः १४८७ ईशवीयो वर्तते। तदनुसारमसौ षष्ठिवर्षं यावज्जीवित आसीत् स्वपितृसंस्कारवशात् संस्कृतवाङ्मयेऽस्य महानधिकारः समजनि। असौ प्रतिदिनं श्रीजगन्नाथमन्दिरे पुराणपाठं करोति स्म। कृष्णप्रेम्णा प्रेरितः सन् मूलभागवते काठिन्यमनुभूय सरलतरलतया उत्कलभाषया कोमलललितपद्यबन्धेनानेन भागवतं व्यरचि। उत्कलभागवतं विहाय शैवागमभागवतं—दूतीबोधतुलाभिणा-अर्थकोलि-हरि-उषापरिणय-नीलगिरिध्यान-गजनिस्तारण-उद्धवजणाण-नित्यनीलाद्रिविलासकाव्यानि कवेः सन्ति रचनान्यन्यानि।

उत्कलभागवतस्य सूक्तयः

अस्मिन् ग्रन्थे बहवः सूक्तयः सन्ति प्रसङ्गक्रमेषु सङ्कलिताः। कतिपयसूक्तीनाम-विकलसंस्कृतानुवादो निम्नानुसारं प्रदत्तोऽस्ति।

उत्कलभागवते सूक्तयः	संस्कृतानुवादः
१. दण्डिवा शक्ति याट थाइ। से पुणि क्षमा आचरइ॥	१. यस्यास्ति दण्डसामर्थ्यं क्षमा तस्य विभूषणम्।
२. महते याहा आचरिवे। इतरे ताहा हि करिवे॥	२. यद् यदाचरते श्रेष्ठः लोकस्तदनु वर्तते।
३. ये प्राणी परे हिंसा करे। देवता पूजि से न तरे॥	३. यः प्राणी परं तु हिंसति। देवतां पूजन् तरति॥
४. सर्पकु क्षीर ये पिआन्ति। सर्पर घाते से मरन्ति॥	४. सर्पं यः क्षीरं पाययति सर्पघातेन मृत्युं याति।
५. सत्य उपरे धर्म नाहिं ए कथा शास्त्रे अछि कहि।	५. सत्यं विहाय धर्मो नास्ति। एतत्तु शास्त्रस्य भणितिः॥
६. अमृत विनय वचन। कहि तोषिव प्राणी मन।	६. अमृतविनयवचनम्। उक्त्वा तोषय जनमनः॥
७. दुःखे सञ्चित येते धन से सुखे नुहें प्रयोजन॥	७. दुःखे सञ्चितं यावद्धनम्। सुखे तन्नास्ति प्रयोजनम्॥

८. आहारे भल मन्द नाहि।
ये स्थाने येमन्त मिलइ॥
९. मर्त्यमण्डले जन्म होइ।
देवता होइले मरइ।
१०. आपणा हस्ते जिह्वा छेदि
के अछि तार प्रतिवादि

८. आहारे उच्चावचं नास्ति।
यत्स्थाने यथा तु मिलति॥
९. मर्त्यमण्डले जन्म नीत्वा।
देवता भूत्वापि स गन्ता॥
१०. स्वहस्ते स्वजिह्वाविच्छेदी।
कं पुनः तस्य प्रतिवादी॥

उत्कलीयभागवतस्यापूर्वता

इदं भागवतं मूलसंस्कृतभागवतस्याविकलानुवादो नास्ति, अपि तु विस्तरेण पद्यानुवादः सरलया भाषया वर्तते। दृष्टान्तरूपेण श्रीमद्भागवतस्य प्रथमश्लोकस्य सुविस्तरोऽनुवादः प्रदीयते।

मूलभागवतश्लोकः

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि॥

(भाग. १/१/१)

उत्कलभावानुवादः

न मईं नृसिंह चरण। अनादि परम कारण।
या विनु आदि मध्य अन्त। विचारे न घटे जगत॥
इन्द्रिय अर्थ से जाणइ। सुतेजे नित्य प्रकाशइ॥
आनन्द मने वेदसार। ब्रह्मारे ये कला विस्तार॥
याहार रूप हृदे चिन्ति। वेदपुरुष न जाणन्ति॥
मृत्तिका विकार येमन्त। जलरे हुअई कल्पित॥
जले उपल वृद्धि करि। मृगतृष्णारे येन्हे वारि॥
रूप अरूप, स्थिति तिनि। याहा गोचरे अनुमानि॥
स्वभावे नोहे से तेमन्त। ए सांख्य योगीङ्कर मत॥
आत्मप्रकाशे सदा थाइ। निरस्त कुहुक बोलाइ॥
सत्य परमानन्द हरि। या भावे भव सत्य करि॥
एमन्त सत्य रूप यार। ता पादे मोर नमस्कार॥
तांक चरणे नित्य ध्यान। करि तरन्ति साधु जन॥
से कृष्ण पाद हृदे धरि। प्रवधे गीत नाद करि॥
अशेष जनङ्कर हित। कहइ दास जगन्नाथे॥

श्रीमद्भागवतस्य क्लिष्टक्लान्तपदावली कथमुत्कलभाषया कोमलकान्तपदावलीं भावशबलतां च धत्ते तदनेनानुवादेन स्पष्टमनुमीयते। श्रीजगन्नाथदासस्य सृजनशीला चिन्तनधारा नितरामनवद्या। भागवतस्यास्य प्रतिचरणं नवाक्षरयुतम्। उत्कलभाषया रागः (गेयशैली) गुज्जरी वर्तते।

शैली

मधुरस्वरवर्णपदा रसभाववती जगन्मनोहरन्ती भागवतस्येयं वाणी वैदर्भीरीति-विजृम्भितेति निश्चप्रचं वक्तुं शक्यते। वैदर्भीरीतिर्यथा—

माधुर्यव्यञ्जकैर्वर्णैः रचना ललितात्मिका।
अवृत्तिरल्पवृत्तिर्वा वैदर्भी रीतिरिष्यते[१]॥

अस्याः रीतेरेकमुदाहरणं दिङ्मात्रमुदाह्रियते येन ज्ञातुं शक्यते यत्कथं सारल्यं व्यञ्जकवर्णयुतं लालित्यभरितं रसपेशलत्वं वर्तत अस्याः वाणीषु। प्रसङ्गो वर्तते बाणासुरस्य वीरतावर्णनम्।

उत्कलभागवतम्

बलिर पुत्र बाणासुर। दुर्जय दुष्ट दुराचार॥
तार सहस्र भुजबले। दुर्जय महीमण्डले॥
ईश्वर वरे भुज वहि। ताहाकु रणे वीर नाहिं॥
देखि उरन्ति सर्वजने। अजय ए तिनि भुवने॥

अस्य काव्यस्यापरं वैशिष्ट्यमस्ति प्रसादगुणः[२]। यथा शुष्केन्धनेष्वग्निः सहजतया व्याप्नोति तथैव सहृदयहृदयमसावाप्लावयति।

अलङ्कारयोजना

यद्यपि उपमारूपकादयः प्रमुखाः अलङ्काराः जगन्नाथदासस्य कवित्वमलङ्कुर्वन्ति, परन्तु वर्तत असौ अनुप्राससरसिकः, यतिपातः (तुकबन्दी) अस्य रहस्यम्। यथा

भागवतम्
गोविन्द गोविन्द गोविन्द।
पदु गलुछि मकरन्द॥
से मकरन्द पान करि।
हेले तरिले व्रजनारी॥
से व्रजनारीङ्क पयरे।
मन मो थाउ निरन्तरे॥

भावानुवादः
गोविन्द गोविन्द गोविन्द
पद्भ्यां गलति मकरन्दः।
तन्मकरन्दं पायं पायं
व्रजन्ति गोप्यः गायं गायम्।
(इत्यादयः)

---
१. साहित्यदर्पणः ९.२।
२. अनुप्रासः शब्दसाम्यं वैषम्येऽपि स्वरस्य यत्, सा. द. १०.३।

मन मो निरन्तरे थाउ
हा कृष्ण बोलि जीव पाउ।
अत्र ('न्द न्द') (रि, री) (रे, रे), (उ उ) इत्यादिनामनुप्रासो वर्तते।

उपसंहारः

यथा तुलसीदासस्य रामचरितमानसकाव्यं, तमिलभाषया विरचितं 'तिरूकुरल्ल' कम्बकृत्तिवासरामायणंस्वस्वप्रान्ते प्रसिद्धिमवापुस्तथैव जगन्नाथदासनाम्ना प्रसिद्धं प्रणीतं भागवतमुत्कले शिक्षिताशिक्षितेषु साक्षरनिरक्षरेषु धनिषु निर्धनेषु च लोकप्रियतां भजति। इदानीमपि प्रतिग्रामं (भागवतहुंगी) भागवतवाचनालयो वर्तते यत्र तस्य ग्रामस्य पुराणपण्डा प्रतिदिनं सायं भागवतस्य वाचनं कथां च कृत्वा लोकान् आध्यात्मिकमार्गे प्रवर्तयति। उत्कले प्रतिगृहं पूजामन्दिरे "भागवतगादि" भागवतमहापुराणस्य ताडपत्रपाण्डुलिपयः कार्पासवेष्टनेषु सुरक्षिताः सन्त्यः श्रीकृष्णस्य प्रतिनिधिरूपेण पूज्यन्ते सर्वेषां मुखे भागवतस्य पद्यानि नृत्यन्ति। कथोपकथनप्रसङ्गे भागवतस्य पद्यानि दृष्टान्तानि चोदाहरणरूपेण प्रदीयन्ते। मृत्युकाले स्वर्गतस्य आत्मनः शान्त्यर्थं सद्गत्यर्थं श्रीमद्भगवद्गीतया सह उत्कलीयभागवतस्य पाठः क्रियते। पुराणस्य सारल्यं समासरहितत्वमूल्यसन्धित्वं भावसम्पोषकत्वं साधारणीकरणीयत्वं लोकप्रियतायाः प्रमुखं कारणमस्ति। अतः निश्चप्रचं वक्तुं शक्यते यद् उत्कलीयं भागवतं व्यासप्रणीतभागवत-महापुराणस्य सम्पोषकं सरलव्याख्यात्मकमनवद्यं मुक्तिदं चतुर्वर्गफलप्रदं चास्ति।

●

---

२. चित्तं व्याप्नोति यः क्षिप्तं शुष्केन्धनमिवानलः।
स प्रसादः समस्तेषु रसेषु रचनासु च॥ सा. द. ८.७।

श्रीमद्भागवते पर्यावरणम्

डॉ.मखलेशकुमारः

❀❀❀

अस्माकं संस्कृतिः वेदमूला अस्ति। वेदवर्णितं विज्ञानं सर्वविधचिन्तनपूर्णञ्चास्ति। तथा च वेदविज्ञानस्योपरि आधारिता अस्माकं भारतीया संस्कृतिरपि सर्वाङ्गपूर्णा वर्तते। वेदस्य भाषा प्राञ्जला, दुरूहा, परोक्षा च भवति, अत एव महर्षिवेदव्यासः सर्वजनकल्याणाय सौलभ्याय च वेदवर्णितस्य विषयस्य प्रतिपादनं पुराणेषु सरलाख्यानोपाख्यानैः कृतवान्। इदानीं स्पष्टं यत् पुराणेषु वैदिकविषयस्य एव समुपबृंहणमिति।

प्रस्तुतेऽस्मिन् शोधपत्रे श्रीमद्भागवतस्थं पर्यावरणं विचार्यते। स्वकीयैः गुणगणैः शिरोरत्नभूतं श्रीमद्भागवतं पुराणवाङ्मये तिलकस्थानं भजते। महर्षिवेदव्यासः महाभारतसप्तदशपुराणब्रह्मसूत्ररचनान्ते एवं श्रीमद्भागवतं विरचितवान्। सः भगवतः लीलाचरितं समाधिपूर्वकं ध्यानरतो भूत्वा अपश्यत्। अत एवास्य पुराणस्य भाषा महर्षिव्यासदेवस्य समाधिभाषा कथ्यते।

नैमिषारण्यमिति तपोवनस्य वर्णनेन श्रीमद्भागवतं प्रारभ्यते। एतत् तपोवनं विष्णुक्षेत्रमपि कथ्यते। अस्यारण्यप्रदेशस्य सूक्ष्मतया विश्लेषणेन ज्ञायते यत्र तस्मिन् अरण्ये वर्तमानकालिकपर्यावरणसम्बद्धसमस्तानि वस्तूनि जल-वायु-भूमि-मानव-पशु-वनस्पति-वृक्ष-लतादीनि संरक्षितानि आसन्। भागवतधर्मानुयायिनः "सर्वं खल्विदं ब्रह्म" इति धिया सर्वं जगद् विष्णुमयं पश्यन्ति। पर्यावरणस्य कृते एषा दृष्टिः अनुकूला एव दृश्यते। यथा—भागवते

खं वायुमग्निं सलिलं महीं च
ज्योतींषि सत्त्वानि दिशो द्रुमाद्रीन्।।
सरित्समुद्राश्च हरेः शरीरं
यत् किञ्चभूतं प्रणमेदनन्यः।।

श्रीमद्भागवते प्राचीनकालिकपर्यावरणस्य कीदृशी अवधारणा विद्यते, इति जिज्ञासा जायमाने सति आवरणशब्द[illegible] श्रीमद्भागवतमहापुराणस्य कथनमेतद्विचार्यते।

---

१. श्रीमद्भागवते-१.२.४१।

अत्र भगवतः विराटस्थूलरूपं अष्टावरणैः परिवृत्तमिति विज्ञापितम्। यथा भागवते—

एतद्भगवतो रूपं स्थूलं ते व्याहृतं मया।
मह्यादिभिश्चावरणैरष्टभिर्बहिरावृतम्[१] ।।

अत्र श्रीमद्भागवतमहापुराणस्य प्रसङ्गानुसारं पृथिवी-जल-तेज-वायु-आकाश-अहङ्कार-महत्तत्त्व-प्रकृतय इति सन्ति अष्टावरणानि। अष्टावरणयुता प्रकृतिः पुराणमतेन नारायणस्यान्यतमं स्वरूपं भवति। भगवतः स्थूलरूपैर्वर्णितेष्वष्टावरणेषु आदितः पञ्चावरणानि वर्तमानपर्यावरणसम्बद्धानि भवन्ति।

भागवतमहापुराणस्यानुशीलनेन ज्ञायते यद् यदा सात्त्विकशक्तिप्रतिनिधिभूतस्य जनस्य प्राकट्यं भवति तदा इमानि आवरणानि प्रकृत्या एव संरक्षितानि भवन्ति, तथा च तामसीशक्तियुतस्य प्रादुर्भावे स्वयमेव मलिनतां प्राप्नुवन्ति। हिरण्याक्ष-हिरण्यकशिपू भोगवादी तामसीसंस्कृतेः प्रतिनिधी स्तः। एतयोः लोभप्रवृतिः न केवलं प्रदूषणकारिणी, अपितु प्राकृतिकोत्पातानां जननी च। वेनोऽपि अस्याः संस्कृतेः प्रतिनिधिः, यस्य जन्मना एव प्रकृतिः प्रकोपं प्रक्रमते। एतस्मिन् प्रसङ्गे सात्त्विकशक्तिप्रतिनिधिभूतानां वामन-पृथु-कृष्णादीनां प्राकट्ये न केवलमनुकूलता, अपि तु पर्यावरणेषु सन्तुलनं सहजमेव प्रदृश्यते।

साम्प्रतं द्रुतगत्या जायमानेन अरण्यप्रदेशस्य विनाशेन वन्यजीवजन्तूनां पशुपक्षीणां दुर्लभवनस्पतीनाञ्च सर्वनाशः दृश्यते, तथा च भूयो भूयः धरणीकम्पनस्य, जलपूरणस्य दुर्भिक्षस्य च समस्या प्रादुर्भवति। एतादृशानां प्रकृतिजन्योत्पातानां मूले जनसंख्यावृद्धिः प्रामुख्यं स्थानमादधति। यद्यपि सृष्टिवर्णनं सृष्टेः विस्तारश्च पुराणानां प्रथमलक्षणं भवति, तथापि सृष्टिनियन्त्रणमपि प्रदृश्यते पुराणवाङ्मये। देवर्षिनारदः ब्रह्मणः पुत्रः इति स प्राचीनकालस्य अत्यधिकः जागरूकः लोकप्रतिनिधिरूपेण प्रदृश्यते। सर्गवर्णनसन्दर्भे यदा प्रजापति दक्षः सहस्रपुत्रानुत्पाद्य अग्रेऽपि तद्वत् सृष्टिकार्यार्थं प्रेरयति तदा पितुराज्ञां स्वीकृत्य ते दक्षपुत्राः पृथिव्याः परिमाणं संसाधनानि चानवलोक्य सृष्टिकार्ये संलग्नाः भवन्ति। सृष्टिकार्ये संलग्नान् जागरूकः लोकप्रतिनिधिः देवर्षिनारदः दक्षस्य कोपभाजनौ भूत्वाऽपि सृष्टिकार्यात् दक्षपुत्रान् निवारयति। यथा भागवते—

तेपिरे तप एवोग्रं पित्रादेशेन यन्त्रिताः।
प्रजाविवृद्धये यत्तान् देवर्षिस्तान् ददर्श ह ।।
उवाच चाथ हर्यश्वाः कथं स्रक्ष्यथ वै प्रजाः।
अदृष्ट्वान्तं भुवो यूयं बालिशा वत पालकाः[२] ।।

---

१. श्रीमद्भागवते-०२.१०.३३; १. श्रीमद्भागवते—०६.०५.५,६।

अविवेकमाधारीकृत्य जायमाना निरुपयोगिनी सृष्टिः पर्यावरणस्य कृते नाशाय एव जायते। तथा चासमानवितरणस्य समस्या न चोत्पादयति। पुराणवाङ्मये प्रतिपादितं यन्मन्योः उत्पन्नेन रुद्रेण कृता सृष्टिः पर्यावरणस्य कृते प्रतिकूला इति। अत एव ब्रह्मणादिष्टः रुद्रः यदा सृष्टिं कर्तुं प्रवृत्तः तदा सः तमोमयीं सृष्टिं करोति। तस्मिन् समये रुद्रकृता भूतप्रेतादीनां तामसीं सृष्टिं विलोक्य ब्रह्मा रुद्रं सृष्टिकार्याद् वारयति। यथा भागवते—

रुद्राणां रुद्रसृष्टानां समन्ताद् ग्रसतां जयत्।
निशाम्यासंख्यशो यूथान् प्रजापतिरशङ्कत॥
अलं प्रजाभिः सृष्टाभिरीदृशीभिः सुरोत्तम।
मया सह दहन्तीभिर्दिशश्चक्षुर्भिरुल्वणैः[१]॥

जनसंख्यानियन्त्रणस्यान्यदुदाहरणमस्ति यदुकुलस्योपसंहारमपि। तस्य कुलस्य बहु विस्तारो जातः। गर्विताः यदुवंशजाः निरापदं तपोवनस्थं पर्यावरणं प्रदूषिताः, मुनीन् अवमानितं मुसलं चूर्णयित्वा सागरे प्रक्षिप्तं येन सागरस्थं पर्यावरणं दोषयुक्तं सञ्जातम्। पुनः प्रदूषणवशात् सागरोत्पन्नेन ऐरकेण ते सर्वे कालकवलिताः[२]। प्रसङ्गस्यास्य परिशीलनेन ज्ञायते यत् परिवारस्य अधिकः विस्तारोऽपि विभिन्नानां समस्यानां जनक इति।

"भुवो भारजिहीर्षया" इति भागवतवचनानुसारं ज्ञायते' यत् पृथिव्याः भरं हर्तुमेव भगवतः अवतारोऽभवत्। अत एव जरासन्धेन सह भगवता स्वयमेव कृतयुद्धस्य पाण्डवान् निमित्तीकृतमहाभारतयुद्धस्योद्देश्यमपि जनसंख्या नियन्त्रणमेव इति प्रतीयते। वस्तुतः जरासन्ध-कंस-कालयवन-दुर्योधनादयः प्रायः सर्वे आततायिनः आसन्। एते सर्वे स्वमहत्त्वाकाङ्क्षासिद्धये सततं धन-बल-सामर्थ्याभिवृद्धये संलग्नाः भवन्ति स्म। अत एव आततायिनः भूत्वा एते स्वानुचरद्भिः तपोवनानि विनष्टानि शस्त्रास्त्राणां प्रयोगेण पृथिवी-जल-तेज-वायु-आकाशेति पञ्चावरणान्यपि दूषितानि।

महाभारतादियुद्धमाध्यमेन कृतजनसंख्यानियन्त्रणस्य नायमभिप्रायः यद् युद्धेनैव जनसंख्यानियन्त्रणं सम्भाव्यते। भागवते वर्णितध्रुवोपाख्यानस्य आलोचनेन ज्ञायते यत् सत्पुरुषैः विवेकरहितं जनसंहारकार्यं सर्वदा निषेधितमिति। तत्र स्वभ्रातुः उत्तमस्य प्रतिशोधं गृहीतुं ध्रुवः यदा युद्धे संलग्नः तदा तस्य पितामहः स्वायम्भुवः मनुः तत्रागत्य तं वारयति तथा च भगवद्भक्तानां पूर्वजानां प्राणिकल्याणमयीं स्वकुलस्य परम्परामपि स्मारयति[३]।

---

१. श्रीमद्भागवते-०३.१२.१६.१७; २. भागवते. ११-३०-१४,२५।
३. भागवते. ०४-११-७ तः ९।

पृथिवीस्थ पर्यावरणस्य संरक्षणेन मानवसभ्यतायाः संरक्षणं भवति। एतदर्थमेव अनुमीयते यत् प्राचीनकाले राष्ट्रयोर्मध्ये तपोवनानां स्थितिः भवति स्म। तपोवनेषु ऋषीणां सार्वभौमिकसत्ता भवति स्म। अत एव पर्यावरणविनाशस्य भयं तत्र नासीत्। क्षुधातृषातुरः परिश्रान्तः परीक्षिद् महर्षेः शमीकस्य आश्रमे आतिथ्यमनवाप्य ऋषेः उरसि मृतसर्पं निधाय यदा निर्गच्छति तदा महर्षिपुत्रः शृङ्गी राज्ञः कृतापराधं विलोक्य राजानं शपति। केनापि प्रतिरोधेन विना परीक्षिता शापस्वीकरणं तपोवनानां स्वातन्त्र्यमेव दर्शयति[१]।

शर्यात्युपाख्यानमपि तपोवनानां सार्वभौमिकीं सत्तां सूचयति। तत्र राजा शर्यातिः स्वपुत्र्या सह एकबारं वनप्रदेशमगात्। तदा शर्यातिपुत्री सुकन्या वल्मीकान्तर्गता ज्योतिषी कण्टकेन भेदयति। सुकन्याकृत्कर्मणा महर्षिच्यवनः पीडितः भवति तथा च समाधिस्थेन तेन ऋषिणा शर्यातिसैनिकाः शप्ताः भवन्ति। शापस्य प्रभावात् समेषां मलमूत्रावरोधं अभवन्। तदा भयभीतः राजा शर्यातिः स्वसैनिकान् पृच्छति यत् केनापि अस्याश्रमस्य मर्यादायाः उल्लङ्घनं तु न कृतम्, तत्रैव सुकन्यया स्वापराधस्य स्वीकरणं मुनेरिच्छया तया सह विवाहकरणं च तपोवनस्थव्यवस्थायाः स्वातन्त्र्यमेव दर्शयति। यथा भागवते—

शकृन्मूत्रनिरोधोऽभूत् सैनिकानां च तत्क्षणात्।
राजर्षिस्तमुपालक्ष्य पुरुषान् विस्मितोऽब्रवीत्॥
अप्यभद्रं न युष्माभिर्भार्गवस्य विचेष्टितम्।
व्यक्तं केनापि नस्तस्य कृतमाश्रमदूषणम्[२]॥

पुराणवाङ्मये वर्णितं यत् प्राचीनकाले एतादृशान्यरण्यानि भवन्ति स्म, यस्मिन् साधारणजनानां प्रवेशः प्रायः न भवन्ति स्म। तादृशेषु वनप्रदेशेषु व्याधवृत्तिजीविनः यायावरीयः च गच्छन्ति स्म। श्रीमद्भागवते एव देवर्षिनारदस्य पूर्वजन्मवृत्तान्तवर्णनप्रसङ्गे वर्णितं यत् सर्पदंशात् मातुः मरणादनन्तरं सः बालकः यदृच्छया यस्मिन् वने गच्छति तत्तु निर्मनुजारण्यमेव व्यालोलूकशिवादीनामजिरं निर्बाधगत्या विचरणस्थानमासीत्[३]।

निर्मनुजारण्यसदृशानि वनानि नरसञ्चारनिषेधात् एव प्रायः विविध-वृक्ष-वन्यप्राणिभिः समृद्धयुक्तानि भवन्ति। एवं प्रकारेण प्रतिपादितोदाहरणैः स्पष्टं प्रतिभाति यत् तपोवनेषु पूर्णस्वातन्त्र्यं सर्वथा निषिद्धं आसीत्। अत एव तत्रस्थं पर्यावरणं प्रायः सुरक्षितं भवति स्म।

---

१. भागवते—०१-१९-३,४; २. भागवते—०९-०३-५,६।
३. भागवते—०१-०६-१४ तः १६

प्राचीनकालादेव वृक्षेष्वपि जीवनं वर्तत इति जानन्ति स्म अस्मन्महर्षयः। सर्गवर्णनप्रसङ्गे देवमनुष्याणां पशुपक्षीणां वृक्षलतादीनामपि च भेदप्रभेदवर्णनपुरस्सरं सृष्टिः वर्णिता विद्यते। वृक्षलतादीनां सृष्टिः तमोगुणयुक्ता भवति। इमे अन्तर्वेदिनः उर्ध्वस्रोतसः च परिलक्ष्यन्ते। भारतस्य महत्ता वैज्ञानिकेन जगदीशचन्द्रवसुना स्वप्रयोगेण वृक्षेष्वपि जीवनं भवतीति यत् प्रतिपादितं तस्य मूलेऽपि इयं पौराणिकी अवधारणा आसीत्।

भागवतमहापुराणे एतादृशानि आख्यानानि अपि उपलभ्यन्ते यस्मिन् वृक्ष-पशु-पक्षीसहितेदृशानां जीवानां प्रति संवेदनशीलतां अकारिता। प्राचीनबर्हिपुत्राः प्राचेतसाः तपः कृत्वा जलाद् बहिः समागत्य वृक्षैः आच्छादितां धरां विलोक्य स्वतपोबलेन तान् वृक्षान् दग्धुमारभन्ते। तदा वनस्पत्यौषधीनां राजा चन्द्रः तत्रागत्य वृक्षाणां नाशेन तान् निवारयति, तथा वृक्षाणां मानवजीवनेन सह कीदृशोऽयं सनातनसम्बन्धः, सभ्यतायाः कृते कीदृशी तेषामुपयोगिता चापि ज्ञापयति। यथा भागवते—

अथ निर्याय सलिलात्प्रचेतस उदन्वतः।
वीक्ष्याकुप्यन्द्रुमैश्छन्नां गां रोद्धुमिवोच्छ्रितैः॥
ततोऽग्निमारुतौ राजन्नमुञ्चन्मुखतो रुषा।
महीं निर्वीरुधं कर्तुं संवर्तक इवात्यये॥
भस्मसात्क्रियमाणांस्तान्द्रुमान् वीक्ष्य पितामहः।
आगतः शमयामास पुत्रान् बर्हिष्मतो नयैः[1]॥

श्रीमद्भागवतमहापुराणस्यानुशीलनक्रमे कृष्णलीलासु अनेका घटनाः अस्मान् प्रकृतिं प्रति नयन्ति। यथा गोकुले जायमानानुत्पातान् विलोक्य वृन्दावनम्प्रति गोपगोपीनां गमनप्रसङ्गे संरक्षितपर्यावरणस्य दर्शनं भवति। तत्र कृष्णेन नित्यगोचारणं विभिन्नानां वन्यजीवानामनुकरणं बालमित्रैः सह वनभोजनमित्यादयः एतादृश्यः घटनाः याः बाल्यकालादेव प्रकृतिसंरक्षणं प्रदाय पर्यावरणसंरक्षणमहत्त्वस्य साक्षात्कारमपि कारयन्ति।

गोपानामपहरणानन्तरं स्वपराभवं विलोक्य शरणागतेन ब्रह्मणा "नौमीड्य तेऽभ्रवपुषे तडिदम्बराय" इत्यादिभिः श्लोकैः श्रीकृष्णस्य स्तुतौ यादृशं सौन्दर्यं प्रकल्पितं तत्तु सर्वथा प्राकृतिकमेव। अनेनैव प्रकारेण वेणुगीत-गोपीगीत-युग्मगीत-भ्रमरगीतादिप्रसङ्गेषु यमुना-मृगी-गवादीनां चिन्तनकल्पना, विरहपीडितानां गोपिकानां कृष्णस्य विषये वृक्ष-गुल्म-लताः प्रति संवादः, उद्धवस्य वृन्दावने वृक्ष-लतादिरूपेण जन्मग्रहणस्य कामना चेत्यादयः प्रसङ्गाः प्रकृतिम्प्रति प्रेमोत्पादकानि सन्ति। गां चारयन् सहाग्रजः श्रीकृष्णः वृन्दावनाद् दूरं गतः सन् निदाघार्कातपे आतपत्रायितान् द्रुमान् वीक्ष्य व्रजौकसः आह—

---

१. श्रीमद्भागवते—०४.३०.४४ तः ४६।

पश्यतैतान् महाभागान् परार्थैकान्तजीवितान् ।
वातवर्षातपहिमान् सहन्तो वारयन्ति नः ।।
अहो एषां वरं जन्म सर्वप्राण्युपजीवनम् ।
सुजनस्येव येषां वै विमुखा यान्ति नार्थिनः ।
पत्रपुष्पफलच्छायामूलवल्कलदारुभिः ।
गन्धनिर्यासभस्मास्थितोक्मैः कामान् वितन्वते[१] ।।

वृक्षाणां विषये गोपबालान् प्रति श्रीकृष्णस्य समुद्बोधनमेतद् पर्यावरणसंरक्षकमिति साक्षात्प्रतीयते। प्रसङ्गस्यास्य विश्लेषणेन ज्ञायते यद् वृक्षाः कथमस्मान् प्रति परोपकारिणः भवन्ति।

सप्तावरणेषु जलमपि महत्त्वपूर्णमावरणमिति। यमलार्जुनोद्धार-चीरहरणप्रसङ्गाभ्यां ज्ञायते यत् जलाकरेषु नग्नस्नानं निषेधितमिति। निषेधस्य प्रमुखं कारणमत्र जलदूषणस्य निवारणमिति प्रतिभाति। वृन्दावने यमुनायां कालियह्रदोऽपि जलदूषणस्य महान् आकरः आसीत्। कालियस्य विषेण तद् ह्रदं तावद् दूषितं यावद् न केवलं तद् जलमनुपयोगिमात्रं सञ्जातमपि तु तस्योपरि पक्षीणां भ्रमणं तदन्तिके पशूनामागममपि रुद्धम्। कालियनागेन दूषितं ह्रदं विलोक्य भगवान् श्रीकृष्णः सपरिवारं नागं समुद्रे प्रेष्य तद् ह्रदं सर्वजनोपयोगाय सुलभं चाकरोत्। यथा भागवते—

नात्र स्थेयं त्वया सर्प समुद्रं याहि मा चिरम् ।
स्वज्ञात्यपत्यदाराढ्यो गोनृभिर्भुज्यतां नदी[२] ।।

"जीवो जीवस्य जीवनमिति" व्यवस्था प्राकृतिकं सन्तुलनं न क्षोभयति परन्तु येन केनापि कारणेन यदा एषा व्यवस्था अप्राकृतिकी भवति तदा प्रकृतौ दोषमागच्छति। प्रकृतौ समेषां प्राणिनां जीव-जन्तूनाञ्च समुपयोगिता विद्यते। अत एव परीक्षितः मरणानन्तरं तस्य पुत्रेण जनमेजयेन रुषा अशेषसर्पजातिविनाशाय सङ्कल्पपूर्वकं यज्ञं समारब्धम्। जनमेजयकृतसर्पसत्रं विलोक्य भगवान् बृहस्पतिः तं अस्मात् कार्याद् वारयति तथा च पर्यावरणविनाशविषयेऽपि तस्य ध्यानाकर्षणं करोति। यथा भागवते—

सर्पचौराग्निविद्युद्भ्यः क्षुत्तृड्व्याध्यादिभिर्नृप ।
पञ्चत्वमृच्छते जन्तुर्भङ्क्त आरब्धकर्म तत् ।।
तस्मात् सत्रमिदं राजन् संस्थीयेताभिचारिकम् ।
सर्पा अनागसो दग्धा जनैर्दिष्टं हि भुज्यते ।।

---

१. श्रीमद्भागवते—१०.२२.३२ तः ३४;   १. श्रीमद्भागवते—१०.१६.६० ।

अनेन प्रकारेण तेज-वायु-आकाशादीनामपि आवरणानां दूषणं श्रीमद्भागवत दिशा ज्ञातुं सम्भाव्यते। यथा तृणावर्तोपाख्याने वायुदूषणस्य अश्वत्थामार्जुनाभ्यां कृतब्रह्मास्त्रस्य प्रयोगेण तेजदूषणस्य उभयप्रसङ्गे आकाशदूषणस्यापि दर्शनं जायते।

पर्यावरणं कथं विकृतिं याति कथं च प्रकृतिं गच्छति एतत्तु वेनपृथुचरित्रे युगपद् द्रष्टुं शक्यते। अतीव महत्त्वाङ्काक्षिणः वेनस्य शासने प्रकृतौ महद् असन्तुलनं च दृश्यते परन्तु वेनमपहाय महर्षयः यदा राजपदे वैन्यं विभूषयन्ति तदा प्रकृतौ पुनः सर्वविधं सन्तुलनं दृश्यते। महाराजपृथुः स्वादर्शं प्रदर्श्य प्राकृतिक-पर्यावरणविशेषज्ञानां साहाय्येन प्राकृतिकं सन्तुलनं पुनः स्थापितवान्। यथा भागवते—

ततो महीपतिः प्रीतः सर्वकामदुघां पृथुः।
दुहितृत्वे चकारेमां प्रेम्णा दुहितृवत्सलः॥
चूर्णयन् स्वधनुष्कोट्या गिरिकूटानि राजराट्।
भूमण्डलमिदं वैन्यः प्रायश्चक्रे समं विभुः[1]॥

अस्माकं भारतीया संस्कृतिः चर्षिभिः परिवर्तित्वाद् एषा ऋषि संस्कृतिः तपोवनतः प्रवर्तिता भवति स्म। तपोवनानि तु धर्मत्यागविवेकादिगुणयुक्तैः ऋषिवर्यैः नियन्त्रिताः भवन्ति स्म। येन तेषु तपोवनेषु आमनुष्यं सर्वे प्राणिनः सुरक्षिताः भवन्ति स्म। प्राणिनां संरक्षणात् पर्यावरणमपि सुरक्षितं भवति स्म।

उपर्युक्तविवेचनेन सुस्पष्टं यत् श्रीमद्भागवते पर्यावरणसम्बद्धाः बहवः प्रसङ्गा समुपलब्धाः भवन्ति। एतेषु प्रसङ्गेषु न केवलं पर्यावरणस्यावधारणा, अपि तु पर्यावरणसंरक्षणोपायाश्चापि निबद्धाः। अतः एतस्मिन् विषये विशेषानुसन्धानस्य चिन्तनस्यावश्यकता च प्रतीयत इति।

१. श्रीमद्भागवते ०४.१८.२८—२९।

श्रीमद्भागवते साधारणधर्मः

डॉ. विश्वनाथस्वाइँ

❁❁❁

प्रणम्य श्रीजगन्नाथं वेदव्यासं गुरुं तथा ।
वक्ष्ये साधारणं धर्मं भागवतविधानतः ।।

विहितकर्मजन्योऽभ्युदयनिःश्रेयस्सिद्धिकारणं धर्मः । अनेन मनुष्य इतरप्राणिभ्यः श्रेष्ठो विविच्यते । धर्मोऽयं प्रवृत्तनिवृत्तभेदेन द्विविधः । प्रवृत्तधर्मः षड्विधः । एतेषु साधारणधर्मो ह्यन्यतमः । वर्णजातिसम्प्रदायानिर्विशेषेण आचरणीयो धर्मः साधारणधर्म इति कथ्यते । धर्मस्थानेषु पुराणमन्यतमम् । तत्र श्रीमद्भागवतमतीव महत्त्वपूर्णम् । यद्यपि धर्मप्रतिपादनाय धर्मशास्त्रं प्रधानं तथापि तत्सहायकत्वेन प्रोक्तानां वेदातिरिक्तानां शास्त्रान्तराणां ग्रहणीयता वर्त्तते । एवं रूपेण श्रीमद्भागवतं धर्मोपदेशकम् । चातुर्वर्ण्यविभक्तस्य समाजस्य समन्वयसंस्थापनाय इदमेव महापुराणं परं वैशिष्ट्यपूर्णम् । भक्तिरसप्रवणेऽस्मिन् श्रीमद्भागवतमहापुराणे सनातनधर्ममिमं ज्ञातुं युधिष्ठिरेण श्रीनारदमहर्षिः पृष्टः । श्रीनारदमहर्षिप्रदत्तमुत्तरमत्र समीक्षणीयो विषयः ।

श्रीमद्भागवते सप्तमस्कन्ध एकादशेऽध्याये श्रीनारदमुनिना मनुष्यमात्र-साधारणधर्म उच्यते 'सत्यमिति' पञ्चभिः श्लोकैः[१] । अत्रायं धर्मस्त्रिंशल्लक्षणवान् भवति । एतानि त्रिंशद्विधधर्मस्वरूपाणि यथा—सत्यं, दया, तपः, शौचं, तितिक्षा, ईक्षा, शमः, दमः, अहिंसा, ब्रह्मचर्यं, त्यागः, स्वाध्यायः, आर्जवं, सन्तोषः, समदृक्सेवा, ग्राम्येहोपरमः, विपर्ययेहेक्षा, मौनम्, आत्मविमर्शनम्, भूतेभ्योऽन्नादिसंविभागः, भूतेषु आत्मदेवताबुद्धिः, परमेश्वरश्रीकृष्णनामगुणादीनां श्रवणं, कीर्त्तनं, स्मरणं, परमेश्वरसेवा, पूजनम्, अवनतिः, दास्यं, सख्यम्, आत्मनिवेदनञ्चेति । सदेव परमेश्वरो ब्रह्म, तस्मै हितं सत्यम् । सर्वेषु भूतेषु परमात्मनो दर्शनं हि सत्यं कथ्यते 'सत्यं च समदर्शनमिति भागवते (११/१९/३७) स्वयं श्रीकृष्णभगवदुक्तेः । मनूक्तदशलक्षणकेषु[२] अग्रेऽपि—याज्ञवल्क्योक्तलक्षणकेषु[३] च साधारणधर्मेषु एतदन्यतमम् । भूतहिताय यथार्थ-प्रियवचनं

---

१. श्रीमद्भागवते-७.११.८-१२ ।
२. मनुस्मृतौ-६.१२ ।
३. याज्ञवल्क्यस्मृतौ-१.१२२ ।

सत्यार्थबोधकं 'सत्यं भूतहितं प्रोक्तमिति' व्यासस्मरणात्[१]। देशकालादिविज्ञानात् स्वधर्मस्य अविरोधतः यद्वचनं सद्भिः प्रोच्यते तत् सत्यं हि कथ्यते[२]। सत्यमेव नित्यं धर्मरूपम्। अत एव श्रूयते बृहदारण्यके (१/४/१४)—'यो वै स धर्मः सत्यं वै तत् तस्मात् सत्यं वदन्तमाहुर्धर्मं वदतीति धर्मं वा वदन्तं सत्यं वदतीत्येतद्ध्येवैतदभयं भवति' इति। परमेश्वरो भगवान् हि सत्यस्वरूपः सत्यप्रियश्च। तद्यथा स्मर्यते श्रीमद्भागवते (१/१/१) आदौ—'सत्यं परं धीमहि' इति। देवादिकृतस्तुतिः (१०/२/२६) अपि—सत्यव्रतं सत्यपरं त्रिसत्यं............सत्यात्मकं त्वां शरणं प्रपन्नः ॥ इति।

दया सहानुभूतिरनुकम्पा। प्राणिमात्रविपत्प्रतिकारेच्छा दया इति कथ्यते[३]। बन्धुर्भवतु शत्रुर्वा आत्मवद्भावनया तस्य यथाकालं क्लेशं हर्तुं या इच्छा हृदि जायते सा दयेति[४] परिकीर्त्यते। 'दया भूतहितैषित्वमिति'[५] शास्त्रप्रमाणम्। धर्मिष्ठाः साधवो गुणहीनेष्वपि भूतेषु दयां कुर्वन्त्येतत्परिलक्ष्यते।

तपः कृच्छ्राद्याचरणम्। व्रतोपवासनियमैः शरीरशोषणं तप इति[६] कथ्यते। 'तपः स्वधर्मवर्त्तित्वम्' इति महाभारते[७] व्यासवचनाद् आश्रमविहितं कर्म हि 'तपः' इति बोध्यते। 'कामत्यागस्तपः स्मृतम्' इत्यपि श्रीमद्भागवते (११/१९/३७) उद्धवाय श्रीकृष्णस्योपदेशवचनम्।

शौचं पवित्रता स्वच्छता। मनुष्य इन्द्रियादिषु अतिप्रसक्तो भूत्वा अशुद्धो भवति। अभक्ष्यपरिहारः, अनिन्दितैः सह संसर्गः, जगत्कल्याणार्थेषु आचारेषु व्यवस्थानञ्च[८] शौचं भवति। अत एव 'शौचं सङ्करवर्जितम्'[९] इत्युपदिश्यते। एतच्च शौचं द्रव्यशौचं, मनःशौचं, वचःशौचं, कायशौचञ्चेति[१०] चतुर्विधम्। यद्यपि मृज्जलादिभिः शौचं जायते तथापि तन्न प्रकृष्टं शौचम्। अन्यायेन परधनहरणपरिहारेण यद्धनेहा तदेव परमं

---

१. स्मृतिचन्द्रिकायां संस्कारकाण्डे-पृ. १४।
२. बृहन्नारदीयपुराणे-१५/२५।
३. आपन्नरक्षणं दया। इति याज्ञवल्क्यमिताक्षराकारो विज्ञानेश्वरः-१/१२२।
४. अत्रिसंहितायाम्-४१, पाद्मे क्रियायोगसारे च।
५. स्मृतिचन्द्रिकायां संस्कारकाण्डे पृ. १४ व्यासवचनम्।
६. परिभाषाप्रकाशे पृ. ३४ देवलवचनं द्रष्टव्यम्।
७. तत्रैव।
८. अत्रिसंहितायाम्-३५।
९. परिभाषाप्रकाशे पृ० ३४ स्मृतिचन्द्रिकायां संस्कारकाण्डे पृ. १४ च व्यासवचनम्।
१०. गौतमधर्मसूत्रविवृत्तौ हरदत्तः।
११. मनुस्मृतौ-५/१०६।

शौचम्। यश्च अर्थे शुद्धः स शुद्ध एव[११]। 'कर्मस्वसङ्गमः शौचमिति च भागवते (११/१९/३८)। तितिक्षा क्षमा सहिष्णुता। परेणापकारे कृते तस्य प्रत्यपकारानाचरणं 'क्षमा' इति कथ्यते। 'क्षमा द्वन्द्वसहिष्णुत्वम्' इति ऋषयः प्राहुः[१]। क्षमादाता क्षमाग्रहीता चेत्युभौ जगत्यस्मिन् भाग्यवन्तौ। ईक्षा युक्तायुक्तविवेकः शुभाशुभपर्यालोचनमनेनैव अग्रेऽपि जायते। एतद्गुणयोगेन मनुष्यः इतरजीवेभ्यः श्रेष्ठो भवितुमर्हति।

शमो मनसः संयमः। मनुष्याणां बन्धमोक्षयोः कारणं भवति मनः। विषयासक्तं मनः संसारबन्धनाय, निर्विषयं मनश्च संसाराद् उद्धारप्राप्त्यर्थमेव। अत एव 'शमश्चित्तप्रशान्तता' इति[२] शमलक्षणं फलितम्। 'शमो यन्निष्ठता बुद्धेः' इति च भागवते (११/१९/३६) श्रीकृष्णवचनम्।

बाह्येन्द्रियनिरोधो दमः। अयमात्मगुणविशेषः अनुद्धतता बोध्यते। बाह्यमाध्यात्मिकं वा दुःखं परैरुत्पादितमपि यदि न कोपो न वा जिघांसा तर्हि स[३] दमो भवति। विशेषतो विकारहेतुविषयसन्निधानेऽप्यविक्रियत्वं मनसो दमः 'मनसो दमनं दमः' इति सनन्दनवचनात्[४]। बाह्यवृत्तीनां निरोधो दमः कथ्यत इत्यपि भगवद्गीतादि[५]शास्त्रं प्रमाणम्[६]। यमगुणेषु चैतदन्यतमम्।

मरणानुकूलो व्यापारो हिंसा। सा च[७] दशविधा—उद्वेगजननं, सन्तापजननं, रुजाकरणं, शोणितोत्पादनं, पैशुन्यकरणं, सुखापकरणम्, अतिक्रमः, संरोधः, हितप्रतिषेधः, वधश्चेति। एतासां सर्वासां सर्वतोभावेन विपर्ययः अहिंसा कथ्यते। निषिद्धहिंसावर्जनं न केवलमैहिकं फलमपि तु श्रीसर्वेश्वरात्यन्तिकलयलक्षणरूपं सर्वोत्तमं फलं[८] ददाति। यमगुणेषु चाहिंसा अन्यतमा।

ब्रह्मचर्यं ब्रह्मचारिव्रतं वीर्यधारणं व्रतविशेषश्च कथ्यते। व्रतविशेषरूपं ब्रह्मचर्यं नाम दिव्यमानुषीणां तथा चित्रकाष्ठपात्रस्थमृण्मयादीनामपि अप्रार्थनमसङ्कल्पनम्, अनभिप्रेक्षणम् असङ्कीर्त्तनम् अनभिगमनम् असन्दर्शनम् असङ्गमश्चासाम्। एतच्च

---

१. स्मृतिचन्द्रिकायां संस्कारकाण्डे पृ. १४ महाभारतीयं व्यासवचनम्।
२. तत्रैव।
३. अत्रिसंहितायाम्-३९।
४. मनुस्मृतेः मन्वर्थमुक्तावल्याम्-६/१२।
५. श्रीमद्भगवद्गीतायाम्-१०/४, विष्णुधर्मोत्तरपुराणे च।
६. याज्ञवल्क्यस्मृतौ-३/३१२।
७. कृत्यकल्पतरौ गार्हस्थ्यकाण्डे पृ. ३०४ देवलः।
८. मनुस्मृतौ-६/७५।
९. नित्याचारप्रदीपे द्वितीयखण्डे पृ. ४२४।

ब्रह्मचर्यं[1] चतुर्विधम्—कृष्णं, रक्तं, शुक्लं, विमलञ्चेति। परदारवर्जनपूर्वकं स्वदारसेवनं कृष्णम्। पर्ववर्जननियमो रक्तम्। ऋतुकालाभिगमनं शुक्लम्। ऊर्ध्वरेतस्त्वं विमलं ब्रह्मचर्यमिति। यमगुणेषु एतदन्यतमम्। स्वशाखान्तर्गतशास्त्राध्ययनं परमेश्वरनामजपश्च स्वाध्यायः। त्यागो दानम्। निःस्वेभ्यो धर्मभिक्षुकेभ्यः स्नातकेभ्यश्च विद्याविशेषतो यथाशक्ति दानं[1] कर्त्तव्यम्। यमगुणेषु चैतदन्यतमम्। 'त्यागः संन्यास उच्यते' इत्यपि भागवते (११/१९/३८) उपदिष्टम्। आर्जवं सरलता। यमान्तर्गतमेतत् धर्मशास्त्रकारैरुपदिष्टम्।

दैवलब्धेनालंबुद्धिः सन्तोषः। यथासम्भवभृत्यात्मप्राणधारणावश्यक-पञ्चमहायज्ञाद्यनुष्ठानमात्रोचितधनानधिका स्पृहा सन्तोषः कथ्यते। सुखं सन्तोषहेतुकम्[2]। असन्तोषस्तु दुःखस्य मूलं भवति।

सर्वाणि भूतानि समभावेन ये पश्यन्ति ते समदृशः। तेषां समदृशां महतां सेवा समदृक्सेवा कथ्यते।

प्रवृत्तकर्मभ्यो निवृत्तिः ग्राम्येहोपरमः।

कर्म कदाचिदपि निष्फलं न कर्त्तव्यम्। यदि वा कदाचित् तन्निष्फलं जातं तत्क[illegible]ं विपर्ययेहेक्षा कथ्यते।

[illegible]न वृथालापनिवृत्तिः। आत्मविमर्शनं देहादिव्यतिरिक्तात्मानुसन्धानम्। 'अयमात्मा ब्रह्म' इति विषये चिन्तनमात्मविशर्मनम्।

भूतेभ्योऽन्नादीनां यथायोग्यं विभाजनं मनुष्यमात्रस्य कर्त्तव्यं भवति 'संविभागश्च भूतेभ्यः कर्त्तव्योऽनुपरोधतः' इति स्मृतेः।

भूतेषु विशेषतो मनुष्येषु आत्मेति इष्टदेवतेति च बुद्धिः आत्मदेवताबुद्धिरिति कथ्यते।

साधुजनपरमाश्रयस्य सर्वेश्वरस्य नामगुणलीलादीनां श्रवणं, कीर्त्तनं, स्मरणं, तस्य पादसेवनं, षोडशोपचारपूजनं, तं प्रति साष्टाङ्गनमस्कारः, दास्यं सख्यम्, आत्मसमर्पणञ्चेति मनुष्यमात्रधर्मः। चातुर्वर्ण्यविभक्तस्य समाजस्य समन्वयसंस्थापनार्थं परमेश्वरभक्तिरेव परं साधनम्। एतत् तत्त्वं सूक्ष्मदृशा निरीक्ष्य महर्षिः वेदव्यासः श्रीब्रह्मसूत्रभाष्यरूपं भक्तिरसप्रवणं श्रीमद्भागवतमहापुराणं कुरुते। भक्तिरेव परमपुरुषार्थः। निवृत्तधर्मेऽप्यस्य तत्त्वस्य प्रतिफलनं जायते। भक्तिमाश्रित्य निकृष्टवर्गो हीनजातिरपि

---

१. मनुस्मृतौ-११/१-२, ४/३२।
२. तत्रैव-४/१२।

श्रीसर्वेश्वरसान्निध्यं प्राप्तुं क्षमते। परमैश्वर्यभाजो देवाश्चापि भक्तिबलेन परं ब्रह्म श्रीहरिं प्राप्तुं प्रभवन्ति। श्रीमद्भागवते प्रोक्तेऽस्मिन् श्लोकपञ्चके सत्याद्या एकविंशतिर्भक्त्युपकरणीभूताः, श्रवणाद्या नव तु साक्षाद्भक्तिरेव। भक्तिरेव परमो धर्मः। भक्त्या सत्यपवित्रतादयाशरणागतवत्सलताप्रभृतयो भगवदाश्रिताः[१] सत्त्वगुणा आसादयितुं शक्यन्ते। भक्तिबलेन मनुष्यः सर्वभूतेषु आत्मानमात्मनि च सर्वभूतानि समं पश्यन् संसारसागराद्विमुक्तो[२] भवति। प्रवृत्तनिवृत्तरूपधर्मस्य संसिद्धिः श्रीहरितोषणेन भवति 'स्वनुष्ठितस्य धर्मस्य संसिद्धिर्हरितोषणम्' इति श्रीमद्भागवतवचनं[३] प्रमाणम्। धर्मस्य सुमहद्वैशिष्ट्यं[४] श्रूयते—'धर्मो विश्वस्य जगतः प्रतिष्ठा, लोके धर्मिष्ठं प्रजा उपसर्पन्ति, धर्मेण पापमपनुदति, धर्मे सर्वं प्रतिष्ठितम्, तस्माद्धर्मं परमं वदन्ति' इति। श्रीमद्भागवते एतद्वैशिष्ट्यपूर्णो धर्मः समाचरणार्थं भगवता वेदव्यासेन यथाविधि प्रोक्तः। वस्तुतस्तु धर्मशास्त्रदृष्ट्या एतस्य श्रीमद्भगवतमहापुराणस्य महत्त्वं चापि तेनोररीकृतं[५] मङ्गलाचरणपद्ये—'धर्म प्रोज्झितकैतवोऽत्र परमः' इति।

---

१. श्रीमद्भागवते १/१६/२६-२८।
२. ईशावास्योपनिषदि-७ मनुस्मृतौ-१२/९।
३. श्रीमद्भागवते-१/२/१३।
४. तैत्तिरीयारण्यके-१०/६३।
५. श्रीमद्भागवते १/१/२।

श्रीमद्भागवते शिवतत्त्वम्

डॉ. ददन उपाध्यायः

❁❁❁

वन्दे साम्बं शिवं नित्यं दयासागरमीश्वरम् ।
भक्त्या यः सुलभः साक्षाद् आत्मरूपो विमोक्षदः ।।

स्वान्तःसुखाय भगवतः भूतभावनविश्वेश्वरस्य भवानीपतेः जगत उत्पत्ति-स्थितिलयहेतुभूतस्य शिवस्य माहात्म्यं तस्य स्वरूपस्य चिन्तनं शोधनिबन्धेऽस्मिन् क्रियते ।

भगवतः शङ्करस्य महिमा, तस्य विभूतीनां वर्णनं तु शेषशारदेऽपि नैव कर्तुं शक्येते । मनसः वाण्या अगोचरस्य शिवतत्त्वस्य वर्णनमशक्यम् । अत एवोक्तं श्रीपुष्पदन्ताचार्यैः शिवमहिम्नस्तोत्रे—

असितगिरिसमं स्यात् कज्जलं सिन्धुपात्रे
सुरतरुवरशाखा लेखनी पत्रमुर्वी ।
लिखति यदि गृहीत्वा शारदा सर्वकालं
तदपि तव गुणानामीश पारं न याति ।।

आत्मानं पवित्रयितुमेव शिवस्य माहात्म्यं यथामति गीयते ।

शिवशब्दार्थः–शेतेऽस्मिन् सर्वमिति शिवः । शीङ्शयने इति धातोः वन् प्रत्यये कृते, निपातनात् शेः ईकारस्य ह्रस्वे जाते शिवशब्दः निष्पद्यते । शेरते प्राणिनो यत्र स शिव इत्यनया व्युत्पत्त्या अनन्तपापतापैरुद्विग्नाः जीवाः विश्रामाय यत्र शेरते, स एव सर्वाधिष्ठानभूतः सर्वाश्रयः शिव इति । यद्यपि **'शान्तं शिवं चतुर्थमद्वैतं मन्यते'** इत्यादिश्रुतिभिः जाग्रत्स्वप्नसुषुप्त्यवस्थात्रयरहितः सर्वदृश्यविवर्जितः स्वप्रकाशः सच्चिदानन्दघनः परब्रह्म एव शिवतत्त्वम्, तथापि तदेव परमतत्त्वं स्वकीयदिव्यशक्त्या संयुज्यानन्तब्रह्माण्डानामुत्पादनं पालनं संहारं च कुर्वन् ब्रह्मा-विष्णु-शिव-शङ्कर-हर-रुद्र-महादेवादि-संज्ञां धारयति । शिव एव जगतः उपादानकारणं निमित्तकारणञ्चास्ति । जगतः निःश्रेयसस्सम्पादनाच्छङ्कर इति कथ्यते । स्वयम्भूतः,

सिद्धः, नित्योऽनादिश्च सः, तस्माच्छम्भु इति । अविकारी-निश्चल-सर्वविक्रिया-शून्यत्वात् स्थाणुरिति, समस्तजगतः लयस्थानत्वात् शर्वः, मृडः, रुद्रः कथ्यते । महान् चासावीश्वरः देवो वा, तस्मात् महेश्वरः, महेशः, महादेव इति । समस्तचराचरभूतस्य स्रष्टृ-पालयित्रधिष्ठातृत्वाद् भूतेशः, भूतपतिरित्यभिधीयते । समस्तपशूनां जीवानां पतिरस्ति, तस्मात्पशुपतिरिति विज्ञायते । समस्तशक्तीनां विक्षेपावरणयोः गतीनां क्रियाणां कलानाञ्चैकमात्रमधिष्ठातृत्वाद् भवानीपतिः, उमापतिः, मायाधीशः, मायी, अर्द्धनारीश्वरप्रभृतिनामभिः संस्तूयते । अनेन प्रकारेणानन्तनामभिः तस्यानन्तगुणानां प्रकटनं भवति ।

तत्त्वमेकं नामान्यनेकानि–शिवतत्त्वन्तु एकमेव—**एकमेवाद्वितीयं ब्रह्म** (छा०उ०६-३-१) । तदद्वयतत्त्वातिरिक्तं नास्ति किञ्चित्—**एकमेव सत्** । **नेह नानास्ति किञ्चन** (बृ० उ० ४-४-११) । किन्तु तस्याद्वयतत्त्वस्यानेकानि नामानि सन्ति—**एकं सद् विप्राः बहुधा वदन्ति** (ऋ० १-१६४-४६) ।

नामानीव तस्याद्वयतत्त्वस्य रूपाण्यप्यनेकानि । ऋग्वेदः पुरुरूपः (२-१२-९) इत्युक्त्वा तथ्यमिदं स्पष्टीकृतः । अन्या श्रुति उदाहरणस्य माध्यमेन प्रतिपादिता यद् यथा प्रत्येकस्मिन् कणे अनुस्यूताग्निः एक एव, किन्तु रूपेष्वनेकेष्वस्माकं समक्षमायाति, तथैव भगवान् शिवस्तु एकः सन्नप्यनेकेषु रूपेषु दृग्गोचरायते । लोककल्याणाय सद्योजात-वामदेव-तत्पुरुष-अघोर-ईशानप्रभृत्यनेकेष्ववतारेष्ववतरति । तत्र जिज्ञास्यते यदि शिव एक एव तदानेकनामसु रूपेषु च कथमभिज्ञायते । तत्र रुद्रहृदयोपनिषच्छ्रुतिः उत्तरयति—

प्रयोजनार्थं रुद्रेण मूर्तिरेका त्रिधा कृता ।

(रुद्रहृदय, उप० १५)

श्रीमद्भागवतमहापुराणमपि पुष्णाति तथ्यमिदम् । एकदा ब्रह्मणा सृष्टिकरणाया-ज्ञप्तोऽत्रिः शतं वर्षं यावत्तपः चचार । तस्यासीत् सङ्कल्पः यद् यः संसारस्याधीश्वरोऽस्ति तस्यैव शरणोऽहम् । स मह्यं स्वसदृशं पुत्रं ददातु । यथोक्तम्—

शरणं तं प्रपद्येऽहं य एव जगदीश्वरः ।
प्रजामात्मसमां मह्यं प्रयच्छत्विति चिन्तयन् ।।

(भा० पु० ४.१.२०)

परन्तु तत्तपसा सन्तुष्टान् त्रिदेवान् समुपस्थितान् समक्षमवलोक्य सोऽपृच्छत्—

एको मयेह भगवान् विबुधप्रधानै श्चित्तीकृतः प्रजननाय कथं नु यूयम् ।
अत्रागतास्तनुभृतां मनसोऽपि दूराद् ब्रूत प्रसीदत महानिह विस्मयो मे ।।

(भा० पु० ४.१.२८)

अत्रिमुनेः वचः श्रुत्वा विबुधर्षभास्त्रयो देवाः प्रहस्य श्लक्ष्णया गिरा तमृषिं प्रत्याहुः—हे ब्रह्मन् ! सत्यसङ्कल्पो भवान् यदक्षरं ब्रह्म ध्यायति, तद् वयं त्रय एक एव । नास्ति भेदोऽस्मासु ।

यथा कृतस्ते सङ्कल्पो भाव्यं तेनैव नान्यथा ।
सत्सङ्कल्पस्य ते ब्रह्मन् यद्वै ध्यायति[1] ते वयम् ।।

(भा० पु० ४.१.३०)

अतोऽस्मदंशाः ते लोकविश्रुतास्त्रयः आत्मजाः भवितारः, तव यशः ते विस्रप्स्यन्ति, तव भद्रमस्तु । ततः ब्रह्मणोंऽशेन चन्द्रोऽभूत्, विष्णोरंशेन योगविद् दत्तात्रेयः, शङ्करस्यांशेन दुर्वासाः च समजायताम् ।

सोमोऽभूद्ब्रह्मणोंऽशेन दत्तो विष्णोस्तु योगवित् ।
दुर्वासाः शङ्करस्यांशो निबोधाङ्गिरसः प्रजाः ।।

(भा० पु० ४.१.३३)

अनेकनामरूपस्य हेतुः–विचारणीयमस्ति यत्केन प्रयोजनेन तदद्वयतत्त्वं नैकानि नामानि रूपाणि च गृह्णाति । तस्य समाधानं ब्रह्मसूत्रे प्राप्यते । तत्रोच्यते लीलातिरिक्तमस्याः सृष्टेः विविधतायाः नास्ति कमप्यन्यं प्रयोजनम्—**लोकवत्त् लीलाकैवल्यम्** (ब्रह्मसूत्रे २-१-३३) । तदद्वयतत्त्वं सृष्टिरूपे दृग्गोचरीभवति, तस्य प्रयोजनमेकमात्रं लीला क्रीडेत्यर्थः । तत्र जिज्ञास्यते ईश्वरस्तु आप्तकामः । तस्य सर्वाः कामनाः पूर्णाः । पुनः सः क्रीडाया अपि कामना कथं करोति ? ईश्वरस्य आप्तकामता पुनः तस्मिन् कस्याश्चिदपि कामनायाः कथनं व्याहतम् । जिज्ञासेयं महात्मानं विदुरमपि विकलयति । सः मैत्रेयं पृच्छति श्रीमद्भागवते—

ब्रह्मन् कथं भगवतश्चिन्मात्रस्याविकारिणः ।
लीलया चापि युज्येरन्निर्गुणस्य गुणाः क्रियाः ।।
क्रीडायामुद्यमोऽर्भस्य कामश्चिक्रीडिषान्यतः ।
स्वतस्तृप्तस्य च कथं निवृत्तस्य सदान्यतः ।।

(भा० पु० ३.७.२–३)

शङ्कामिमां मैत्रेयः समाधत्ते—यः परमात्मा सर्वेषां स्वामी, सर्वथा मुक्तस्वरूपः, स एव दैन्यं बन्धनं च प्राप्येत्, एतत्तु युक्तिविरुद्धं प्रतीयते । किन्तु एतदेव भगवतः माया। यथा स्वप्नद्रष्टुः पुरुषस्य स्वशिरश्छेदनादिकः व्यापारोऽसन्नप्य-ज्ञानवशात् सत्यवद्भासते। तथैव जीवस्य बन्धनमसन्नपि अज्ञानवशात् प्रतीयते । भवतु नाम जीवे, परन्तु ईश्वरे कथमेतादृशी प्रतीतिः, तत्रोच्यते—यथा जले

---

1. ध्यायसि पाठान्तरमपि प्राप्यते ।

कम्पनादिक्रिया तत्र दृश्यमानस्य चन्द्रमसः प्रतिबिम्बेऽसन्नपि भासते। न तु आकाशस्थे चन्द्रमसि। तथैव देहाभिमानिनि जीवे एव देहस्य मिथ्याधर्माणां प्रतीतिः, न तु परमात्मनि। यथोक्तं श्रीमद्भागवते—

यथा जले चन्द्रमसः कम्पादिस्तत्कृतो गुणः।
दृश्यतेऽसन्नपि द्रष्टुरात्मनोऽनात्मनो गुणः॥

(भा०पु० ३.७.११)

मिथ्याधर्माणां प्रतीतिस्तु निष्कामभावेन धर्माणामाचरणे कृते भगवत्कृपया प्राप्तस्य भक्तियोगस्य माध्यमेन शनैः शनैः निवृत्ता भवति। यदा समस्तानीन्द्रियाणि विषयात्पराङ्मुखीभूय साक्षिणि परमात्मनि शिवे निश्चलभावेन स्थीयन्ते, तदा संसुप्तस्य पुरुषस्येव सर्वे रागादिक्लेशाः कृत्स्नशः विलीयन्ते। परमात्मनः शिवस्य गुणानुवादश्रवणमशेषक्लेशं शमं विधत्ते। पुनः यदि अस्माकं हृदये तच्चरणारविन्द-परागसेवारतिः जागृता चेत्, तत्र का वार्ता—

अशेषसङ्क्लेशशमं विधत्ते गुणानुवादश्रवणं शिवस्य[1]।
किं वा पुनस्तच्चरणारविन्द-परागसेवारतिरात्मलब्धा॥

(भा०पु० ३.७.१४)

शिव एव ब्रह्म—श्वेताश्वतरोपनिषदः प्रारम्भे ब्रह्मसम्बन्धिनी जिज्ञासा कृताऽस्ति। तत्र पृच्छ्यते—जगतः कारणं यद्ब्रह्म, तत्किमस्ति—**किं कारणं ब्रह्म** (१.१)। श्रुत्या अग्रेऽस्य ब्रह्मशब्दस्य स्थाने रुद्रः शिवश्च प्रयुज्येते।

यथा—**एको हि रुद्रः** (३.२) **स........शिवः** (३.११)

तत्र समाधाने प्रतिपादितमस्ति जगतः कारणं स्वभावादि न, अपि तु भगवान् शिव एवास्याभिन्नं निमित्तोपादानकारणमस्ति। यथोक्तं श्वेताश्वतरोपनिषदि—

एको हि रुद्रो न द्वितीयाय तस्थु-
र्य इमाँल्लोकानीशत ईशनीभिः।
प्रत्यङ्जनांस्तिष्ठति सञ्चुकोचान्तकाले
संसृज्य विश्वा भुवनानि गोपाः॥ (श्वेता०उ० ३.२)

अनेन प्रकारेण शिवो रुद्रश्च ब्रह्मणः पर्यायरूपेण तिष्ठतः। शिवो रुद्रः कथ्यते, यतो हि रुद्रः स्वोपासकानां समक्षं स्वकीयं रूपं शीघ्रमेव प्रकटयति। यथोक्तमथर्वशिरोपनिषदि—

---

1. मुरारेः इति पाठान्तरं कृतम्।

कस्मादुच्यते रुद्रः ? यस्मादृषिभिः......... द्रुतमस्य रूपमुपलभ्यते (अथर्वशिर० उप० ४)।

अनेनापि कारणेन शिवो रुद्रः कथ्यते, यतो हि अयं रुत्=दुःखं विनाशयति, रुत्=दुःखं द्रावयति नाशयतीति रुद्र इति व्युत्पत्त्या भगवतः शङ्करस्य दुःखनाशकः स्वभावोऽस्त्येव । यतो हि यदा देवासुरवरूथपैः सिन्धोर्मथ्यमानात् सुधा नाजायत, तदा भगवानजितः स्वयं निर्ममन्थ, तेन मथ्यमाने समुद्रात् सर्वप्रथमं महोल्बणं हालाहलं विषं समजायत, तस्मादरक्ष्यमाणाः परमभीताः प्रजाः प्रजापतयश्च सदाशिवं शरणं गताः । देववरं भगवन्तं शङ्करं सत्या सह कैलासे विराजमानं त्रिलोक्याः कल्याणायापवर्गहेतोस्तयोर्जुषाणं स्तुतिभिः प्रणेमुः प्रजापतयः ऊचुश्च— हे देवदेव ! महादेव ! भूतात्मन् ! भूतभावन ! शरणापन्नान् अस्मान् त्रैलोक्यदहनाद् विषात् पाहि । यतो हि त्वमेकः सर्वजगतः बन्धमोक्षयोः ईश्वरः प्रपन्नानामार्तिहरः जगद्गुरुरसि । यथोक्तं भागवते—

त्वमेकः सर्वजगत ईश्वरो बन्धमोक्षयोः ।
तं त्वामर्चन्ति कुशलाः प्रपन्नार्तिहरं गुरुम् ।। (भा०पु० ८.७.२२)

भवान् अनन्त एकरसः सन्नपि ब्रह्मविष्णुशिवाभिधां धत्ते ।

गुणमय्या स्वशक्त्यास्य सर्गस्थित्यप्ययान् विभो ।
धत्से सदा स्वदृग् भूमन् ब्रह्मविष्णुशिवाभिधाम् ।।

(भा०पु० ८.७.२३)

शिवशङ्करस्य सर्वव्यापकं विराजं स्वरूपं वर्णयन्तस्ते प्रोचुः—

अग्निर्मुखं तेऽखिलदेवतात्मा क्षितिं विदुर्लोकभवाङ्घ्रिपङ्कजम् ।
कालं गतिं तेऽखिलदेवतात्मनो दिशश्च कर्णौ रसनं जलेशम् ।।
नाभिर्नभस्ते श्वसनं नभस्वान् सूर्यश्च चक्षूंषि जलं स्म रेतः ।
परावरात्माश्रयणं तवात्मा सोमो मनो द्यौर्भगवञ्छिरस्ते ।।

(भा०पु० ८.७.२६–२७)

अस्य कारणकार्यरूपस्य जगतः परा माया, मायातोऽपि परतरं भवान् अस्ति। हे प्रभो ! भवतोऽनन्तस्वरूपं ज्ञातुं ब्रह्मादयोऽपि न समर्थाः । वयं स्वसामर्थ्यानुसारं भवतः किञ्चिद्गुणगानं कृतवन्तः । हे महेश्वर ! वयं तु लोकस्य क्रीडनाय धृतं तव व्यक्तं रूपमेव पश्यामः । यथोक्तं भागवते—

एतत् परं प्रपश्यामो न परं ते महेश्वर ।
मृणनाय हि लोकस्य व्यक्तिस्तेऽव्यक्तकर्मणः ।।

(भा०पु० ८.७.३५)

प्रजायाः एतादृशं सङ्कटं दृष्ट्वा समस्तप्राणिनामकारणबन्धोः देवाधिदेवस्य शङ्करस्य हृदयं विव्याथ, प्रियां सतीमुवाच—हे भवानि ! प्रजानामेतत्क्षीरोदमथनोद्भूतात् कालकूटादुपस्थितं वैशसं (दुःखं) पश्य । आसां प्राणपरीप्सूनामभयं मे विधेयम् । यतो हि एतावान् हि प्रभोः प्रयोजनम्, यद् दुःखार्त्तानां परिपालनं कुर्यात् । यथोक्तं भागवते—

आसां प्राणपरीप्सूनां विधेयमभयं हि मे ।
एतावान् हि प्रभोरर्थो यद् दीनपरिपालनम् ।।
(भा०पु० ८.७.३८)

एवं भवानीमामन्त्र्य विश्वभावनो महादेवः सर्वत्र व्यापि हालाहलं विषं करतलीकृत्य कृपया अभक्षयत्, तत्रापि जलकल्मषं विषं स्ववीर्यं दर्शयामास, तेन तस्य कण्ठः नीलोऽभवत्, परन्तु तस्य जगत्कल्याणकरस्य शङ्करस्य विभूषणमजायत । एवं भगवान् रुद्रः नीलकण्ठोऽभवत् । परोपकारिणः सज्जनाः प्रायः प्रजानां दुःखनाशाय दुःखं सहन्ते । परन्तु नास्ति दुःखमेतत्, अपि तु सर्वहृदयेषु विराजमानस्य भगवदाराधनमेव । यथोक्तं भागवते—

तप्यन्ते लोकतापेन[1] साधवः प्रायशो जनाः ।
परमाराधनं तद्धि पुरुषास्याखिलात्मनः ।। (भा०पु० ८.७.४४)

एतेन सृष्टिस्थितिप्रलयान् कर्तुं समर्थस्य रुद्रस्य दुःखनाशकत्वं सिद्ध्यति ।

स तु रोदनशीलोऽप्यस्ति । बालकस्वभाववत् स्वयं रोदितीति रुद्रः । एकस्मिन् कल्पे वेदगर्भो ब्रह्मा सृष्टिं चिकीर्षुः सर्वप्रथमं ज्ञानस्य पञ्च वृत्ती तमः (अविद्यां), मोहं (अस्मितां), महामोहं (रागम्), तामिस्रं (द्वेषम्) अन्धतामिस्रञ्च (अभिनिवेशञ्च) ससर्ज । परन्तु पापीयसीं सृष्टिं दृष्ट्वा नात्मानं बह्वमन्यत । ततो भगवद्ध्यानपूतेन मनसा अन्यां सृष्टिमसृजत् । तत्र सनकः, सनन्दनः, सनातनः, सनत्कुमारश्चाजायन्त । ते ऊर्ध्वरेतसः आसन् । स्वयम्भूः भगवान् ब्रह्मा तान् प्रजाः स्रष्टुमादिदेश, परन्तु मोक्षधर्माणः वासुदेवपरायणाः ते सनकादयः ब्रह्मणः वचनं नामन्यन्त । सुतैः प्रत्याख्यातानुशासनस्य ब्रह्मणः क्रोधोऽजायत । यद्यपि विधाता जातं दुर्विषहं क्रोधं नियन्तुमुपचक्रमे, तथापि बुद्ध्या निगृह्यमाणेऽपि क्रोधे प्रजापतेः भ्रुवोर्मध्यात् तन्मन्युः नीललोहितकुमाररूपेण सद्योऽजायत । स रुरोद, स तु देवानां पूर्वजः भगवान् भव एव । स बालक इवाकथयद्—हे धातः ! मम नामानि स्थानानि च निर्धारय । तस्य वचः श्रुत्वा पाद्मो भगवान् ब्रह्मा अभ्यधात्,

1. मूले लोभतापेन इति पाठः प्राप्यते ।

मा रोदीः, तव नामानि स्थानानि च करोमि । हे सुरश्रेष्ठ ! त्वं सोद्वेगः बालक इव यदरोदीः, तस्मात् प्रजाः त्वां रुद्र इति नाम्ना अभिधास्यन्ति । यथोक्तं भागवते—

यदरोदीः सुरश्रेष्ठ सोद्वेग इव बालकः ।
ततस्त्वामभिधास्यन्ति नाम्ना रुद्र इति प्रजाः ।। (भा०पु० ३.१२.१०)

ब्रह्मणा तस्य स्थानानि, नामानि स्त्रियश्च निश्चित्योक्तम्—एभिः बह्वीः प्रजाः सृज, यतो हि भवान् प्रजानां पतिरस्ति । इत्यादिष्टो भगवान् नीललोहितः सत्त्वाकृतिस्वभावेनात्मसमाः प्रजाः ससर्ज । रुद्रसृष्टानां रुद्राणां समन्ताद् जगद्ग्रस्ततां निशम्य प्रजापतिरुवाच—हे सुरोत्तम ! ईदृशीभिः सृष्टाभिः प्रजाभिरलम्, यतो ह्येते मया सह जगन्ति दिशश्चोल्बणैः चक्षुभिः दहन्ति । अतस्ते भद्रमस्तु, सर्वभूतसुखावहं तप आतिष्ठ । यतो हि भवान् तपसा पूर्वमपि इदं विश्वमसृजत् । यथोक्तं श्रीमद्भागवते—

तप आतिष्ठ भद्रं ते सर्वभूतसुखावहम् ।
तपसैव यथापूर्वं स्त्रष्टा विश्वमिदं भवान् ।। (भा०पु० ३.१२.१८)

एतेन रुद्रस्य जगत्स्रष्टृत्वमपि सिद्ध्यति । एवमात्मभुवाऽऽदिष्टः रुद्रः तपसे वनं जगाम—**विवेश तपसे वनम्** (भा०पु० ३.१२.२०) ।

अत्राशङ्कन्ते जनाः, यदि भगवान् रुद्र अविनाशी चेत्, प्रलयकाले वृक्षसमूहादीनामभावत्वात् तत्र तस्य स्थितिः कथं सम्भवेत् । तत्रोच्यते—**'जीवनं भुवनं वनम्'** इति कोशानुसारेणात्र वनस्य जलमित्यर्थः । तत्र वाराहपुराणस्य वचनं प्रमाणम्—

रुद्र प्रजाः सृजस्वेति ब्रह्मणा नोदितो मुहुः ।
असमर्थ इति प्रोच्य जले रुद्रोऽन्यमज्जत ।।

रुद्रस्यान्या व्युत्पत्तिः–दुष्टान् (नास्तिकान्) रोदयतीति रुद्र इत्यपि व्युत्पत्तिः कर्तुं शक्यते । भगवान् शिवो नास्तिकान् दुष्टजनान् निगृह्य सन्मार्गे स्थापयति । यदा दक्षप्रजापतिः नास्तिक इवाचरन् यज्ञे शिवं नापूजयत्, तदा तस्य निग्रहणं कृतवान् ।

यदा परमेष्ठिना ब्रह्मणा दक्षः सर्वेषां प्रजापतीनामाधिपत्येऽभिषिक्तः, तदा तस्मै स्मयोऽभवत् । क्रतूत्तमं बृहस्पतिसवं समारेभे । तस्मिन् यज्ञे ब्रह्मनिष्ठान् शङ्करप्रभृतीन् तिरस्कृतवान् । शङ्करेण निषिद्धाऽपि अनाहूता तत्र गत्वा सर्वलोकेश्वरी देवी सती तमध्वरमरुद्रभागमवेक्ष्य रुषा लोकान् भक्षयतीव चुकोप । तया सहागतान् दक्षवधोद्यतान् गणान् निरुद्ध्य सती अवोचद् दक्षम् ।

यद् द्व्यक्षरं नाम गिरेरितं नृणां सकृत्प्रसङ्गादघमाशु हन्ति तत् ।
पवित्रकीर्तिं तमलङ्घ्यशासनं भवानहो द्वेष्टि शिवं शिवेतरः ।।
(भा०पु० ४.४.१४)

हे दक्ष ! त्वदन्ये केऽपि शिवाख्यमशिवं न जानन्ति । यतो हि यः भगवान् शिवः श्मशानभूमिवासी, नरमुण्डमालाधारी, चिताभस्माङ्गः, भूतपिशाच-सहचरोऽस्ति, तस्य चरणावशिष्टं निर्माल्यं ब्रह्मादयः देवाः मूर्धभिः धारयन्ति । ब्रह्मणि शिवे प्रवृत्तिनिवृत्युभयकर्मणि कस्यापि नावश्यकता । यतो हि—

कर्म प्रवृत्तं च निवृत्तमप्यृतं वेदे विविच्योभयलिङ्गमाश्रितम् ।
विरोधि तद्यौगपदैककर्तरि द्वयं तथा ब्रह्मणि कर्म नर्च्छति ।।
(भा०पु० ४.४.२०)

एवं दक्षमुक्त्वा महादेवस्य प्रिया दक्षाङ्गजं कुणपं देहं जहौ । तदनन्तरं रुद्रगणैः सर्वे देवगणाः पराजिताः । वीरभद्रः यजमानपशोः दक्षस्य कायाच्छिरं हृत्वा तस्मिन् यज्ञाग्नौ जुहाव कैलासं जगाम च ।

ततः भयभीताः देवाः ऋत्विजैः सहिताः ब्रह्माणमुपजग्मुः, तस्मै प्रणम्य सर्वं वृत्तान्तं कात्स्न्येन न्यवेदयन् । तस्मिन् यज्ञे अब्जसम्भवः ब्रह्मा नारायणश्च न जग्मतुः । यतो हि तौ भाविसमुत्पातं जानतः । ब्रह्मा देवान् उवाच—यूयं शिवाय भागमदत्वा अन्यायं कृतवन्तः, तस्मिन् कुपिते तु ब्रह्माण्डस्य नाशं भविष्यति, यज्ञस्य का कथा । अतः तत्रैव गत्वा यूयं तं प्रसादयत । देवैः सह ब्रह्मा कैलाशं गत्वा मनूनामाद्यं मनुं शिवं प्राञ्जलयः प्रणेमुः । यथोक्तं भागवते—

तं ब्रह्मनिर्वाणसमाधिमाश्रितं व्युपाश्रितं गिरिशं[1] योगकक्षाम् ।
सलोकपाला मुनयो मनुनामाद्यं मनुं प्राञ्जलयः प्रणेमुः ।।
(भा०पु० ४.६.३९)

मनूनामाद्यः मनुरिति कथनेन रुद्रस्य स्त्राष्ट्रित्वं सिद्ध्यति । ततः शिवेन दत्ते आसने उपविश्य ब्रह्मा शिवमुवाच—भगवन् ! भवान् समस्तजगतः स्वामी । यतो हि विश्वस्य योनेः प्रकृतेः, तस्य बीजभूतात् पुरुषात् परे यः एकरसः परब्रह्म, स भवान् एव । यथोक्तं भागवते—

जाने त्वामीशं विश्वस्य जगतो योनिबीजयोः ।
शक्तेः शिवस्य च परं यत्तद्ब्रह्म निरन्तरम् ।। (भा०पु० ४.६.४२)

भवान् एव शिवशक्त्योः रूपे क्रीडन् ऊर्णनाभिर्यथा विश्वं सृजति, पालयति, अन्ते संहरति च । यथा भागवतेऽप्युक्तम्—

1. योगसमाधिकक्षाम् इति पाठान्तरम् ।

त्वमेव भगवन्नेतच्छिवशक्त्योः स्वरूपयोः ।
विश्वं सृजसि पास्यत्सि क्रीडन्नूर्णपटो यथा ।।(भा०पु०४.६.४३)

भवान् एव धर्मार्थदुघाभिपत्तये दक्षं निमित्तीकृत्य वेदानां रक्षार्थं यज्ञं सृष्टवान्। त्वयैव निर्मिताः धर्ममर्यादाः सन्ति, यासां पालनं धर्मनिष्ठाः जनाः कुर्वन्ति । शुभकर्मकर्तॄणां स्वर्गमोक्षप्रदाता भवान् एव । दक्षसदृशानां जनानामुपरि भवद्भिः दया करणीया । यज्ञस्य फलदाता भवान् एव । अतो भवतः यज्ञीयसर्वोत्कृष्टो भागोऽस्ति, तं गृहीत्वा यज्ञं पूर्णं करोतु ।

एष ते यज्ञभागोऽस्तु यदुच्छिष्टोऽध्वरस्य वै ।
यज्ञस्ते रुद्रभागेन कल्पतामद्य यज्ञहन् ।। (भा०पु० ४.६.५३)

अत्रोच्छिष्टः स्विष्टकृद्भागः 'यदग्नये स्विष्टकृते समवद्यति भागधेयेनैव तद् रुद्रं समर्धयति' इत्यादिश्रुतेः । उत्कृष्टः शिष्ट उच्छिष्टः, न तु भुक्तावशिष्ट इत्यर्थः । अत एव महाभारतेऽनुशासनपर्वणि सूक्तम्—

रुद्रस्य विक्रमं दृष्ट्वा भीता देवाः सहर्षिभिः ।
रुद्रस्य भागं यज्ञे च विशिष्टं ते त्वकल्पयन् ।।

उच्छिष्टस्य सर्वोत्कृष्टत्वादेव देवैः स महादेवस्य भागः कल्पितोऽन्यथा सर्वदेवगुरोस्तद्दानं न सङ्गच्छते । स्विष्टकृत्संज्ञाहुतिरेव उच्छिष्टपदवाच्या तां विना न यागपूर्तिरस्तीति, किन्तु यज्ञशालागतमनुपहतं यत्स्थितं तदपि रुद्रभाग एव ।

श्रुतिस्मृतिपुराणेषु सृष्टेरुत्पत्तिः भिन्नभिन्नप्रकारेण वर्णिताऽस्ति । महर्षिव्यास-रचितेष्वप्यष्टादशपुराणेषु सृष्ट्युत्पत्तिवर्णने विभिन्नता प्राप्यते । शैवपुराणेषु शिवेन, वैष्णवपुराणेषु विष्णुना, कृष्णेन, रामेण वा, शाक्तपुराणेषु देव्या सृष्टिरुत्पत्तिः प्रतिपादितेति प्रतिभाति। परं सर्वव्यापी, निराकारः, सगुणब्रह्म एव महेश्वरः, सृष्ट्युत्पत्तिकर्त्ता ब्रह्मा, पालनकर्त्ता विष्णुः, संहारकर्त्ता च रुद्रः, एते पञ्च शिवस्यैव रूपाणि । यथोक्तं शिवपुराणे ज्ञानखण्डे (४-५०-५१) विष्णुः भगवता महेश्वरेण—

अहं भवानयं चैव रुद्रोऽयं भविष्यति ।
एकं रूपं न भेदोऽस्ति भेदे च बन्धनं भवेत् ।।
तथापीह मदीयं वै शिवरूपं सनातनम् ।
मूलभूतं सदा प्रोक्तं सत्यं ज्ञानमनन्तकम् ।।

अष्टादशपुराणेषु श्रीमद्भागवतमहापुराणं पञ्चमस्थानीयम् । पुराणमेतद् वैष्णवमिति मन्यन्ते जनाः । परन्तु तत्रापि विभिन्नप्रसङ्गेषु शिवतत्त्वस्य माहात्म्यं प्रतिपादितं वर्तते, तद्दिग्दर्शनमपि मया कृतम् ।

येन ब्रह्मनिष्ठेन मानसिकपूजनपरायणेन प्रेमावेशाभिभूतेन मार्कण्डेयेनाद्भुतं मायावैभवमप्यनुभूतम् । तेनापि शिवः स्तुतः । तेनोक्तम्—भगवन् ! तव त्रिगुणातीतं सदाशिवस्वरूपं सत्त्वगुणयुक्तं शान्तस्वरूपं नमामि । तव रजोगुणयुक्तं सर्वप्रवर्तकस्वरूपं तमोगुणयुक्तमघोरस्वरूपमपि नमस्करोमि । यदुक्तं भागवते—

नमः शिवाय शान्ताय सत्त्वाय प्रमृडाय च ।
रजोजुषेऽप्यघोराय नमस्तुभ्यं तमोजुषे ।। (भा०पु० १२.१०.१७)

एतेन सत्त्वरजस्तमोगुणस्वभावस्य तस्य सृष्टिस्थितिसंहारकर्तृत्वं सिद्ध्यति ।

महामुनिना मार्कण्डेयेन स्तुतः भगवानादिदेवः सतां गतिः शिवः परितुष्टः प्रसन्नात्मा प्रहसंस्तमभाषत—वयं त्रयः ब्रह्मविष्णुमहेश्वराः वरदातॄणां स्वामी । अस्माभिरेव मरणधर्माणां जीवानाममृतत्वस्य प्राप्तिः । अस्मासु त्रिष्वण्वपि भेदं नास्ति । ये जनाः मय्यच्युतेऽजे आत्मसु अन्येष्वपि जनेषु अण्वपि भेदं न मन्यन्ते, तान् वयं सेवामहे । यथोक्तं श्रीमद्भागवते—

अहं च भगवान् ब्रह्मा स्वयं च हरिरीश्वरः ।
न ते मय्यच्युतेऽजे च भिदामण्वपि चक्षते ।
नात्मनश्च जनस्यापि तद् युष्मान् वयमीमहि ।।
(भा०पु० १२.१०.२१-२२)

अमृतमयं शिवस्य वचनं श्रुत्वा ध्वस्तक्लेशपुञ्जः मार्कण्डेयः सम्यगुवाच—

अहो ईश्वरलीलेयं दुर्विभाव्या शरीरिणाम् ।
यन्नमन्तीशितव्यानि स्तुवन्ति जगदीश्वराः ।। (भा०पु० १२.१०.२८)

एतेन शिवस्य लीलाकैवल्यत्वसिद्धिः । हे भगवन् ! स्वप्नद्रष्टा इव भवता मनसा विश्वमिदं सृष्टम्, तस्मिन् स्वयं प्रविश्य कर्त्ता असन्नपि कुर्वद्भिः गुणैः कर्त्तेव भवान् भाति । अतः भगवते त्रिगुणाय गुणात्मने केवलायाद्वितीयाय विश्वगुरवे ब्रह्ममूर्त्तये तुभ्यं नमः—

सृष्ट्वेदं मनसा विश्वमात्मनानुप्रविश्य यः ।
गुणैः कुर्वद्भिराभाति कर्त्तेव स्वप्नदृग् यथा ।।
तस्मै नमो भगवते त्रिगुणाय गुणात्मने ।
केवलायाद्वितीयाय गुरवे ब्रह्ममूर्त्तये ।। (भा०पु० १२.१०.३१-३२)

भवांस्तु पूर्ण एव, भक्तानामपि कामनां पूरयति स्वयं भवान् । त्वद्दर्शनादेव सत्यकामः पुमान् पूर्णकामो भवति । अथापि कामाभिवर्षणात् पूर्णाद् भवत एकं वरं वृणे । येन भगवत्यच्युतेऽजे ब्रह्मणि त्वयि शरणागतभक्तेषु च भेदबुद्धिः मा भवेत् । त्वयि अचला भक्तिः सर्वदा भवेत् । यथोक्तं भागवते—

यद्दर्शनात् पूर्णकामः सत्यकामः पुमान् भवेत् ।
वरमेकं वृणेऽथापि पूर्णात् कामाभिवर्षणात् ।
भगवत्यच्युतां भक्तिं तत्परेषु तथा त्वयि ।।

(भा०पु० १२.१०.३३-३४)

मायादर्शनेच्छोः मुनेः मार्कण्डेयस्य प्रार्थनया भगवता प्रलयस्य दृश्यमप्युपस्थापितम् । यदि तेनापि शिवतत्त्वं सम्यक् प्रतिपाद्य तस्मिन् भक्तिर्याचिता, तदास्माभिरपि कर्तुमकर्तुमन्यथाकर्तुं समर्थे सृष्टिस्थितिप्रलयकारिणि शिवेऽऽभेदबुद्धिपूर्वकं सदाऽविचला भक्तिः करणीयेति सञ्चिन्त्य शिवं प्रार्थ्य च विरमामि—

लोकत्रयस्थितिलयोदयकेलिकारः
कार्येण यो हरिहरद्रुहिणत्वमेति ।
देवः स विश्वजनवाङ्मनसातिवृत्त-
शक्तिः शिवं दिशतु शश्वदनश्वरं वः ।।

श्रीमद्भागवते क्रीडाप्रसङ्गाः

श्री-अशोककुमारपाण्डेयः

सर्वशास्त्रस्वरूपिणि श्रीमद्भागवते प्रायः न्यूनाधिकरूपेण बहवो विषयाश्चर्चिता अभूवन्। भागवतमहापुराणस्यानुशीलनेन इदं परिज्ञायते यदत्र चर्चितविषयेषु क्रीडाप्रसङ्गा अपि बाहुल्येन चर्चिताः विद्यन्ते।

मनस्तु सङ्कल्पविकल्पात्मकं भवति,[१] तस्मात् कस्मिन्नपि कार्ये सातत्येन तस्य संलग्नता न कथञ्चिदपि सम्भाव्यते। समुद्विग्नमनसः कृते मनोविनोदस्य आवश्यकता जायते। प्रायशो मनोविनोदाः क्रीडामूलका एव। सन्ति च ता क्रीडाश्चतुर्विधाः—

१. व्यायामादिभिः शरीरचेष्टामूला क्रीडा

२. कन्दुकादिभिः सम्पाद्यमाना उपकरणक्रीडा

३. सूक्तिश्रवणमधुरालापादिरूपा वाक्क्रीडा

४. बौद्धिकव्यायामरूपिणी द्यूतक्रीडा

एताश्चतुर्विधा एव क्रीडाः श्रीमद्भागवते यथास्थलं निरूपिताः प्रेक्ष्यन्ते, तस्मात्तात्कालिकसामाजिकैरभीप्सितानामेतासां परिचयो भवति।

मानवजीवनस्य अतीव महत्त्वं वर्तते। महत्त्वमापन्नस्य तस्य च स्वस्थशरीरेणैव सार्थकत्वं भवितुमर्हति। एतद्भौतिकशरीरमेव चतुर्वर्गसाधनीभूतं प्रतिपादितं शास्त्रचिन्तकैः। महाकविना कालिदासेनापि कुमारसम्भवे धर्ममुपलक्षणीकृत्येदमेव तथ्यं शरीरमाद्यं खलु धर्मसाधनमित्यादिनोपपादितम्। शरीरमाद्यं परमं सुदुर्लभमित्यादिना पुराणेष्वपि तदेवोपपादितं तथ्यम्। अत एव शरीरसंरक्षणार्थं स्वास्थ्यवर्धनार्थञ्चापि व्यायामादिभिः शरीरजाश्चेष्टाः सम्पाद्यन्ते। स्वस्थशरीरेणैव मानसिकं स्वास्थ्यमपि भवति। अत एवैतादृश्यः शारीरिकाश्चेष्टाः मानवानां कृते नितरामपेक्षिताः भवन्ति। याभिः शारीरिकस्वास्थ्येन सह मनोविनोदोऽपि स्यात्। मानवस्तु सामाजिकः प्राणी भवत्यत एव तदीयस्वास्थ्यं स्वस्थं समाजमपि परिकल्पयति। स्वस्थसमाजेनैव स्वस्थराष्ट्रस्यापि निर्माणं भवति। एतदर्थं परस्परं

---

१. उभयात्मकमत्र मनः सकल्पकमिन्द्रियञ्च साधर्म्यात्। सांख्यकारिका-२७।

सहयोगभावनायाः, प्रेमभावस्य, सौहार्दस्य, उत्साहस्य, कौशलस्य चापि आवश्यकता भवति । एतत्साधनार्थं क्रीडा सर्वोत्तमा मन्यते ।

बालकेषु तु क्रीडायाः प्रवृत्तिः बाल्यादेव संदृश्यते । सा प्रवृत्तिः शैशवपरिप्रेक्ष्य श्रीमद्भागवतेऽपि दृष्टुं सहजतया शक्यते । कृष्णस्तु क्रीडायां मित्रैः सह मग्नीभूय एतादृशममन्दमानन्दमनुभवति स्म, यदसौ भोजनादिकमपि न सस्मार । शोधपत्रेऽस्मिन् चतुर्विधां क्रीडामधिकृत्य किञ्चिद् विवेच्यते ।

१. व्यायामादिभिः शरीरजाश्चेष्टाः

एकदा यमुनातटमापन्नं बालकैः सह क्रीडन्तं श्रीकृष्णं रामञ्च रोहिणी बारं बारमाजुहाव, परं तौ क्रीडाव्यासङ्गप्रभावात् नोपेयाताम्[१] । तदा रोहिण्या प्रेषिता प्रेरिता च नन्दपत्नी यशोदा पुत्रवात्सल्यसिक्ता तां भोजनार्थमाहूतवती । परिश्रान्तौ बुभुक्षितौ च बालकौ दृष्ट्वा सा व्याकुलापि प्रेक्ष्यते । यशोदया मुहुर्मुहुराह्वाने कृतेऽपि तौ न झटिति समागच्छतः, येन क्रीडायां कीदृशं मानसिकमानन्दमनुभवन्ति बाला इत्यपि दृश्यते । तथा हि श्रीमद्भागवतेऽपि विषयेऽस्मिन्—

कृष्ण कृष्णारविन्दाक्ष ! तात ! एहि स्तनं पिब ।
अलं विहारैः क्षुत्क्षान्तः क्रीडाश्रान्तोऽपि पुत्रक ।।
प्रातरेव कृताहारस्तद् भवान् भोक्तुमर्हति[२] ।।

यदि सामाजिके जने बाल्यादेव सामूहिकी भावना जागर्ति प्रकृत्या सह सम्पर्कश्च भवति तदा प्रकृतेरुपकारत्वेनापि सः परिचितो भवति । अनेन च पर्यावरणस्यापि संरक्षणेऽसौ सन्नद्धो भवितुं शक्नोति । अस्यापि दर्शनं श्रीमद्भागवते सम्यक्तया कर्तुं शक्यते ।

प्रातरेव वत्सान् गृहित्वा कृष्णादिभिः सामूहिकरूपेण गोचारणार्थं वनं प्रति गम्यते । वस्तुतस्तु प्रकृतिरियमस्माकं मातेव हितसम्पादिका । येन प्रकारेण मातरमवलोक्य बालः अमन्दमानन्दमनुभवति तथैवास्यानुभूतिः प्रकृतेरीक्षणेनापि । यथा चोक्तं श्रीमद्भागवते—

वृन्दावनं गोवर्धनं यमुना पुलिनानि च ।
वीक्ष्यासीदुत्तमा प्रीती राममाधवयोर्नृप[३] ।।

मानवे शिक्षाग्रहणस्य कस्यापि वैचित्र्यस्यानुकरणस्य च स्वाभाविकीप्रवृतिर्भवति । मानवः पशुपक्ष्यादीनां व्यवहारं दृष्ट्वापि किञ्चिद् गृह्णात्येव । सङ्गीतनृत्यादिभिः मनस्याह्लादो

---

१. श्रीमद्भा० १०/११/१२ ।
२. श्रीमद्भा० १०/११/१५-१६ ।
३. श्रीमद्भा० १०/११/३६ ।

जायते । तत्प्रयुक्तैरङ्गसञ्चालनादिभिः शरीरे स्फूर्तिः गतिशीलता च भवतः । एतदर्थं स्वाभविक्यः प्राकृतिकाः क्रीडा अपेक्षन्ते । गोपदारकैः सह कृष्ण-क्रीडायामेतत् सर्वमवलोक्यते ।

तद्यथा श्रीमद्भागवते कृष्णादीनां क्रीडावर्णनानि निरूपितानि —

अविदूरे व्रजभुवः सह गोपालदारकैः ।
चारयामासतुर्वत्सान् नानाक्रीडापरिच्छदैः ।।
क्वचिद् वादयतो वेणुं क्षेपणैः क्षिपतः क्वचित् ।
क्वचित् पादैः किङ्किणीभिः क्वचित् कृत्रिमगोवृषैः ।।
वृषायमाणौ नर्दन्तो युयुधाते परस्परम् ।
अनुकृत्य रुतैर्जन्तूँश्चेरतुः प्राकृतौ यथा[१] ।।

एतस्मिन् वर्णने शारीरिकचेष्टानां क्रीडारूपेणोपयोगस्तथा वन्यपशूनां स्वाभाविक्यश्चेष्टा अपि बालकैः क्रीडारूपेणादत्ताः निरूपिताः सन्ति । एतदतिरिच्यापि बहव क्रीडाप्रसङ्गास्तथाविधाः प्रतिपादिताः ।

२. उपकरणक्रीडा

उपकरणक्रीडासु कन्दुकक्रीडायाः प्राधान्यं दृश्यते । कन्दुकक्रीडा प्रायेण स्त्रीजनानां मध्ये लोकप्रिया आसित् । श्रीमद्भागवते विविधाः प्रसङ्गाः स्त्रीणां कन्दुकक्रीणाप्रियत्वं द्योतयन्ति । तृतीये स्कन्धे यथा कर्दमप्रिया देवहूतिः कन्दुकेन क्रीडति स्म । मनुकन्यायाः देवहूतेः कन्दुकक्रीडा विलास एवमुपवर्णितस्तद्यथा—

यां हर्म्यपृष्ठे क्वणदङ्घ्रिशोभां
विक्रीडतीं कन्दुकविह्वलाक्षीम् ।
विश्वावसुर्न्यपतत् स्वाद्विमानात्
विलोक्य सम्मोहविमूढचेताः[२] ।।

एवमेव चतुर्थस्कन्धेऽपि यदा रुष्टा दक्षकन्या सती दक्षयज्ञं द्रष्टुं गच्छति, तदा तया सह मनोरञ्जनार्थं या सामग्री शिवेन प्रहिता, तस्या कन्दुकस्यापि स्थितिश्चर्चिता जाता । तद्यथा श्रीमद्भागवते —

तां सारिकाकन्दुकदर्पणाम्बुजश्वेतातपत्रव्यजनस्त्रगादिभिः ।
गीतायनैर्दुन्दुभिशङ्खवेणुभिर्वृषेन्द्रमारोप्य विटङ्किताः ययुः[३] ।।

ततः परञ्चाप्यष्टमस्कन्धे यदा शिवेन मोहिनीरूपं पुनर्दर्शयितुं प्रार्थितो विष्णुः,

---

१. श्रीमद्भा० १०/११/३८,३९,४० ।
२. श्रीमद्भा० ३/२२/१७ ।
३. श्रीमद्भा० ३/२२/१७ ।

तदा तेन मोहिनीरूपिणा नारायणेन कन्दुकक्रीडया एव शिवः मोहितः । अत्र पञ्चश्लोकेषु श्रीमद्भागवतकारस्तस्य कन्दुकक्रीडामुपवर्णयामास । तेष्वन्यतममेकमत्र प्रस्तौमि—

ततो ददर्शोपवने वरस्त्रियं विचित्रपुष्पारुणपल्लवद्रुमे ।
विक्रीडतीं कन्दुकलीलयालसद्दुकूलपर्यस्तनितम्बमेखलाम्[1] ।।

एवमेव पुराणान्तरे गोपदारकैः सह यामुने तटे कृष्णस्यापि कन्दुकक्रीडा निरूपितास्ति । क्वचित्तु कृष्णस्य कालियदमनेऽपि हेतुभूता कन्दुकक्रीडैवासीदित्यपि शास्त्रीयसङ्केतः ।

३. सूक्तिश्रवणवाक्क्रीडा

श्रीमद्भागवते श्रीकृष्णस्य बलरामं प्रति तथा रुक्मिणीं प्रति बहूनि वचनानि मनोविनोदरूपाणि प्राप्यन्ते, येषु वाक्क्रीडायाः स्पष्टरूपेण ध्वनिः प्रतीयते । रुक्मिणीकृष्णयोः दाम्पत्यानुरागमूलकवचनानि 'नर्म'शब्देन कथितानि । उक्तञ्च श्रीमद्भागवते श्रीकृष्णेन—

अयं हि परमो लाभो गृहेषु गृहमेधिनाम् ।
यन्नर्मैः नीयते यामः प्रियया भीरु भामिनि[2] ।।

एवमतिरिच्य ग्रन्थान्तरे चापि राधाकृष्णयोः नर्मविनोदप्रसङ्गाः वाक्क्रीडां प्रमाणयन्ति ।

४. द्यूतक्रीडा

एषा क्रीडा अभिजातजनानां मध्ये सर्वाधिकप्रसिद्धिमुपगतासीत् । प्रायेण सर्वे सामाजिका अस्यां रुचिं दधति स्म । प्राचीनकाले यदि कश्चिद् द्यूतार्थं युद्धार्थं वा कञ्चिदाह्वयति स्म, तदा आहूतो जनस्तं सहजतया स्वीचकार । भागवतस्य दशमस्कन्धे रुक्मिण्या सह बलरामस्य द्यूतक्रीडा प्रसङ्गायितास्ति । यद्यपि द्यूतक्रीडा विनाशकारिणी क्रीडासीत् । किमधिकं सकलमेव महाभारतीयं युद्धं द्यूतक्रीडायाः दुष्परिणामान् व्यनक्तीति मे विश्वासः । एवम्प्रकारेण सुप्रथिताश्चतुर्विधाः क्रीडाः श्रीमद्भागवतालोके समुपस्थापिताः । सानन्दं विश्रामकालयापनार्थं क्रीडाविनोदाः श्रेष्ठसाधनरूपेण समीहिताः । तेषु क्रीडा विनोदेषु केचन स्वरूपाणि अतीव प्रशस्यानि सन्ति । ते यथा—वनविहार-जलविहार-मल्लयुद्ध-मृगयाप्रभृति सन्ति । एते स्वास्थ्यसंवर्धनबलवर्धनादिलाभान् प्रददति । एवं हि काचित् क्रीडा कलाविकासाय, काचिद् कालक्षेपणाय, काचिद् नागरिकतायाः विकासाय, काचिद् बुद्धिवर्धनायापि भवति । श्रीमद्भागवतस्य विविधप्रसङ्गानाश्रित्य क्रीडायाः विविधप्रकाराणां विवेचनस्य प्रयत्नः कृतः स्वकीये ह्यस्मिन् शोधप्रपत्र इति शम् ।

---

१. श्रीमद्भा० ४.१२.१८ ।
२. श्रीमद्भा० १०.६०.३१ ।

श्रीमद्भागवतमहापुराणतत्त्वविमर्शः

ब्रह्मचारिणी गीता बनर्जी

❀❀❀

श्रीश्रीमातुः असीमानुकम्पया नैमिषे पौराणिकवैदिकाध्ययानुसन्धानसंस्थानं संस्थापितम्। अत्र विदुषां सभायां समागत्य आत्मानमहं धन्यां मन्ये। श्रीमद्भागवतमहापुराणतत्त्वविमर्श इति विषयमधिकृत्य किञ्चिद् वक्तुकामा अहं भवत्समक्षम्।

भगवत्पादेनादिशङ्कराचार्येण त्रयाणां दुर्लभत्वं प्रोक्तम्—

मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रय इति।

इदानीन्तने काले मानुषोऽप्यमानुषवत् समाचरति। तेषु मनुष्यतादया-प्रेम-करुणा-सहिष्णुताप्रभृतिमानवीयगुणानां सर्वथा अभावो दृश्यते। मुमुक्षुत्वं तु विरलतमं सञ्जातं मानवेषु। महापुरुषसंश्रयत्वं तु दूरमेव। नेदानीं यथार्थमहापुरुषाः दरीदृश्यन्ते, येन तेषां संश्रयं गच्छेयुः मानवाः। अतः मानवाः कुतः मनुष्यत्वं मुमुक्षुत्वं महापुरुषसंश्रयञ्च लभेरन्? एवं च त्रितापसन्तप्ताः इतो भ्रष्टास्ततो भ्रष्टा भूय इतस्तो भ्रमन्ति मानवाः।

ईदृग् घोरतमे सङ्कटपूर्णसमये श्रीमद्भागवतमहापुराणमेव यथार्थं जीवन-मरणस्य च महनीयतां प्रतिपादयति मानवान् प्रति। कलिकल्मषघ्नमार्तिहरं भवरोगनिदानं हरिकथामृतं पाययित्वा मानवेभ्योऽमृतत्वममरत्वं प्रयच्छति श्रीमद्भागवतम्।

अत एव महाभागवतेन सूतेन श्रीमद्भागवते कथितम्—

श्रीमद्भागवतं पुराणममलं यद्वैष्णवानां प्रियं
यस्मिन् पारमहंस्यमेकममलं ज्ञानं परं गीयते।
तत्र ज्ञानविरागभक्तिसहितं नैष्कर्म्यमाविष्कृतं
तच्छृण्वन्विपठन्विचारणपरो भक्त्याविमुच्येन्नरः[१]॥

अहो! कीदृशं दयार्द्रहृदयं श्रीमद्भागवतस्य। तत्रोच्यते—

---

१ श्रीभागवते १२.१३.१८।

पतितं स्खलितश्चार्तः क्षुत्त्वा वा विवशो ब्रुवन् ।
हरये नम इत्युच्चैर्मुच्यते सर्वपातकात्[1] ।।

अत एव मोक्षशास्त्रं कथ्यते श्रीमद्भागवतमहापुराणम् । परमभागवतेन उद्धवेन लीलापुरुषोत्तमो भगवान् श्रीकृष्णचन्द्रः प्रार्थितः—हे भगवन् ! हे भुवनमङ्गल ! भक्तानां कार्यं विधाय अन्तर्हितो भविष्यति भवान् । ततश्च भवतो मधुरमनोहरलीलायाः भवत्प्रतिपादितधर्मस्य च दर्शनं कुत्र भविष्यति ? तदा भगवान् निजगाद—हे उद्धव ! पूर्वमहं सदा स्वकार्यं विधाय वैकुण्ठमव्रजम् । परमिदानीमहं तिरोधाय भागवतार्णवे चिरं स्थास्यामि, अतः—

तिरोधाय प्रविष्टोऽयं श्रीमद्भागवतार्णवम् ।
तेनेयं वाङ्मयी मूर्तिः प्रत्यक्षं वर्तते हरेः ।।

अर्थाद् भगवान् तिरोभूय श्रीमद्भागवतार्णवे प्रविवेश । अतः श्रीमद्भागवत-महापुराणं भगवतः वाङ्मयी मूर्तिः । श्रीकृष्णावतारसमये भगवतः नयनानन्दकरी लीलां विलोक्य यादृक् ब्रह्मानन्दरससागरे निमज्जिताः भवन्ति स्म जनाः, तादृगेव श्रीमद्भागवतस्य हरिकथामृतश्रवणेनाद्यापि निरवद्यं सुखमनुभूय मधुरलीलामृतरसा-स्वादनतत्पराः जनाः परमानन्दसन्दोहे निमग्नाः भवन्ति ।

तत्रादौ श्रीमद्भागवते प्रथमस्कन्धे मानवानां धर्मः क इति जिज्ञासायां डिण्डिमघोषेण उत्तरं निगदितम् ।

स वै पुंसां धर्मो यतो भक्तिरधोक्षजे ।
अहैतुक्यप्रतिहता ययात्मा सम्प्रसीदति[2] ।।

उक्तं च टीकायां धर्मो द्विविधः । प्रवृत्तिलक्षणो निवृत्तिलक्षणश्च । तत्र यः स्वर्गाद्यर्थः प्रवृत्तिलक्षणः सोऽपरः । यतस्तु धर्मात् श्रवणादिलक्षणा भक्तिर्भवति स परो धर्मः स एवैकान्तिकं श्रेय इति । कथंभूता भक्तिः ? अहैतुकी—हेतु=फलानुसन्धानं तद्रहिता । अप्रतिहता = विघ्नैरनभिभूता भक्तिरिति । अर्थात् स एव परो धर्मो येन वासुदेवे परा भक्तिर्भवेत् । वासुदेवे पराभक्तिर्ज्ञानं वैराग्यं च जनयति । तदेवं हरिभक्तिद्वारा तदितरवैराग्यात्मज्ञानपर्यन्तः परो धर्म इत्युक्तम् । धर्मस्य किं प्रयोजनम् ? तदुच्यते—तन्मोक्षाय । न त्वर्थाय अन्ये तु मन्यन्ते धर्मस्य अर्थः फलम्, अर्थस्य कामः फलं, तस्य चेन्द्रियप्रीतिः, तत्प्रीतेश्च पुनरपि धर्मार्थादिपरम्परेति तन्निराकरोति । धर्मस्य फलमपवर्ग एव, न तु अर्थः । अर्थस्यापि प्रयोजनं धर्माचरणमेव, न तु कामः । कामस्य च नेन्द्रियप्रीतिर्फलं भवति, किन्तु यावता जीवेत तावानेव कामस्य लाभः । जीवनपर्याप्त एव कामः सेव्य इत्यर्थः ।

---

१. श्रीभागवते १२.१२.९; २. तत्रैव १.२.६ ।

तदुक्तं श्रीमद्भागवते—

धर्मस्य ह्यपवर्गस्य नार्थोऽर्थायोपकल्पते ।
नार्थस्य धर्मैकान्तस्य कामो लाभाय हि स्मृतः ।।
कामस्य नेन्द्रियप्रीतिर्लाभो जीवेत यावता ।
जीवस्य तत्त्वजिज्ञासा नार्थो यश्चेह कर्मभिः।।१.२.९-१० ।

जीवानां जीवनस्य किं प्रयोजनम्? तत्राह जीवानां जीवनस्य प्रयोजनं तत्त्वजिज्ञासैव। कर्मभिर्य इह प्रसिद्धः सोऽर्थो न भवति। तच्च भणितं श्रीमद्भागवत-महापुराणे—

वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम् ।
ब्रह्मेति परमात्मेति भगवानिति शब्द्यते ।।

अर्थात् तत्त्वविदस्तु तदेव तत्त्वं वदन्ति, यज्ज्ञानमद्वयं द्वैतरहितम्। तदेव औपनिषदैर्ब्रह्मेति, हैरण्यगर्भैः परमात्मेति, सात्वतैर्भगवानित्यभिधीयते। एतदेव श्रीमद्भागवतमहापुराणस्य तत्त्वं प्राणस्वरूपं प्रधानप्रतिपाद्यविषयश्च। तस्यैव विमर्शः नानायुक्तिभिः प्रस्तूयतेऽत्र विचारणपरैः विद्वद्वरैः।

तत्त्वविमर्शने प्रथमस्कन्धस्य मङ्गलाचरणस्य प्रथमः श्लोक एव प्रमाणम्—

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः ।
तेजो वारिमृदां यथा विनिमयो यत्र त्रिसर्गोऽमृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ।।१.१.१ ।

अर्थाद् भागवतस्य प्रतिपाद्यविषयः भगवानेव। तमेव स्वरूपतटस्थलक्षणा-भ्यामुपलक्षयति। तत्र स्वरूपलक्षणं सत्यमिति। सत्यत्वे हेतुः—यत्र यस्मिन् ब्रह्मणि त्रयाणां मायागुणानां तमोरजःसत्त्वानां सर्गो भूतेन्द्रियदेवतारूपोऽमृषा सत्यः। यत्सत्यतया मिथ्यासर्गोऽपि सत्यवत्प्रतीयते। तं परं सत्यमित्यर्थः। अत्र दृष्टान्तः—तेजोवारिमृदां यथा विनिमय इति। विनिमयो व्यत्ययोऽन्यस्मिन्नन्यावभासः। स यथाऽधिष्ठानसत्तया सद्वत्प्रतीयत इत्यर्थः, तत्र तेजसि वारिबुद्धिर्मरीचितोये प्रसिद्धा। मृदिकाचादौ वारिबुद्धिर्वारिणि च काचादिबुद्धिरित्यादि यथायथमूह्यम्। यद्वा तस्यैव परमार्थसत्यत्वप्रतिपादनाय तदितरस्य मिथ्यात्वमुक्तम्। यत्र मृषैवायं त्रिसर्गो न वस्तुतः सन्निति यत्रेत्यनेन प्रतीतमुपाधिसम्बन्धं वारयति। स्वेनैव धाम्ना महसा निरस्तं कुहकं कपटं मायालक्षणं यस्मिंस्तम्।

तटस्थलक्षणमाह—अस्य विश्वस्य जन्मस्थितिभङ्गा यतो भवन्ति तं धीमहीति बहुवचनं शिष्याभिप्रायम्। तत्र हेतुः—अर्थेषु आकाशादिकार्येषु परमेश्वरसद्रूपेणा-

न्वयादितरतश्च अकार्येभ्यश्च खपुष्पादिभ्यस्तद् व्यतिरेकात्। यद्वा अन्वयशब्देनानुवृत्तिः, इतरशब्देन व्यावृत्तिः, अनुवृत्तत्वात्सद्रूपं ब्रह्मकारणं मृत्सुवर्णादिवत्। व्यावृत्तत्वाद् विश्वं कार्यं घटकुण्डलादिवद् इत्यर्थः। यद्वा सावयवत्वादन्वयव्यतिरेकाभ्यां यदस्य जन्मादि तद्यतो भवतीति सम्बन्धः। तर्हि किं प्रधानं = प्रकृतिर्ध्येया ? न यश्चेतनः न तु जडः योऽभिज्ञः सर्वज्ञः तर्हि किं हिरण्यगर्भो ब्रह्मा ध्येयः ? न अपि तु स्वराट् स्वेनैव राजते यस्तं स्वतः सिद्धं ज्ञानमित्यर्थः परतन्त्रो न, अपि तु स्वयंप्रकाशः आदिकवये ब्रह्मणेऽपि ब्रह्म वेदं यस्तेने प्रकाशितवान्, ननु ब्रह्मणोऽन्यतो वेदाध्ययनमप्रसिद्धम्। सत्यम्, तत्तु हृदा मनसैव तेने विस्तृतवान्। यस्मिन् ब्रह्मणि वेदज्ञाने सूरयोऽपि मुह्यन्ति तस्माद् ब्रह्मणः पितामहस्यापि पराधीनज्ञानत्वात् स्वतः-सिद्धज्ञानः परमेश्वर एव जगत्कारणम्। एवंभूतं सत्यस्वरूपं परमात्मानं धीमहि।

द्वितीयश्लोकः—

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां
वेद्यं वास्तवमत्र वस्तुशिवदं तापत्रयोन्मूलनम्।
श्रीमद्भागवते महामुनिकृते किं वा परैरीश्वरः
सद्यो हृद्यवरुध्यतेऽत्र कृतिभिः शुश्रूषुभिस्तत्क्षणात्॥१.१.२।

अर्थात् महामुनिव्यासेन विरचिते श्रीमद्भागवते अत्र कपटरहितः फलकामनारहितः परमः धर्मो वर्णितः। परोत्कर्षासहनं मत्सरः तद्रहितानां निर्मत्सराणां शुद्धचित्तानां शिवदं वास्तवं वस्तु वेद्यं तापत्रयोन्मूलनं तादृशः परमात्मा निरूपितः। अतोऽन्यैः शास्त्रैः किं प्रयोजनम् ? यतः सुकृतिनां श्रवणस्येच्छयैव सद्यो भगवान् हृदि अवरुध्यते।

तृतीयः श्लोकः—

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम्।
पिबत भागवतं रसमालयं मुहुरहोरसिका भुवि भावुकाः॥

—१.१.३।

अर्थाद् भागवतरसरसिकाः भुवि भावुकाः जनाः! वेदकल्पतरोर्गलितं फलं शुकमुखाद् मधुरतरममृतद्रवसंयुतमिदं भागवतं नाम फलं मुहुः पिबत।

इत्थं श्लोकत्रयेऽत्र अनुबन्धचतुष्टयं वर्णितम्। प्रथमश्लोके भागवतस्य प्रतिपाद्यविषयः। द्वितीये सम्बन्धः प्रयोजनं च, तृतीये भागवतस्याधिकारी वर्णितः।

भगवत्प्राप्तेरुपायोऽत्र विशदेन वर्णितः। श्रीमद्भागवते दिव्यप्रेमपराभक्तिश्च। श्रीमद्भागवते गोपीप्रेम एव प्रेमपराकाष्ठायाः निदर्शनं दृश्यते। दामोदरलीलायां यशोदाया वात्सल्यस्य संस्तुतिर्भगवता शुकाचार्येण एवं विधीयते—

नेमं विरिञ्चो भवो न श्रीरप्यङ्गसंश्रया
प्रसादं लेभिरे गोपी यत्तत्प्राप विमुक्तिदात् ।। १०.९.२० ।

ब्रह्मा-शिव-लक्ष्मीरपि तादृशीं करुणां कृपां च न लेभिरे यादृशीं माता यशोदा अलभत् । अत एव ब्रह्मा स्वयमेव स्तौति—

तद्भूरिभाग्यमिह जन्म किमप्यटव्यां
यद् गोकुलेऽपि कतमाङ्घ्रिरजोऽभिषेकम् ।
यज्जीवितं तु निखिलं भगवान् मुकुन्द-
स्त्वद्यापि यत्पदरजः श्रुतिमृग्यमेव ।।१०.१४.३४ ।

गोप्यश्च मधुरमनोहरकान्तभावेनैव परमात्मनि भगवति लीनतां प्राप्ताः । गोपीगीते तासां दिव्यप्रेमरसाप्लुतं मधुरमुद्गायनं कस्य चित्तं न हरति ?

तव कथामृतं तप्तजीवनं कविभिरीडितं कल्मषापहम् ।
श्रवणमङ्गलं श्रीमदाततं भुवि गृणन्ति ते भूरिदा जनाः ।।
—१०.३१.९ ।

अन्ते च रासलीलायां भगवान् स्वयमेव स्वीकृतवान्—

न पारयेऽहं निरवद्य संयुजां
स्वसाधु कृत्यं विबुधायुषापि वः ।
या माभजन् दुर्जरगेहशृङ्खलाः
संवृश्च्य तद् वः प्रतियातु साधुना । १०.३२.२२ ।

अर्थात् हे गोपिकाः । यूयं मम प्रेमवशात् मत्कृते लोक-परलोक-स्वार्थ-स्वजन-स्वसर्वस्वमत्यजत, अतः प्रेमपाशबद्धोऽहं सदैव युष्मान्नृणी । अतः जन्मशत-कोटिभिरपि आत्मानमनृण्यं विधातुं न पारयिष्यामि ।

भगवान् स्वप्रियसुहृद् उद्धवं कथयति—

ता मन्मनस्का मत्प्राणा मदर्थे त्यक्तदैहिकाः ।
मामेव दयितं प्रेष्ठमात्मानं मनसा गताः
ये त्यक्तलोकधर्मांश्च मदर्थे तान् बिभर्म्यहम् ।
मयि ताः प्रेयसां प्रेष्ठे दूरस्थे गोकुलस्त्रियः ।
स्मरन्त्योऽङ्ग विमुह्यन्ति विरहौत्कण्ठ्यविह्वलाः ।।
धारयन्त्यतिकृच्छ्रेण प्रायः प्राणान् कथञ्चन ।। १०.४६.४-६ ।

गोपीभिः सह उद्धवस्य संवादानन्तरमुद्धवोऽपि कथयति—

आसामहो चरणरेणुजुषामहं स्यां
वृन्दावने किमपि गुल्मलतौषधीनाम् ।
या दुस्त्यजं स्वजनमार्यपथं च हित्वा
भेजुर्मुकुन्दपदवीं श्रुतिभिर्विमृग्याम् ।। १०.४७.६१ ।
वन्दे नन्दव्रजस्त्रीणां पादरेणुमभीक्ष्णशः ।
यासां हरिकथोद्गीतं पुनाति भुवनत्रयम् ।। १०.४०.६३ ।

धन्यां व्रजगोपिकाः यासां दिव्यप्रेमगाथां स्वयं भगवानपि प्रशंसति । श्रीमद्भागवते भक्तिश्च द्विविधा प्रोक्ता साधना भक्तिः साध्या भक्तिश्च । साधना भक्तिर्नवधा वर्णिता—

श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् ।
अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम् ।।७.५.२३

साध्या भक्तिरेव परा भक्तिः दिव्यप्रेम इत्यभिधीयते, भगवता कथितम्—

अहं भक्तपराधीनो ह्यस्वतन्त्र इव द्विज ।
साधुभिर्ग्रस्तहृदयो भक्तैर्भक्तजनप्रियः ।।९.४.६३ ।

एकादशस्कन्धे भक्तिभक्तयोर्महिमा दृश्यते—

न पारमेष्ठ्यं न महेन्द्रधिष्ण्यं
न सार्वभौमं न रसाधिपत्यम् ।
न योगसिद्धीरपुनर्भवं वा
मय्यार्पितात्मेच्छति मद् विनान्यत् ।। ११.१४.१४ ।

अन्यच्च—

निरपेक्षं मुनिं शान्तं निर्वैरं समदर्शनम् ।
अनुव्रजाम्यहं नित्यं पूयेयेत्यङ्घ्रिरेणुभिः ।।११.१४.१६।

अर्थाद् भक्तवत्सलो भगवान् वदति—अहं भक्तान् अनुव्रजामि येन तेषां पदरेणुभिरहं पवित्रं भवेयम् ।

यन्नामकीर्तनेन यन्नामश्रवणेन जगत् पवित्रं भवति स एव भगवान् परमपावनः भक्तपदरेणुभिरात्मानं पवित्रं मन्यते । अहो ! परमभागवतानां भक्तानां महिमा । महत्पादरजोऽभिषेकेनैव जीवानां कल्याणं भवितुमर्हति इत्येव दर्शितमत्र ।

तदेव पवित्रं यस्य स्मरणमात्रेण अपवित्रोऽपि पवित्रः स्यात्, पतितोऽपि

पावनः स्यात्, स्खलितोऽप्यग्रतो गच्छेत्, पराभूतोऽप्युन्नतः स्यात्। अत एव गीतम्—

किरात-हूणान्ध्र-पुलिन्द-पुल्कसा
आभीरकङ्का यवनाः खसादयः।
येऽन्ये च पापा यदुपाश्रयाश्रयाः
शुद्ध्यन्ति तस्मै प्रभविष्णवे नमः ।।२.४.१८।

इत्थम्भूतो गुणे हरिः, अतः भागवतस्य अन्ते महाभागवतेन सूतेन कीर्तितम्—

भवे भवे यथा भक्तिः पादयोस्तव जायते।
तथा कुरुष्व देवेश नाथस्त्वं नो यतः प्रभो ।।
नामसकीर्तनं यस्य सर्वपापप्रणाशनम्।
प्रणामो दुःखशमनस्तं नमामि हरिं परम् ।।१२.१३.२२-२३।

एवञ्च श्रीमद्भागवते आनन्दकन्दभगवतः श्रीकृष्णचन्द्रस्य लीलावर्णनं प्रधानतया दिव्यप्रेमपराभक्तिर्दृश्यते। अतः श्रीमद्भागवतं भक्तिशास्त्रं मोक्षशास्त्रं च गीयते भक्तिरसास्वादनतत्परैः। यतः सुनिर्मलज्ञानानन्तरमेव पराभक्तिर्भवति। ततश्च भगवता सह महामिलनं सम्भवति। एतदेव जीवस्य परमं लक्ष्यं परमपुरुषार्थश्च। ओम् शान्तिः।

कल्पवृक्ष से टपका हुआ मधुर फल

प्रो. ओम प्रकाश पाण्डेय

❁❁❁

भारतीय साहित्य के इतिहास में पुराण-आन्दोलन से बड़ा कोई साहित्यिक आन्दोलन नहीं हुआ। नीमसार (नैमिषारण्य) से प्रारम्भ हुए इस वैचारिक अश्वमेध ने सम्पूर्ण देश को सांस्कृतिक-सामाजिक एकता के महासूत्र में सुदृढ़ता से निबद्ध कर दिया। वेदों के दुर्बोध हो जाने और उनके वास्तविक अभिप्राय को समझने में जनसामान्य की असमर्थता को परिलक्षित कर देश की तत्कालीन आर्ष मनीषा ने पुराणों के रूप में वेदों और उपनिषदों के ही तत्त्वज्ञान को इतने सरस और सुबोध रूप में प्रस्तुत किया कि वह सर्वग्राह्य और सर्वगम्य हो गया। पद्मपुराणान्तर्गत भागवत-माहात्म्य में इस तथ्य का प्रकटीकरण सुस्पष्ट है—

श्रीमद्भागवतालापात् तत्कथं बोधमेष्यति ।
तत्कथासु तु वेदार्थः श्लोके श्लोके पदे पदे ।।
वेदोपनिषदा साराज्जाता भागवती कथा ।
यथा दुग्धे स्थितं सर्पिर्न ज्ञानायोपकल्पते ।
पृथग्भूतं हि तद् गव्यं देवानां रसवर्धनम्[1] ।।

अभिप्राय यह कि भागवत की कथाओं में वेदों का ही तात्पर्य सन्निहित है, उसी का सार समाहित है। जैसे घी जब तक दूध में मिला रहता है, तब तक उसका स्वाद नहीं मिलता, लेकिन वही घी जब अलग निकाल लिया जाता है, तो वह लौकिक प्रयोजन के अतिरिक्त देवों को भी रसास्वादन करा देती है। यही स्थिति भागवत की भी है, जिसे वेदरूपी कल्पवृक्ष का अपने-आप टपका हुआ अत्यन्त मधुर फल कहा गया है, जिसकी रसालुता से रसिक और भावुक जन आप्यायित हो जाते हैं—

निगमकल्पतरोर्गलितं फलं शुकमुखादमृतद्रवसंयुतम् ।
पिबत भागवतं रसमालयं मुहुरहो रसिका भुवि भावुकाः[2] ।।

और इस अमृत का पान करने के लिए सभी रसलोभी अपने आप दौड़ पड़े—

श्रीभागवतपीयूषपानाय रसलम्पटाः । धावन्तोऽप्याययुः सर्वे[3] ।

---

१. पद्मपुराणोक्तभागवत-माहात्म्य २.६५,६७,६९   २. श्रीमद्भागवत १.३ ।
३. भागवत-माहात्म्य ३.१२ ।

कुछ स्वार्थी और अल्पज्ञ व्यक्तियों ने वैदिक तत्त्वज्ञान के द्वार जिन स्त्रियों और अन्त्यजों तथा उच्चवर्ण के भी कम पढ़े-लिखे लोगों (व्रात्यों) के लिए बन्द कर दिये थे, महर्षि कृष्ण द्वैपायन व्यास और उनके परमहंस पुत्र शुकदेव ने उनके लिए भी धर्म को सुलभ बना दिया। वेदों के प्रचारकों की पैलादि-परम्परा में ही सूत और शौनकाचार्य की परम्परा भी प्रवर्तित हुई। रोमहर्षण सूत का नाम भी उसी क्रम में है, जिसे इतिहास-पुराण-परम्परा को आगे बढ़ाने का दायित्व मिला। अभिजात और अनभिजात सभी वर्ण इसमें सम्मिलित थे। सूतजी की ब्राह्मणेत्तरवर्णता तो सर्वविदित ही है, लेकिन स्वयं महर्षि व्यास का बचपन भी तो निषादकुल में ही बीता था, जो उनके सान्निध्य से अब 'धीवर' (महाबुद्धिमान्) मान लिया गया था। वभ्यारुणि, कश्यप, सावर्णि, अकृतवण, वैशम्पायन और हारीत के रूप में तत्त्वचिन्तकों और प्रवक्ताओं की पुराणों में एक नयी परम्परा ही उभरकर सामने आयी। भक्ति, ज्ञान और वैराग्य की स्थापना के लिए शुकशास्त्र (भागवत) की कथाओं से दीप्तिमान ज्ञान का महायज्ञ सम्पूर्ण समाज के मन के परिष्कार के निमित्त प्रायोजित था, जिसमें न कोई उँचा था और न कोई नीच। भागवत ने जिस धर्म को पुरोवर्तित किया, उसमें छल-कपट का अंश भी नहीं था, माया-मोह और मत्सर (डाह) का नाम भी नहीं था, न्यूनाधिकता के कारण पारस्परिक ईर्ष्या की भी कोई सम्भावना नहीं थी—धर्म के रूप जो कुछ भी था, वह मात्र कल्याणकारी और मन की सर्वविध अशान्ति को दूर करने वाला था—

धर्मः प्रोज्झितकैतवोऽत्र परमो निर्मत्सराणां सतां,
वेद्यं वास्तवमत्र वस्तु शिवदं तापत्रयोन्मूलनम्[१] ।।

श्रौतयज्ञों का अनुष्ठान बहुव्यय एवं बहुजनसाध्य हो चला था, उसकी प्रतीकात्मक अर्थवत्ता भी धूमिल हो गयी थी, उसमें पशु-हिंसा जैसे कुछ परवर्ती दोष भी आने लगे थे। यहाँ तक कि सौत्रामणी संज्ञक एक यज्ञ में मद्य-प्रेमियों ने मद्य-पान का विधान भी सम्मिलित करा दिया था। इनका भागवतकार ने दृढ़तापूर्वक निषेध किया—

दीक्षायाः पशुसंस्थायाः सौत्रामण्याश्च सत्तमाः ।
अन्यत्र दीक्षितस्यापि नान्नमश्नन् हि दुष्यति[२] ।।

तत्त्वज्ञान और सदाचार से रहित मात्र निष्प्राण कर्मकाण्ड अब जनमानस में सद्भाव का संचार करने में विफल सिद्ध हो रहा था, इसलिए उस पर पुनर्विचार करने की आवश्यकता प्रतीत हो रही थी। भगवन्निष्ठा के बिना इन सबको भागवतकार ने अग्राह्य ही माना है—

धिग्जन्म नस्त्रिवृद्विद्यां धिग्व्रजं धिग् बहुज्ञताम् ।
धिक् कुलं धिक् क्रियादाक्ष्यं विमुखा ये त्वधोक्षजे[३] ।।

---

१. भागवत १.२; २. तदेव १०.२३.८ ।
३. तदेव १०.२३.३९ ।

भागवत के विश्रुत व्याख्याकार श्रीधरस्वामी ने भगवान् से विमुख लोगों के लिए कहा है कि वे कितना ही पञ्चाग्नि तप कर लें, पहाड़ों पर कूद-फाँद कर लें, तीर्थों में भ्रमण कर लें और वाद-विवाद कितने ही ग्रन्थ क्यों न पढ़ लें, लेकिन भगवान् की कृपा के बिना उनका उद्धार नहीं हो सकता—

तपन्तु तापैः प्रपतन्तु पर्वतादटन्तु तीर्थानि पठन्तु चागमान् ।
यजन्तु यागैर्विवदन्तु वादैर्हरिं विना नैव मृतिं तरन्ति[1] ।।

अपने युग की आवश्यकताओं के अनुरूप भागवत ने धर्म का जो सरस सरल और सुग्राह्य रूप प्रस्तुत किया, उसके आधार थे ओङ्कार, वेदमाता गायत्री, पुरुषसूक्त, तुलसी-सिञ्चन, गोसेवा, भागवत का पाठ और 'ऊँ नमो भगवते वासुदेवाय' का सुबोध द्वादशाक्षर मन्त्र—

वेदादिर्वेदमाता च पौरुषं सूक्तमेव च ।
त्रयी भागवतं चैव द्वादशाक्षर एव च[2] ।।

बड़े-बड़े यज्ञों का अनुष्ठान तो धनी-मानी व्यक्ति ही कर सकते थे, लेकिन ओङ्कार और गायत्री के जप में तो एक छद्म भी खर्च करने की जरूरत नहीं थी। भगवान् वासुदेव की आराधना सर्वोपरि घोषित की गयी। सारी धार्मिक क्रियाओं, ज्ञान और तप के केन्द्रबिन्दु के रूप में विष्णु की प्रतिष्ठा हो गयी—

वासुदेवपरा वेदा वासुदेवपरा मखाः ।
वासुदेवपरा योगा वासुदेवपराः क्रियाः ।।
वासुदेवपरं ज्ञानं वासुदेवपरं तपः ।
वासुदेवपरो धर्मो वासुदेवपरा गतिः[3] ।।

प्रजापति के स्थान पर भगवान् विष्णु ही यज्ञेश्वर हो गये।

स्वर्ग में तो पुण्यों के आधार पर फल में न्यूनाधिक की भावना हो भी सकती थी, लेकिन उसके स्थान पर वैकुण्ठ की प्रतिष्ठा सर्वथा निर्दोष थी। वेदों में इन्द्र का राष्ट्रीय वीरयोद्धा और महानायक के रूप में जो गौरवशाली स्वरूप अङ्कित है, उसे तिरोहित कर अल्पज्ञ कथावाचकों ने इन्द्र का जो कुत्सित और कल्पित रूप गढ़कर सस्ते मनोरंजन को प्रोत्साहित किया, उसे हटाकर भागवत में सर्वत्र विष्णु की ही प्रतिष्ठा होती गयी। द्वापर में कृष्ण ने इसीलिए इन्द्रयज्ञ के अनुष्ठान के स्थान पर गोवर्धन-यज्ञ का प्रचलन प्रारम्भ कराया और उसमें कर्म की प्रधानता सुनिश्चित की। यह बल देकर कहा गया कि व्यक्ति को सुख-दुःख, भय और अभय-सब कुछ अपने कर्म से मिलता है—

---

१. श्रीधरस्वामी, भागवत (१०.८७) में उल्लिखित श्रुति-वचनों पर टीका के अन्तर्गत।
२. भागवत-माहात्म्य-३.३४; ३. भागवत १.२.२८.२९।

कर्मणा जायते जन्तुः कर्मणैव विलीयते ।
सुखं दुःखं भयं क्षेमं कर्मणैवाभिपद्यते[१] ।।

ईश्वर भी उसी का सहायक होता है, जो कर्मरत हो—कर्महीन के प्रति उसकी भी कोई सहानुभूति नहीं होती—

अस्ति चेदीश्वरः कश्चित् फलरूप्यन्यकर्मणाम् ।
कर्तारं भजते सोऽपि न ह्यकर्तुः प्रभुर्हि सः[२] ।।

हरिभक्ति का जो ज्वार उमड़ा, उसमें पड़कर वह वृत्रासुर भी हरिभक्त के रूप में ही चित्रित हुआ, जो वैदिक साहित्य में इन्द्र-शत्रु के रूप में प्रदर्शित है। भागवत में वही वृत्रासुर कहता है कि जहाँ हरि हैं, वहीं विजय, लक्ष्मी और अन्यान्य गुण रहते हैं—**यतो हरिर्विजयः श्रीर्गुणास्ततः**[३] । उसकी कामना मात्र इतनी ही है कि भगवान् के चरणों में रहकर वह मन में उन्हीं का चिन्तन करता रहे, उसकी वाणी उनकी स्तुति करती रहे और शरीर कर्मानुष्ठान में संलग्न रहे—

अहं हरे तव पादैकमूलदासानुदासो भवितास्मि भूयः ।
मनः स्मरेतासुपतेर्गुणाँस्ते गृणीत वाक् कर्म करोतु कायः[४] ।।

भागवत का वह सुप्रसिद्ध स्तुति-पद्य, जिसे सन्त प्रभुदत्त ब्रह्मचारी जी बहुधा उद्धृत करते थे, भी वास्तव में वृत्रासुर के मुख से ही निर्गत है—

अजातपक्षा इव मातरं खगाः स्तन्यं यथा वत्सतराः क्षुधार्ताः ।
प्रियं प्रियेव व्युषितं विषण्णा मनोऽरविन्दाक्ष दिदृक्षते त्वाम्[५] ।।

हे कमलनयन विष्णु ! मेरा मन आपके दर्शन-हेतु उसी प्रकार आतुर है, जिस प्रकार पंखहीन पक्षी अपनी माता के दर्शनार्थ उत्कण्ठित रहते हैं, भूख से व्याकुल शिशु माँ के स्तन-पान के लिए लालायित रहते हैं और कोई विषाद ग्रस्त प्रेयसी अपने प्रियतम के सान्निध्य-लाभ के लिए व्याकुल रहती है।

यज्ञानुष्ठान के प्रति सम्पूर्ण श्रद्धा रखते हुए भी भागवत ने, यज्ञस्थल पर प्रदर्शित किसी किस्म की संवेदनशून्यता और अमानवीय मनोवृत्ति को क्षमा नहीं किया है। दशम स्कन्ध का एक प्रसंग कुछ इसी प्रकार का है। जब स्वर्ग की कामना से आङ्गिरस नामक याग के अनुष्ठान में संलग्न ऋत्विकों के पास श्रीकृष्ण ने अपने साथी गोपाल बालकों को भोजन-प्राप्ति हेतु भेजा। यज्ञानुष्ठाताओं ने उन बालकों को बिना कुछ दिये डाँट कर भगा दिया, जिस पर भागवत में बड़ी कड़ी प्रतिक्रिया मिलती है—

---

१. भागवत १०.२४.१३; २. तदेव १०.२४.१४ ।
३. तदेव ६.११.२०; ४. तदेव ६.११.२४ ।
५. तदेव ६.११.२६ ।

इति ते भगवद्-याच्ञां शृण्वन्तोऽपि न शुश्रुवुः ।
क्षुद्राशा भूरिकर्माणो बालिशा वृद्धमानिनः[१] ।।

